अस्मिन् श्वेतवराहकल्पे वैवस्वतमन्वन्तरे द्वापरे पराशरात्मजः सत्यवतीनन्दनः कृष्णद्वैपायनो बभूव । येन वेदा व्यस्ताः कृतश्च वेदान्तशास्त्रं महाभारतं श्रीभागवतञ्च । तस्माद्वेदव्यासमतमाश्रित्य द्वापरे इदानीन्तना अपि धर्मार्थकाममोक्षा हरिभक्तिरिति पुरुषार्थं प्रवर्तयन्ति । कृतादिद्वापरान्तं धर्मार्थकाममोक्षाणां प्रवृत्तिः कलौ हरिभक्तिरेव पुरुषार्थः धर्मश्चैकपात् कृतत्रेतायामन्येषामृषीणां मतमाश्रित्य धर्मोदय आसन् अन्येषामवताराणां मत्स्यकच्छपनृसिंहरामादीनां भक्तिः कलौ कृष्णस्य भक्तिरेव वेदव्यासस्याभीष्टदैवतत्वात् ।

रहस्यमिदमाहादौ ब्रह्मणे पुरुषोत्तमः ।
स नारदाय प्रोवाच कृष्णद्वैपायनाय वै ॥
स आह शुकदेवाय ततो मार्गः स्थिरोऽभवत् ।
ततोऽग्निरूपो भगवान् श्रीवल्लभ इति श्रुतः ॥
प्रादुर्बभूव तस्मै स प्राह कृष्णैश्चर्यान्वितः ।
श्रीवल्लभसुतः श्रीमान् श्रीविट्ठल इति प्रभुः ॥
तेन श्रीवल्लभात्प्राप्तं रहस्यं राधिकापतेः ।
श्रीविट्ठलसुताः सर्वे ख्याता गिरिधरादयः ॥
कुर्वन्तो भगवद्भक्तिमायुष्मन्तो भवन्त्विह ।

श्रीवल्लभप्रोक्तं सर्वतोऽधिकं वस्तुपञ्चकं भगवता स्थापितम्—गुरुसेवा, भागवतार्थः, भगवत्स्वरूपनिर्णयः, भगवत्सेवा, नैरपेक्ष्यमिति ॥

श्रीवल्लभोक्तमार्गेण कृष्णसेवापरास्सदा ।
भवन्तु सुखिनः सर्वे श्रीकृष्णस्य प्रसादतः ॥
तेषु नित्यं प्रसन्नोऽस्तु श्रीमद्वल्लभनन्दनः ।
मदन्वयस्वीकरणे सदा भवतु वल्लभः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

श्रीमन्नृपतिविक्रमादित्यसमयात् षोडशशताधिकदशमसंवत्सरे श्रीमद्वृन्दावने द्विवेदिगदाख्येन ग्रन्थोऽयमकारि ॥

इति श्रीसम्प्रदायकुलदीपिकायां श्रीकृष्णाख्यब्रह्मनिर्णयनिरूपणं नाम पञ्चमं प्रकरणं समाप्तम् ॥

---

No. **5152.** सिद्धान्तरहस्यविवरणम्.

SIDDHĀNTARAHASYAVIVARAṆAM.

Substance, paper. Size, 7½ × 4 inches. Pages, 61. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, new.

Wants beginning and end.

Similar to the above.

By Puruṣōttama, son of Pītāmbara, disciple of Vallabha.

**Beginning:**

. . त्कर्मणा आत्यन्तिकी । तदुत्तरमपि पुनः पापे नः मनःप्रवृत्तिदर्शनात् ।

कर्मणा कर्मनिर्हारो न ह्यात्यन्तिक इष्यते ।
अविद्वदधिकारित्वात् प्रायश्चित्तं विमर्शनम् ॥

इति षष्ठे शुकवाक्याच्च । न च तर्हि ज्ञानात्तन्निवृत्तिरस्तु;

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ।
ज्ञानाग्निस्सर्वकर्माणि भस्मसात्कुरुते तथा ॥

इति गीतायां भगवद्वाक्याच्चेति शङ्कयम्;

नाश्नतः पथ्यमेवान्नं व्याधयोऽभिभवन्त्युत ।
एवं नियमकृद्राजन् शनैः क्षेमाय कल्पते ॥
तपसा ब्रह्मचर्येण शमेन च दमेन च ।
त्यागेन सत्यशौचाभ्यां यमेन नियमेन च ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



देहवाग्बुद्धिजं धीरा धर्मज्ञाः श्रद्धयान्विताः ।
क्षिपन्त्यघं महदपि वेणुगुल्ममिवानलः ॥

इति त्रिषु प्रथमे पथ्याशनदृष्टान्तेन शनैर्नानासाधनतः क्षेमशब्दोदितज्ञानोत्पत्तिमुक्त्वा द्वितीये तत्सहकारीणि नव साधनान्युक्त्वा तृतीये पापनाशकथनात् ।

**End:**

तेन मार्गान्तरे या दोषनिवृत्तिः साधनान्तरमपेक्षते; सात्र सेवाधिकारसम्पादकसंस्कारस्यानुषङ्गिकफलमित्यतोऽस्य सिद्धान्तरहस्यत्वमिति च ॥

एवं प्रभुप्रेरणया विभातं यन्मे तदुक्तं न हि तत्स्वबुद्ध्या ।
अतः स्वदासे करुणां वितन्वन् स एव मत्स्वान्तमलङ्करोतु ॥

यदत्र सदसद्वापि जीवबुद्ध्योदितं क्वचित् ।
क्षमन्त्वाचार्यचरणाः तन्मे मन्तुं कृपालवः ॥

**Colophon:**

इति श्रीमद्वल्लभाचार्यचरणैकतानपीताम्बरात्मजपुरुषोत्तमविरचितं सिद्धान्तरहस्यविवरणं सम्पूर्णम् ॥

## No. 5153. सुवर्णसूत्रम्–विद्वन्मण्डनव्याख्यानम्.

## SUVARṆASŪTRAM: VIDVANMAṆḌANAVYĀKHYĀNAM.

Substance, paper. Size, 7½ × 4 inches. Pages, 148. Lines, 13 on a page. Character, Grantha. Condition, good. Appearance, new.

Incomplete.

A commentary on the Vidvanmaṇḍana: by Puruṣōttama.

For extracts, see page 107 of M. Seshagiri Sastri's Report No. 1.

344-A

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5154. सेवाकल्पतरुः.

## SĒVAKALPATARUḤ.

Pages, 42. Lines, 14 on a page.

Begins on fol. 26*a* of the MS. described under No. 5145

On the nature of the worship to be offered to Śrī-Kṛṣṇa and the benefits to be derived therefrom : by Muralīdharadāsa.

For extracts, see under No. 29 in page 108 of M Seshagiri Sastri's Report No. 1.

## No. 5155. सेवाफलम्.

## SĒVĀPHALAM.

Pages, 2. Lines, 27 on a page.

Begins on fol. 101*b* of the MS. described under No. 2981

Complete.

A tract setting forth the advantages to be derived from piety and loving devotion to Lord Kṛṣṇa : by Vallabhācārya.

**Beginning :**

याद्दशी सेवना प्रोक्ता तत्सिद्धौ फलमुच्यते ।
अलौकिकस्य दाने हि चाद्यास्सिध्येन्मनोरथः ॥
फलं वा ह्यधिकारो वा न कालोऽत्र नियामकः ।
उद्योगः प्रतिबन्धो वा भोगो वा स्यात्तु बाधकम् ॥

**End :**

तदीयैरपि तत्कार्यं पुष्टौ नैव विलम्बयेत् ॥
गुणक्षोभेऽपि द्रष्टव्यमेतदेवेति मे मतिः ।
कुसृष्टिरत्र वा काचिदुत्पद्येत स वै भ्रमः ॥

**Colophon :**

इति श्रीमदाचार्यचन्द्रविरचितं सेवाफलं संपूर्णम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5156. हरिदाससिद्धान्तः.

## HARIDĀSASIDDHĀNTAḤ.

Pages, 2. Lines, 27 on a page.

Begins on fol. 84*b* of the MS. described under No. 2981.

Complete.

A devotee's views regarding self-surrender to Kṛṣṇa: by Haridāsa.

**Beginning:**

दुष्टतमोऽपि दयारहितोऽपि विधर्मविशेषकृतिप्रथितोऽपि ।
दुर्जनसङ्गरतोऽपि च दीनः कृष्ण तवास्मि न चास्मि परस्य ॥
लोभरतोऽप्यभिमानयुतोऽपि(च) परहितकारणकृत्यकरोऽपि ।
क्रोधकरोऽप्यविवेकहतोऽपि च कृष्ण तवास्मि न चास्मि परस्य ॥

**End:**

वल्लभवंशजनुस्सबलोऽपि श्रीप्रभुपादसरोजफलोऽपि ।
लौकिकवैदिककर्मखलोऽपि च कृष्ण तवास्मि न चास्मि परस्य ॥
पञ्चाक्षरमहामन्त्रगर्भे तत्स्तोत्रपाठतः ।
श्रीमदाचार्यदासानां तदीयत्वं भवेद्धुवम् ॥

**Colophon:**

इति श्रीहरिदासोक्तं(क्तः) सिद्धान्तं(न्तः)संपूर्णम्(ः) ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## 6.—JAINA-PHILOSOPHY AND RELIGION.

### No. 5157. अर्थव्यञ्जनपर्यायनिरूपणम्.

### ARTHAVYAÑJANAPARYĀYANIRŪPAṆAM.

Substance, palm-leaf (Śrītāla). Size, 11⅛ × 1⅞ inches. Pages, 9. Lines, 8 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Begins on fol. 21*b*. The other works herein are Jainācārya-paramparā 1*a*, Ārhatastōtra (with Kanarese commentary) 11*a*, Karmaprakṛti 26*a*, Prakṛtisamutkīrtana 33*a*

Complete.

A work on the principles of Jaina-philosophy.

**Beginning:**

यस्यानुग्रहतो दुराग्रहपरित्यक्तात्मरूपात्मनः
सद्द्रव्यं चिदचित्त्रिकालविषयं स्वैस्स्वैरभीक्ष्णं गुणैः ।
सार्थव्यञ्जनपर्ययैः स मम यज्जानाति बोधस्समं
तत्सम्यक्तमशेषकर्मभिदुरं सिद्धापरं नौमि वः ॥

स्थूलो व्यञ्जनपर्यायो वाग्गम्योऽनश्वरः स्थिरः ।
सूक्ष्मः प्रतिक्षणध्वंसी पर्यायश्चार्थसंज्ञकः ॥

धर्माधर्मनभःकाला अर्थपर्यायगोचराः ।
व्यञ्जनार्थेन संबन्धात् द्वावन्यौ जीवपुद्गलौ ॥

* * * *

अतः तत्परिणमनं प्रतिक्षणनवीभाव इति कुतो नोक्तमाशावरैरिति नाशङ्कनीयम्; तावन्मात्रवचने केवलज्ञानस्य गृहीतग्राहित्वानतिवृत्तेरप्रामाण्यप्रसङ्गस्यानिवारणात् । तथाहि—केवलज्ञानं प्रागेव सर्वद्रव्यपर्यायान् गृह्णाति । सर्वद्रव्यपर्यायेषु केवलस्येति सूत्रकारवचनात् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

ननु सर्वेषामर्थानां अर्थपर्यायेण परिणमनं प्रतिक्षणं नवीभावः; तथा च तस्य अपूर्वार्थव्यवसायकत्वाभावादप्रामाण्यं स्यात्। अतः प्रतिक्षणनवीभावोऽन्यथा व्याख्यात आशावरैरिति ज्ञेयम्।

* * * *

सत्तालोचनमात्रमित्यपि निराकारं मतं दर्शनं
साकारश्च विशेषगोचरमिति ज्ञानं प्रवादीच्छया।
तेने ते क्रमवर्तिनी सरजसां प्रादेशिके सर्वतः
स्फूर्ज[य]न्ति(न्ते)युगपत्पुनर्विरजसां युष्माकमङ्गातिगाः ॥

---

## No. 5158. आत्मानुशासनम्—सटीकम्.
## ĀTMĀNUŚĀSANAM WITH ṬĪKĀ.

Substance, palm-leaf. Size, $17\frac{7}{8} \times 2$ inches. Pages, 32. Lines, 10 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Wants 40 stanzas in the beginning.

On the means for attaining final salvation according to Jainism: by Guṇabhadrabhadanta.

The commentary is by Kēśavārya.

**Beginning:**

साम्राज्यं कथमप्यवाप्य सुचिरात्संसारसारं पुनः
तत्त्यक्त्वैव यदि क्षितीश्वरवराः प्राप्ताः श्रियं शाश्वतीम्।
त्वं प्रागेव परिग्रहान् परिहर त्याज्यान् गृहीत्वा च ते
मा भूः भौतिकमोदकव्यतिकरं सम्पाद्य हास्यास्पदम् ॥

साम्राज्यं चक्रवर्तित्वम्। कथमपि केनापि प्रकारेण सुचिरात् बहुकालात् संसारसारं संसृतौ सारभूतम् अवाप्य प्राप्य पुनस्तत् चक्रवर्तित्वं त्यक्त्वैव क्षितीश्वरवराः चक्रवर्तिनः शाश्वतीं श्रियं मोक्षलक्ष्मीं प्राप्ताः प्रतिपन्नाः यदि चेत् त्वं भवान् परिग्रहान् प्रागेव परिहर त्या-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ज्यान् परिग्रहान् गृहीत्वा भौतिकमोदकव्यतिकरं सम्पाद्य कृत्वा ते तव हासास्पदं हासस्य आस्पदं मा भूः निष्परिग्रहत्वमेव व्रतस्य लक्षणमिति भावः ।

सपरिग्रहत्वं किमर्थं मोक्षं कर्तुम(र्तुं न)शक्नोतीत्याह—

सर्वं धर्ममयं क्वचित्क्वचिदपि प्रायेण पापात्मकं
क्वाप्येतद्द्वयवत्करोति चरितं प्रज्ञाधनानामपि ।
तस्मादेष तदन्धरज्जुवलनं स्नानं गजस्याथवा
मत्तोन्मत्तविचेष्टितं न हि हितो गेहाश्रमः सर्वदा ॥

**End:**

ग्रन्थार्थमुपसंहृत्य तदुक्ताचरणमाचरतां विनेयजनानां फलं प्रवक्तुमुत्तरसूत्रावतारः—

इति कतिपयवाचां गोचरीकृत्य कृत्यं रचितमुचितमुच्चैश्चेतसां चित्तरम्यम् ।
इदमपि कलयन्तस्सन्ततं चिन्तयन्तः सपदि विपदपेतामाश्रयन्ते श्रियं ते ॥

इति उक्तप्रकारेण कतिपयवाचां कतिपयशब्दानां गोचरीकृत्य विषयं कृत्वा रचितं ग्रथितम् उचितं मोक्षार्थिनां भावनायोग्यम् उच्चैश्चेतसां विवेकसम्पन्नानां चित्तरम्यं हृदयङ्गमम् इदं तत्त्वम् इदम् अनुष्ठेयतत्त्वप्रतिपादकस्यात्मानुशासनम् अविकलं संपूर्णम् अन्तः मनसि सन्ततम् अजस्रं चिन्तयन्तः ते सत्पुरुषाः सपदि तीव्रं विपदपेतां शाश्वतीं श्रियं मुक्तिश्रियम् आश्रयन्ते प्राप्नुवन्ति ।

अत्यासन्नभव्ये अनुष्ठाता चतुर्विधाराधनास्वरूपसम्पन्नानुष्ठेयतत्त्वं शुद्धान्तरङ्गे अनुष्ठितस्सन् परिनिष्ठितो भवतीति तात्पर्यम् ।

ग्रन्थकारो ग्रन्थपरिसमाप्तौ स्वगुरुपादानुस्मरणपूर्वकं निजाङ्कं ज्ञापयितुमुत्तरसूत्रमाचष्टे—

जिनसेनाचार्यपादस्मरणादीनचेतसाम् ।
गुणभद्रभदन्तानां कृतिरात्मानुशासनम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जिनसेनाचार्य श्रीजिनसेनाचार्याणां, पाद श्रीपादयोः स्मरणादीन- चेतसां स्मरणे अदीनं युक्तं चेतो येषां ते गुणभद्रभदन्ताः तेषां गुण- भद्रभदन्तानां गुणभद्रस्वामिन इति नामधेयेन पूज्यानां कृतिः करणम् आत्मानुशासनं नाम शास्त्रम् ॥

गुणभद्रभदन्तैर्यदवाच्यात्मानुशासनम् ।
तस्य लध्वी कृता टीका केशवार्येण शान्तये ॥

---

No. 5159. आस्रवत्रिभङ्गी.

ĀSRAVATRIBHAṄGĪ.

Substance, palm-leaf. Size, 18¾ × 1½ inches. Pages, 26. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 19*a*. The other works herein are Gōmaṭhasāra-gādhā 1*a*, Bandhatribhaṅgī 32*a*, Udayatribhaṅgī 42*b*, Sattva-guṇasthānatribhaṅgī 56*a*, Sattvavarga 65*b*, Pramattāpramatta-sthānabhaṅga 68*a*.

Complete.

On the threefold causes which bind the soul to worldly attachments.

**Beginning:**

पणमिअ सुरेंदपूजिअपयकमलं वड्ढमाणममलगुणम् ।
पच्चयसत्तावण्णं बोच्छेहं सुणुह भवियजणा ॥
मिच्छत्तं अविरमणं कसाअ जोगाय आसवा होन्ति ।
पणबारसपणवीसा पण्णरसा होत्ति तब्भेया ॥
मिच्छोदएण मिच्छं तंमसदहणं तुतं च अत्थाणम् ।
एयंतं विवरीयं विणयं संसइदमण्णाणम् ॥
छस्संदिए सुविरादिछज्जीवे त हय अविरदी चेव ।
इंदिय पाणासंजमुदुदसं होदित्ति णीदिट्ठम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

इति मग्गणा सु जोग्गा पच्चयभेदा मया समासेण ।
कहिदो सुदमुणिणा जो भावइसोजा इ अप्पसुहम् ॥
पयकमलजुयलविणमिअ विणेअजणकग्वसुपूयमाहप्पा ।
णिज्जिअमयणपहावो सो बालेंदु चिरं जयतु ॥

**Colophon:**

इति आस्रवत्रिभङ्गी समाप्ता ॥

---

No. **5160.** उत्तमपात्रादिलक्षणम्.

UTTAMAPĀTRĀDILAKṢAṆAM.

Substance, palm-leaf. Size, $14\frac{1}{8} \times 1\frac{7}{8}$ inches. Pages, 49. Lines, 11 on a page. Character, Kanarese. Condition, good. Appearance, old.

Begins on fol. 9*a*. The other work herein is Dānalakṣaṇa 1*a*. Incomplete.

Defines and determines, according to Jainism, the characteristics of the really great and good man.

**Beginning:**

प्रणम्य जिनभास्वन्तमज्ञानध्वान्तभेदिनम् ।
विध्यर्थपात्रदातॄणां वक्ष्ये लक्षणमुत्तमम् ॥
योऽन्यानन्यधनानि चान्यसुकृतान्यन्याघमन्यार्जितं
त्रैरत्नं परदृष्टिबोधचरितं दुर्वृत्तमन्यस्य वा ।
दातारस्समनुग्रहाय ददते दानानि चात्माक्षयं
पात्रापात्रविचारशून्यमनसः कर्माणि ते चिन्वते ॥
वैरं व्याधिरघश्च नश्यति लसत्पुण्यं दया वर्धते
भूताः पश्च वशीभवन्ति रिपवो मित्राणि के बन्धवः ।
सद्धर्मानुगमाः सधर्मचरिताः के धार्मिकास्सदृशः
शुद्धास्स्युः गुरवो वृषे निजनिजेष्टार्थप्रदानेन के ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

सन्तः शाल्यन्नमिच्छन्ति न च मद्यं तदुद्भवम् ।
धर्ममेव यदा किंचित् किञ्चिन्नेच्छन्ति दुष्कृतम् ॥
तिक्तमूलवपुःपत्रा पुष्पादिश्रिभेटो यथा ।
पक्षे मधुरतां यान्ति केचिदन्त्यो(न्ये) शुभाशयाः ॥
आस्तेऽर्कभक्तो बन्धूको भास्करादि(भि)मुखो यदा(था) ।
केचिद्देवजिनेन्द्रोक्तसन्मार्गाभिमुखास्तदा(था) ॥

---

## No. 5161. उदयत्रिभङ्गी.
## UDAYATRIBHAṄGĪ.

Pages, 24. Lines, 5 on a page.

Begins on fol. 42*b* of the MS. described under No. 5159.

Complete.

By Nēmicandra.

**Beginning:**

पञ्चणवदुण्णिअट्ठा वीसं चउरो कमेण सत्तट्ठी ।
दुण्णिअपञ्चअभणिआ एदाओ उदअपअडीओ ॥
आहारं तुपमत्ते तित्थं केवळि णिमिस्सअम्मिस्से ।
सम्मं वेदकसम्मे मिच्छदुग अदेवआणुदओ ॥
णिरअंसासणसम्मो णगच्छादित्ति अणतस्साणिरआणु ।
मिच्छादिसुसे सुदओ सगसग चरिमोत्ति णाएव्वो ॥

**End:**

वेगुब्बच्छक्कपणा संहदि संठाण[सुगमण]सुभगआतीअम् ।
आहारे सगुणोघं णवरिणसव्वाणुपुंवीओ ॥
कम्मे वअणाहारे पअढीषं उदअमेवमादेसे ।
कहि अमणं बहुमाहवचन्दच्चिअ णेमिचन्देण ॥

**Colophon:**

उदयत्रिभङ्गी समाप्ता ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5162. उपासकसंस्कारः.
## UPĀSAKASAṀSKĀRAḤ.

Substance, palm-leaf. Size, 10⅝ × 1½ inches. Pages, 8. Lines, 7 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Begins on fol. 29*a*. The other works herein are Ratnakaraṇḍa 1*a*, Sajjanacittavallabha 21*a*, Praśnōttararatnamālikā 25*b*, Vratasvarūpa 33*a*, Vratasvarūpaphalavarṇana 37*a*, Jainastōtra 42*b*.

Complete.

On the duties of those who walk in the path of righteousness as propounded in Jainism : by Padmanandin.

**Beginning:**

आद्यो जिनो नृपः श्रेयान् व्रतदानादिपूरुषौ ।
एतदनो(न्यो)न्यसंबन्धे धर्मस्थितिरभूदिह ॥
सम्यग्दृक्ष्याथ चारित्रत्रितयं धर्म उच्यते ।
मुक्तिपन्थास्स एव स्यात् प्रमाणपरिनिष्ठितः ॥
रत्नत्रयातते मार्गे सञ्चरन्ति न ये जनाः ।
तेषां मोक्षपदं दूरं भवेद्दीर्घतरो भवः ॥
सम्पूर्णदेशभेदाभ्यां स च धर्मो द्विधा भवेत् ।
आद्ये भेदे च निर्ग्रन्था द्वितीये गृहिणः स्थिताः ॥
सम्प्रत्यपि प्रवर्तेत धर्मस्तेनैव वर्त्मना ।
तेनैतेऽपि च गण्यन्ते गृहस्था धर्महेतवः ॥

**End:**

अन्तस्तत्त्वं विशुद्धात्मा बहिस्तत्त्वं दयाङ्गिषु ।
द्वयोस्सम्मेळने मोक्षः तस्माद्द्वितय . . . . ॥
कर्मभ्यः कर्मकार्येभ्यः पृथग्भूतं चिदात्मकम् ।
आत्मानं भावयेन्नित्यं नित्यानन्दपदप्रदम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्युपासकसंस्कारः कृतः श्रीपद्मनन्दिना ।
येषामेतदनुष्ठानं तेषां धर्मोऽतिनिर्मलः ॥

**Colophon:**

इत्युपासकसंस्कारस्समाप्तः ॥

---

## No. 5163. कर्मप्रकृतिः.
## KARMAPRAKṚTIḤ.

Pages, 15. Lines, 7 on a page.

Begins on fol. 26*a* of the MS. described under No. 5157.

Complete.

On the doctrine of Karma according to Jaina-philosophy: by Abhayacandrasiddāntacakravartin.

**Beginning:**

प्रक्षीणावरणाद्वैतमोहप्रत्यूहकर्मणे ।
अनन्तानन्तधीदृष्टसुखवीर्यात्मने नमः ॥

आत्मनः प्रदेशेषु बद्धं कर्म—द्रव्यकर्म, भावकर्म, नोकर्म चेति त्रिविधम् । तत्र प्रकृतिस्थित्यनुभागप्रदेशभेदेन द्रव्यकर्म चतुर्विधम् । तत्र ज्ञानप्रच्छादनादिस्वभावः प्रकृतिः---मूलप्रकृतिरुत्तरप्रकृतिरुत्तरोत्तरप्रकृतिरिति त्रिधा । तत्र ज्ञानावरणीयं, दर्शनावरणीयं, वेदनीयं, मोहनीयम्, आयुष्यं, नाम, गोत्रम्, अन्तरायश्चेति मूलप्रकृतिरष्टधा । तत्रात्मनो ज्ञानं विशेषग्रहणमावृणोतीति ज्ञानावरणीयं श्लक्ष्णकाण्डपटवत् । दर्शनं सामान्यग्रहणमावृणोतीति दर्शनावरणीयं प्रतिहारवत् । सुखं दुःखं वा इन्द्रियद्वारा वेदयतीति वेदनीयं मधुलिप्तखड्गधारावत् । आत्मानं मोहयतीति मोहनीयं मद्यवत् । शरीरे आत्मानमेति धारयतीत्यायुष्यं शृङ्खलावत् । नानायोनिषु नारकादिपर्यायैरात्मानं नामयतीति नाम चित्रकारवत् । उच्चनीचकुलकेनात्मानेन गीयत इति गोत्रं कुम्भकारवत् । दानादिविघ्नं कर्तुमन्तरं दातृपात्रादीनां मद्यमि(ध्यमेती)ति अन्तरायः भाण्डागारवत् ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

अत एव लोकालोकविभागश्चेति । सकलकर्मप्रकृतिरहितसिद्धात्मस्व-रूपं प्राप्तुकामा भव्या अनवरतं परमागमाभ्यासजनितनिर्मलसम्यग्द-र्शनचारित्रतपोभावनानिष्ठा भवन्तु ॥

जयन्ति विदु(धु)ताशेषपापाञ्जनसमुच्चयाः ।
अनन्तानन्तधीदृष्टसुखवीर्यजिनेश्वराः ॥

कृतिरियमभयचन्द्रसिद्धान्तचक्रवर्तिनः । तत्पादौ सदा नमामि त्रि-शुद्ध्या ॥

**Colophon:**

कर्मप्रकृतिस्समाप्ता ॥

---

No. **5164.** गोमठसारगाथा.

GŌMAṬHASĀRAGĀTHĀ.

Pages, 36. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 5159.

Complete

Appears to be a treatise on the nature of Prakṛti and the soul's re-incarnation: written in Prakrit in the Gāthā-metre.

**Beginning:**

पणमिअ सिरसा णेमिं गुणरअणविभूसणं महावीरम् ।
सम्मत्तरअणाणिलअं पअडिसमुक्कित्तणं बोच्छम् ॥

पअडीसीलसहाओ जीवग्गाणं अणाइसंबन्धो ।
कणओबले मळं वा ताणं तित्तीसअं सिद्धम् ॥

अस्तित्वं स्वतस्सिद्धम् ।

देहोदएण सहिओ जीवो आहरइ कम्मणो कम्मम् ॥
पडिसमअं संवग्गं तत्तायसापिण्डउव्वजळम ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सिद्धाणन्तिमभागं अभव्वसिद्धा दणन्तगुणमेव्व ।
समअपबन्धं बन्धदि जोगवसादो दुविसरिच्छम् ॥
जीरादिसमयपबन्धं पयोगदोऽणेकसमयबद्धं वा ।
गुणहाणी णदिवड्ढं समयपबद्धं हवे सत्तम् ॥

* *

देवा पुणऐ इन्दिअ आदावत्थावरञ्च सेसाणम् ।
उक्कस्स संकिलिट्ठा चदुगदिआ ईसिमाज्झिमया ॥

**End:**

अन्तो कोडाकोडिट्ठिदिस्स अन्तो मुहूत्तमाबाह ।
सङ्ख्जगुणविहीणं सव्वजहण्णट्ठि दिस्सहवे ॥
पुव्वाणं कोडितिभागादासङ्खेप अद्द ओत्तिहवे ।
आउस्सअ आबाहाणट्ठिदि पडिभागमाउस्स ॥

* *

सण्णिस्सदु हेट्ठादो गाधारचना.

---

No. **5165.** तत्त्वार्थसूत्रवृत्तिः—सुखबोधः.

TATTVĀRTHASŪTRAVṚTTIḤ : SUKHABŌDHAḤ

Pages, 365. Lines, 22 on a page.

Begins on fol. 89*a* of the MS. described under No. 2771.

A commentary on the Tattvārthasūtra of Umāsvātimunīśvara, which gives a brief outline of the principles of Jainism: by Bhāskaranandi, a disciple of Jinacandrabhaṭṭāraka.

**Beginning:**

जयन्ति कुमुदध्वान्तपाटने पटुभास्कराः ।
विद्यानन्दाः सतां मान्याः पूज्यपादा जिनेश्वराः ।

अथ अतिविस्तरमन्तरेण विमतिप्रतिबोधनार्थमिष्टदेवतानमस्कारपुरस्क(ा)रं तत्त्वार्थसूत्रपदविवरणं क्रियते । तत्रादौ नमस्कारश्लोकः—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मोक्षमार्गस्य नेतारं भेत्तारं कर्मभूभृताम् ।
ज्ञातारं विश्वतत्त्वानां वन्दे तद्गुणलब्धये ॥ इति ॥

अस्य समुदायार्थः कथ्यते—मोक्षोपायस्योपदेष्टारं सकलजीवादितत्त्वानां ज्ञातारं कर्ममहापर्वतानां भेत्तारं भगवन्तमर्हन्तमेवानन्तज्ञानादितद्गुणप्राप्त्यर्थं वन्देऽहम्; तस्यैव सकलप्रमाणाविरुद्धानेकान्तात्मकार्थभाषित्वादिति । किंस्वरूपोऽसौ सम्यग्ज्ञानं प्रमाणं मोक्षमार्ग इति केनचिदासन्नभव्येन परिपृष्टे सति आचार्यः प्राह—सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः । सम्यक्शब्दः प्रशस्तवाची सर्वदर्शनादिभिस्त्रिभिर्विशेषणत्वेन प्रत्येकमभिसंबध्यते—सम्यग्दर्शनं सम्यग्ज्ञानं सम्यक्चारित्रमिति ।

**End :**

तदेवं व्याख्यातजीवादितत्त्वार्थविषयश्रद्धानां ज्ञानं तत्पूर्वकं चारित्रमिति स्थितमेतत् । सम्यग्दर्शनादीनि मोक्षमार्गः नान्यः । तत्प्रणेता सर्वज्ञो वीतरागश्च वन्द्य इति ।

इति यः सुखबोधाख्यां वृत्तिं तत्त्वार्थसङ्गिनीम् ।
षट्सहस्रां सहस्रोनां विद्यात्संमोहमार्गवित् ॥

* * *

तस्यासीत्सुविशुद्धदृष्टिविभवः सिद्धान्तपारङ्गतः
शिष्यः श्रीजिनचन्द्रनामकलितश्चारित्रभाषान्वितः ।
शिष्यो भास्करनन्दिनामविबुधस्तस्याभवत्तत्त्ववित्
तेनाकारि सुखादिबोधविषया तत्त्वार्थवृत्तिः स्फुटम् ॥

**Colophon :**

शशधरकरनिकरतारानिस्तलतरलतलमुक्ताफलहारस्फुरत्तारानिकुरम्ब - बिम्बि(म्ब)निर्मलतरपरमोदारशरीरशुद्धध्यानानलोज्ज्वलज्ज्वलज्ज्वालाज्वलित - घनघातीन्धनसङ्घातसकलविमलकेवलावलोकितसकललोकालोकस्वभा(व)वत् -

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीमत्परमेश्वरजिनपतिमतविततमातीचिदाचित्स्वभावाभावाविद्भावसाधितस्वभा-
वपरमाराध्यतममहासैद्धान्तश्रीजिनचन्द्रभट्टारकः तच्छिष्यपण्डितश्रीभास्कर-
नन्दिविरचिततत्त्वार्थवृत्तौ सुखबोधायां दशमोऽध्यायः समाप्तः ॥

इति तत्त्वार्थसूत्रव्याख्यानं परिसमाप्तम् ॥

श्रीमत्सुरनराधीशं श्रीवीरं देवराजकम् ।
आराधितसमर्थेनानन्तनाथ(थाख्य)शर्मणा ॥
विरोधिवत्सरे मासि माघे सत्पूर्वपक्षके ।
पौर्णम्यां मन्दवारे च ऋक्षे च मखमेतथा(नामके) ॥

* * * *

तत्त्वार्थसूत्रव्याख्यानं लिखितं दृक्स्वरूपकम् ।
श्रीमन्महति वर्धमानस्वामिसन्निधाने तत्त्वार्थसूत्रव्याख्यानं लिखितम् ॥

---

## No. 5166. दानलक्षणम्.

## DĀNALAKṢAṆAM.

Pages, 16. Lines, 11 on a page.

Begins on fol. 1*a* of the MS. described under No. 5160.

Complete.

Describes the characteristics of a religiously efficacious gift.

**Beginning:**

यस्य पादाब्जसद्गन्धाघ्राणनिर्मुक्तकल्मषाः ।
ये भव्यास्सन्ति तं देवं जिनेन्द्रं प्रणमाम्यहम् ॥
दानं वक्ष्येऽथ वारीव सस्यसम्पत्तिकारणम् ।
क्षेत्रोप्तं फलतीव स्यात् सर्वस्त्रिषु समं सुखम् ।
शुद्धसद्दृष्टिभिः शुद्धपुण्योपार्जनलम्पटैः ।
सार्थं ब्रूयादिमं ग्रन्थं नेतरैस्तु कदाचन ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्रमकृताकृतकृषिदानफलमाह—

दत्वा द्वित्रिगुणं करञ्च सकलं विष्टिश्च कृत्वा प्रजाः
स्वद्रव्यव्ययमार्तवप्रनि(णि)चये सम्यक्फले निष्फले ।
प्रत्यब्दं बहु सुक्रियाः क्रमकृतास्ताभिः कृताः कुर्वते
मुक्त्वा सत्क्रममुत्तमं सुखयजो(शो) वान्द(ञ्छ)न्ति जैनास्तदा ॥
धर्मकारणपात्राय धर्मार्थं येन दीयते ।
यद्द्रव्यं दानमित्युक्तं तद्धर्माजिनपण्डितैः ॥

**End:**

चण्डांशोरवलोकनादिव जगद्भात्यन्धकारावृतं
कल्याणन्तु सवादिकं हुतभुजस्तापाद्यथा शुध्यति ।
तद्वद्भानुहिमांशुकोटिसदृशप्रद्योततीर्थङ्कर-
श्रीपूजोत्सवसेवनोचितमिदं दुष्टेन दत्तं धनम् ॥
सागसोऽर्थो नृपैस्सेव्यो न सेव्यो नृपसेवकैः ।
देवपूजोचितं दोषे वित्तं नान्यस्य चोचितम् ॥
ये मन्त्वर्थापहर्तारस्ते प्रपाणान्तु सागसः ।
स तदर्थं गृहीत्वैव नृपमन्दिरमानयेत् ॥

**Colophon:**

इति दानलक्षणम् ॥

---

No. **5167.** द्रव्यसङ्ग्रहः.

DRAVYASAṄGRAHAḤ.

Substance, palm-leaf. Size, 13⅜ × 2 inches. Pages, 11. Lines, 9 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Begins on fol. 1*b*. The other works herein are Ratnakaraṇḍaka 12*b* and 25*a*, Caityastuti 22*a*, Jainagrantha (Kanarese) 38*a*, Cinmayacintāmaṇi (Kanarese) 52*a*, Ratnakaraṇḍakaṭīkā 54*a*,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Wants 4 stanzas at the beginning.

A treatise on some of the principles of Jainism: in **Prakrit.**

By Nēmicandrasiddhāntacakravartin.

**Beginning:**

उवओगो दुविअण्णो दस्सणणाणञ्च दस्सणश्चदुदा ।
चक्कुवचकूओही दस्सणमथकेव धण्णेयम् ॥

णाणं अट्ठविअप्पं मदिसुदओहि अणाण णाणाणि ।
मणपज्ञवकेवगमपि पच्चक्खपरोक्खगे यञ्च ॥

मयिसुयिपरोक्खणाणं ओहिमणं होइ विअगपच्चक्खम् ।
तस्सणणाणञ्चतहा अणावमं होइ सअगपच्चक्खम् ॥

अट्ठचदुणाणदस्सणसामण्णजीवलक्खणं खणिअम् ।
ववहारासुद्दणआ सुद्धप्पणदस्सणं णाणम् ॥

**End:**

अन्तर्मुहूर्तकालं चिन्तावस्थानमेकवस्तुगतम् ।
पद्मस्थानां ध्यानं योगनिरोधो जिनानान्तु ॥

तवसुदवदवचेदा अण्णरहदुरद्धरोहणेजद्वा ।
. . . तंतिदअरदोतं लद्दिपसदाहाह ॥

दव्वसङ्गहमिणं मुणिणाह दोससचअपुदसुदपुण्णा ।
सोद अत्तुतणुसुत्तदरेण णेमिचद्दमुणिणा कहइज्जम् ॥

**Colophon:**

इति श्रीनेमिचन्द्रसिद्धान्तचक्रवर्तिविरचिते द्रव्यसङ्ग्रहे मोक्षमार्ग-
ध्याननिरूपणाधिकारः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. **5168.** द्रव्यसङ्ग्रहसूत्रवृत्तिः.

DRAVYASAṄGRAHASŪTRAVṚTTIḤ.

Substance, paper. Size, 11¾ × 11 inches. Pages, 64. Lines, 14 on a page. Character, Telugu. Condition, good. Appearance, old.

Incomplete.

A commentary in Sanskrit on the Dravyasaṅgraha of Nēmicandrasiddhāntacakravartin.

**Beginning:**

प्रणम्य परमात्मानं सिद्धं त्रैलोक्यवन्दितम् ।
स्वाभाविकचिदानन्दस्वरूपं निर्मलाव्ययम् ॥

शुद्धजीवादितत्त्वानां देशिकञ्च जिनेश्वरम् ।
द्रव्यसङ्ग्रहसूत्राणां वृत्तिं वक्ष्ये समासतः ॥

अथ माळवदेशे धारानामनगराधिपतिभोजदेवाभिधानकविकालचक्रवर्तिसंबन्धिनः श्रीपालमण्डलेश्वरस्य संबधिन्याश्रमनामवन(व)रे श्रीमुनिसुव्रततीर्थकरचैत्यालये शुद्धात्मद्रव्यसंवित्तिसमुत्पन्नसुखसुधारसपिपासितस्य भेदाभेदरत्नत्रयभावनाप्रियस्य भव्यपुरपुण्डरीकस्य भाण्डागाराद्यनेकनियोगाधिकारिसोमाभिधानराजश्रेष्ठिनो निमित्तं श्रीनेमिचन्द्रसिद्धान्तदेवैः पूर्वं षड्विंशतिगाथाभिः लघुद्रव्यसङ्ग्रहं कृत्वा पश्चाद्विशेषतत्त्वपरिज्ञानार्थं विरचितस्य बृहद्द्रव्यसङ्ग्रहग्रन्थस्याधिकारशुद्धिपूर्वकत्वेन वृत्तिः प्रारभ्यते ।

तत्रादौ जीवमजीवं दव्वमित्यादिसप्तविंशतिगाथापर्यन्तं षड्द्रव्यपञ्चास्तिकायप्रतिपादनं नाम प्रथमोऽधिकारः । तदनन्तरम् आसवबद्धण इत्यादि एकादशगाथापर्यन्तं सप्ततत्त्वनवपदार्थप्रतिपादनमुख्यतया द्वितीयो महाधिकारः । ततः परं सम्मद्दं सणणाणमित्यादिविंशतिगाथापर्यन्तं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मोक्षमार्गकथनमुख्यत्वेन तृतीयोऽधिकारश्चेति अष्टाधिकपञ्चाशद्गाथाभिरधिकारत्रयं ज्ञातव्यम् ।

* * * *

अथेदानीं गाथापूर्वार्धेन संबन्धाभिधेयप्रयोजनानि कथयामि, उत्तरार्धेन च मङ्गलार्थमिष्टदेवतानमस्कारं करोमि इत्यभिप्रायं मनसि धृत्वा भगवान् सूत्रमिदं प्रतिपादयति—

जीवमजीवं दव्वं जिणवरवसहेण जेण णिद्दिट्ठम् ।
देविन्दविन्दवन्दं वन्दे तं सव्वदा सिरसा ॥

वन्दे इत्यादिक्रियाकारकसंबन्धेन पदखण्डनारूपेण व्याख्यानं क्रियते । वन्दे एकदेशशुद्धनिश्चयनयेन सुशुद्धात्माराधनालक्षणभावस्तवेन असद्भूतव्यवहारनयेन तत्प्रतिपादकवचनरूपद्रव्यस्तवेन च वन्दे नमस्करोमि ॥

See under the next number for the end.

---

No. **5169.** द्रव्यसङ्ग्रहसूत्रवृत्तिः.

DRAVYASAṄGRAHASŪTRAVṚTTIḤ.

Substance, paper. Size, 12¼ × 7½ inches. Pages, 58. Lines, 35 on a page. Character, Telugu. Condition, good. Appearance, old.

Incomplete.

This is the second volume of the work described under the previous number.

See under the previous number for the beginning.

**End:**

अयमत्रार्थः—यथा विवक्षितैकदेशशुद्धनिश्चयेन पूर्वं मोक्षमार्गो व्याख्यातः; तथा पर्यायमोक्षरूपो मोक्षोऽपि न [च] शुद्धनिश्चयेनेति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यस्तु शुद्धद्रव्यशक्तिरूपशुद्धपरिणामिकपरमभावलक्षणपरमनिश्चयमोक्षः स च पूर्वम(मे)व जीवे तिष्ठति इत्येवं नस(व) एव रागादिविकल्परहिते मोक्षकारणभूते ध्यानभावनापर्यायध्येयो न भवति । नवध्यानभावनापर्यायरूपो यदि, पुनरेकान्तेन द्रव्यार्थिकनयेनापि स एव ध्यानकारणभूतो ध्यानभावना.

---

No. 5170. प्रकृतिसमुत्कीर्तनम्.

PRAKṚTISAMUTKĪRTANAM.

Substance, palm-leaf (Śrītāla). Size, 19⅛ × 1⅞ inches. Pages, 50. Lines, 8 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Begins on fol 114*a*. The other works herein are Gaṇitasārasaṅgraha 1*a*, Viṁśatiprarūpaṇī 36*a*, Viṁśatiprarūpaṇīvyākhyā 59*a*.

Complete. In Prakrit with Sanskrit equivalents.

An investigation into the nature of Prakṛti and Karma.

The transcription of this manuscript was completed on the 5th day of the bright half of the month of Caitra in the year Pramādi, 1502, of the Śālivāhana Śaka.

**Beginning:**

(प्रा.) पणमिअ सिरसा णेमिं गुणरअणविभूसणं महावीरम् ।
सम्मत्तरअणणिरअं पयडिसमुक्कित्तणं बोच्छम् ॥

(छा.) प्रणम्य शिरसा नेमिं गुणरत्नविभूषणं महावीरम् ।
सम्यक्त्वरत्ननिलयं प्रकृतिसमुत्कीर्तनं वक्ष्यामि ॥

* * * *

(प्रा.) पअडीसीळसहाओ जीवग्गाणं अणाइसंबन्दो ।
कणओपळे मळं वा ताणं दित्तं सयं सिद्दम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(छा.) प्रकृतिश्शीलं स्वभावो जीवाङ्गयोरनादिसम्बन्धः ।
कनकोपले मलमिव तयोरस्तित्वं स्वतः सिद्धम् ॥

* * *

(प्रा.) देहोदयेण सहिओ जीवो आहरदि कम्मणा कम्मम् ।
पडिसमयं सम्वग्गं तत्तायसपिण्डओं व जळम् ॥
(छा.) देहोदयेन सहितो जीव आहरति कर्मणा कर्म ।
प्रतिसमयं सर्वाङ्गैस्तप्तायसपिण्डमिव जलम् ॥

* *

प्रकृतिसमुत्कीर्तनं समाप्तम् ॥

**End:**

(प्रा.) पाणवदादिसु र(हि)दो जिणपूजामोखमग्गविग्घयरो ।
आजेयि अन्तरायं ण लहयि जय्यित्तियं जेण ॥
(छा.) प्राणवदादिषु रहितो जिनपूजामोक्षमार्गविघ्नकरः ।
अर्जयत्यन्तरायं न लभते यदीप्सितं येन ॥

**Colophon:**

इति कर्मप्रकृतिः समाप्ता ॥

---

No. **5171.** प्रकृतिसमुत्कीर्तनम्.

PRAKṚTISAMUTKĪRTANAM.

Pages, 8. Lines, 7 on a page.

Begins on fol. 33*a* of the MS. described under No. 5157.
Incomplete.
Same work as the above.

---

No. **5172.** प्रमत्ताप्रमत्तस्थानभङ्गः.

PRAMATTĀPRAMATTASTHĀNABHAṄGAḤ.

**Pages**, 3. Lines, 5 on a page.

Begins on fol. 68*a* of the MS. described under No. 5159.
Complete.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

दुगछक्कसत्तअट्ठं णवरवियं तह यचउपडिकिच्चा ।
णभमिगि च उपण हीणं बन्धस्सिअरस्स ये गूणम् ॥

अण्णदर आ उ सहि यातिरिया ऊतेच तहय अण सहिया ।
मिच्छं मिस्सं सम्मं कमेण खविदेहवे ठाणा ॥

तित्थाहारे सहिअं तित्थूणं अहय आर चउ हीणम् ।
तित्थाहारचउक्के णूणं इदि चउ पडिट्ठाणम् ॥

आदिमपञ्चट्ठाणे दुग दुग भङ्गा हवन्ति बद्धस्स ।
इयरस्सविणादं वा तिग तिग इगितिण्णितिट्ठण वा ॥

बिदियस्सविपणठाणो पणपण तिगतिण्णि चारिबद्धस्स ।
इयरस्स होन्ति णेया चउ चउ इगि चारि चत्तारि ॥

**End :**

देसति ये सुवि एवं भङ्गा एक्केक्कदेसगं सपुणो ।
पडिरासिबिदियतुरियं सादीबिदियम्मिदो भग्गा ॥

एवं प्रमत्ताप्रमत्तयोः चत्वारि स्थानानि ॥
चत्वारो भङ्गाः ॥

---

No. **5173.** **प्रमेयकण्ठिका.**

PRAMĒYAKAṆṬHIKĀ.

Substance, palm-leaf. Size, 11 × 2 inches. Pages, 41. Lines, 8 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Stabakas 1 to 4 complete, 5th incomplete.

Deals with some of the important principles of Jainism.

By Śāntivarṇa.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

श्रीवर्धमानमानम्य विष्णुं विश्वसृजं हरम् ।
परीक्षामुखसूत्रस्याद्यस्यार्थं विवृणोम्यहम् ॥

अथ स्वापूर्वार्थव्यवसायात्मकं ज्ञानं प्रमाणम् इति प्रमाणलक्षणं बाधातीतं नान्ययुक्तिशतबाधितत्वात् । ननु स्वापूर्वार्थेति लक्षणे यानि विशेषणान्युपात्तानि तानि निरर्थकानीति चेन्न; परप्रतिपादितानेकदूषण-निवारकत्वेन तेषां सार्थकत्वात् । तथाहि—किं तद्दूषणमनिष्टरूपम्? तदनिष्टाज्ञानं प्रमाणमित्युक्ते निर्विकल्पकज्ञानस्यापि प्रामाण्यं स्यादित्या-पादनमेवानिष्टमस्माकं जैनानाम् । ततस्तन्निवारकत्वेन व्यवसायविशेषणस्य सार्थकत्वम् । एवमितरेषां विशेषणानां सार्थकत्वं योजनीयम् ॥

* * * *

इति शान्तिवर्णविरचितायां प्रमेयकण्ठिकायां प्रथमस्तबकः ॥

**End:**

इति शान्तिवर्णविरचितायां प्रमेयकण्ठिकायां तुरीयस्तबकः ॥

अनेकान्तात्मकं वस्तु सर्वं साक्षात्कुर्वन्नेव सर्वज्ञो नेश्वरः; तत्र प्रमाणाभावात् ।

* * * *

तथा च नेश्वरः कर्ता शरीर(रि)त्वात् मुक्तात्मवदितिचेन्न; सिद्ध्य-सिद्धिभ्यां व्याघातात् । अथ परेष्ट्यां सिद्धो भगवान् न विद्यत इति चेत्तर्हि परेष्टिः किं प्रमाणमप्रमाणं वा? यदि प्रमाणं तर्हि तया बाध्य-मानत्वात् अनुत्थानं विपरीतानुमानस्य; अथाप्रमाणं प्रमाणं विना प्रमेयासिद्धेः किमनुमानोपन्यासेन? अथ प्रमाणं परेष्टिः, तेन विषयी-कृतस्य महेश्वरस्य निषेधस्संभवति शुक्तिरूप्यनिषेधो यथा । किञ्च ईश्वरः प्रयोजनं विना कथं प्रवर्तते? सुखस्याभावात्, धर्माभावेन निर्दुःखत्वात् । करुणया प्रवर्तत इति चेत् तर्हि परसुखदुःखप्रहाणे प्रयोजने । तथा च

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वर्गिणमेव सृजेत्; धर्माधर्मपरतन्त्रत्वात् तदनुरूपफलं प्रापयतीति चेत् तर्ह्यावश्यकत्वात्कर्मनिर्मितमेव जगद्वैचित्र्यमस्तु किमीश्वरेण? कर्मनिरपेक्षत्वे च सर्गप्रलयौ सदा स्याताम्; ज्ञानादीनां नित्यत्वात् । ततो न कर्तृत्वं परमेश्वरस्य न तस्य सर्वज्ञत्वमपि । तथाहि—महेश्वरस्सर्वज्ञो न भवति चिकीर्षादिमत्त्वात् पृथ्वीश्वरवत् । अथ सर्वज्ञः कोऽसाविति चेत्.

---

No. 5174. प्रमेयरत्नमाला—लघुवृत्तिसहिता.

PRAMĒYARATNAMĀLĀ WITH LAGHUVṚTTI.

Substance, paper. Size, 13¼ × 8⅜ inches. Pages, 89. Lines, 28 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 55*a*. The other work herein is Gaṇitasāra-saṅgraha 1*a*.

The original work is similar to the above. The author of the commentary is not known.

The subjects treated of herein are given below :—

१. प्रमाणस्वरूपोद्देशः.
२. प्रमाणेयत्तासमुद्देशः.
३. परोक्षप्रपञ्चसमुद्देशः.
४. विषयसमुद्देशः.
५. फलसमुद्देशः.
६. प्रमाणाद्याभाससमुद्देशः.

**Beginning :**

नतामरशिरोरत्नप्रभाप्रोतनखत्विषे ।
नमो जिनाय दुर्वारमारवीरमदच्छिदे ॥
अकलङ्कवचोम्भोधेरुद्दध्रे येन धीमता ।
न्यायविद्यामृतं तस्मै नमो माणिक्यनन्दिने ॥
प्रभेन्दुवचनोदारचन्द्रिकाप्रसरे सति ।
मादृशः क नु गण्यन्ते ज्योतिरिङ्गणसन्निभाः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथापि तद्वचोऽपूर्वरचनारुचिरं सताम् ।
चेतोहरं भृतं यद्वन्नद्या नवघटे जलम् ॥
वैजेयप्रियपुत्रस्य हीरपस्योपरोधतः ।
शान्तिषेणार्थमारब्धा परीक्षामुखपञ्जिका ॥

श्रीमन्न्यायपारावारस्यामेयप्रमेयरत्नसारस्यावगाहनमव्युत्पन्नैः कर्तुं न पार्यत इति तदवगाहनाय पोतप्रायमिदं प्रकरणमाचार्यः प्राह । तत्प्रकरणस्य च सम्बन्धापरिज्ञाने प्रेक्षावतां प्रवृत्तिर्न स्यादिति तत्रयानुवादपुरस्सरं वस्तुनिर्देशपरं प्रतिज्ञाश्लोकमाह—

प्रमाणादर्थसंसिद्धिस्तदाभासाद्विपर्ययः ।
इति वक्ष्ये तयोर्लक्ष्म सिद्धमल्पं लघीयसः ॥ इति ।

अस्यार्थः—अहं वक्ष्ये प्रतिपादयिष्ये । लक्ष्म लक्षणम् । किंविशिष्टं लक्ष्म? सिद्धम्; पूर्वाचार्यप्रसिद्धत्वात् । पुनरपि कथंभूतम्? अल्पम् अल्पग्रन्थवाच्यत्वात् । . . . . . . अथेदानीमुपक्षिप्तप्रमाणतत्त्वे स्वरूपसङ्ख्याविषयफललक्षणासु चतसृषु विप्रतिपत्तिषु मध्ये स्वरूपविप्रतिपत्तिनिराकरणार्थमाह—सापूर्वार्थव्यवसायात्मकं ज्ञानं प्रमाणमिति । प्रकर्षेण संशयादिव्यवच्छेदेन मीयते परिच्छिद्यते वस्तु(त)त्त्वं येन तत् प्रमाणम् ।

**End:**

क इव? परीक्षादक्षवत्; परीक्षादक्ष इव । यथा—परीक्षादक्षः स्वप्रारब्धं शास्त्रं निरूढवान्, तथाहमपीत्यर्थः ॥

अकलङ्कशशाङ्कैर्यत् प्रकटीकृतमखिलमाननिभनिकरम् ।
तत्संक्षिप्तं सूरिभिरुरुमतिभिर्व्युत्क्रमेतेन ॥

इति परीक्षामुखस्य लघुवृत्तौ प्रमाणाद्याभाससमुद्देशः षष्ठः परिच्छेदः ॥

श्रीमान् वैजयनामाभूदग्रणीर्गुणशालिनाम् ।
बदरीबालवंशालीव्योम्नि द्युमणिरूर्जितः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदीयपत्नी भुवि विश्रुतासीन्नाणाम्बनामा गुणशीलधामा ।
यां रेवतीति प्रथिताम्बिकेति प्रभावतीति प्रवदन्ति सन्तः ॥

तस्मादभूद्विश्वजनीनवृत्तिर्दानाम्बुवाहो भुवि हीरपाख्यः ।
स्वगोत्रविस्तारनभोऽशुमली सम्यक्त्वरत्नाभरणार्चिताङ्गः ॥

तस्योपरोधवशतो विशदोरुकीर्तेर्माणिक्यनन्दिकृतशास्त्रमगाधबोधम् ।
स्पष्टीकृतं कतिपयैर्वचनैरुदारैर्बालप्रबोधकरमेतदनन्तवीर्यैः ॥

**Colophon:**

इति प्रमेयरत्नमालापरनामधेयपरीक्षामुखलघुवृत्तिः समाप्ता ॥

---

## No. 5175. प्रमेयरत्नमाला—लघुवृत्तिसहिता.

### PRAMĒYARATNAMĀLĀ WITH LAGHUVṚTTI.

Substance, palm-leaf (Śrītāla). Size, 9¾ × 1⅝ inches. Pages, 138. Lines, 9 on a page. Character, Kanarese. Condition, good. Appearance, old.

Complete.

Same work as the above.

---

## No. 5176. प्रमेयरत्नमालिकाव्याख्या (न्यायमणिदीपिका).

### PRAMĒYARATNAMĀLIKĀVYĀKHYĀ (NYĀYAMAṆIDĪPIKĀ).

Substance, palm-leaf (Śrītāla). Size, 20½ × 2 inches. Pages, 238. Lines, 8 on a page. Character, Kanarese. Condition, good. Appearance, old.

Paricchēdas 1 to 6 complete.

A commentary on the Pramēyaratnamālikā.

The transcription of this manuscript is said to have been completed by Janārdana-Vijaya of Vasiṣṭha-Gōtra and pupil of Cārukīrtipaṇḍitācārya on Monday the 1st of the bright half of the month Āvaṇi in the year Plava in the Śālivāhana era 1763.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

श्रीवर्धमानमकलङ्कमनन्तवीर्यं माणिक्यनन्दियतिभाषितशास्त्रवृत्तिम् ।
भक्त्या प्रभेन्दुरचिता लघुवृत्तिदृष्ट्या नत्वा यथादि(धि)बिवृणोमि लघुप्रपञ्चम् ॥

मदज्ञानमरुन्नीतं मलमत्र यदि स्थितम् ।
तन्निष्कास्योर्मिवत्सन्तः प्रवर्तन्तामिहाब्धिवत् ॥

इह हि खलु सकलकलङ्कविकलकेवलावलोकनविमललोचनलोकितलोकालोकपरमगुरुवीरजिनेश्वररुचिरमुखसरसीरुहसमुत्पन्नसरस्वतीसरसानवरतस्मरणावलोकनसल्लापदत्ताचित्तवृत्तिः सकलराजाधिराजपरमेश्वरस्य हिमशीतलस्य महाराजस्य महास्थानमध्ये निष्ठुरकष्टवादसौष्ठवदुष्टसौगतान् चटुलघटवादादिपटिष्ठतया तारादेवताधिष्ठितदुर्घटघटवादविजयेन विघटय्य तेन राज्ञा सभ्यैस्सभासदैश्च परिप्राप्तजयप्रशस्तिः सकलतार्किकचूडामणिमरीचिमेचकितरुचिररुचिचकचकायमानचरणनखरो भगवान् भट्टकलङ्कदेवो विश्वविद्वन्मण्डलहृदयो हृदि युक्तिशास्त्रीणजगत्सद्धर्मप्रभावमबूबुधत्तमाम् । तदनु बालानुजिघृक्षुरक्षयगुणोऽक्षू(क्षी)णमोक्षलक्ष्मीकटाक्षविक्षेपनिदानपरीक्षादक्षो गुणमणिबृन्देन भव्यबृन्दमानन्दयन्माणिक्यनन्दिमुनिबृन्दारकस्तत्प्रकाशितशास्त्रमहोदधेरुद्धृत्य तदवगाहनाय पोतोपमं परीक्षामुखनामधेयमन्वर्थमुद्वहत् प्रकरणमारचयन् मुदा तदनु तत्प्रकरणस्य विशिष्टतमोऽतिस्पष्टमृष्टेष्टगीः प्रभाचन्द्रभट्टारकः प्रमेयकमलमार्तण्डनामबृहद्वृत्तिं चरीकरा(री)ति(स्म)। तद्वृत्तिग्रन्थस्य मार्तण्डमण्डलायितत्वेन सकलविद्वच्चित्तजगत्प्रकाशकत्वेऽपि बालान्तःकरणगुहाभ्यन्तरप्रकाशनसामर्थ्याभावमाकलय्य तत्प्रकाशनाय दीपिकायितां सकललोकालङ्कारयोग्यत्वतो रत्नायितप्रमेयैरारचितत्वेन प्रमेयरत्नमालेत्यन्वर्थनामोद्वहन्तीं स्वावलोकनप्रवृत्तिमतां पुंसां क्रोडीकृतघटपटादिवस्तुप्रतिबिम्बितरत्नकण्ठिकायितत्वेन वा स्वाभिधेयानि प्रमेयानि प्रकाशयन्तीं लघ्वीं वृत्तिं लघ्वनन्तवीर्याचार्यवर्यो भव्यानुग्रहकार्यसौकर्यसूक्तिसौकुमार्यो गुणगाम्भीर्यशालिवैजेयप्रियसूनुना

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हीरपाख्यवैश्योत्तमेन बदरीपालवंशव्योमद्युमणिना शान्तिषेणाध्ययनाभिलाषिणा प्रेरितस्सन् प्रारिप्सुस्तदादौ चिकीर्षितवृत्तेरविघ्नतः परिसमाप्त्यर्थं नास्तिक्यपरिहारार्थं शिष्टाचारपरिपालनार्थं पुण्यावाप्त्यर्थं च विशिष्टेष्टदेवतामभिष्टौति—नतामरेत्यादि । अत्र भूयादिति तिङन्तपदमध्याहर्तव्यम् ; तद्व्यतिरेकेण तदर्थापरिसमाप्तिः । कुतोऽपरिसमाप्तिरिति चेदाकाङ्क्षानिवृत्तेरभावादाकाङ्क्षानिवृत्तावेव हि वाक्यार्थपूर्तिः ।

**End:**

परीक्षामुखमादर्शमिति रूपकालङ्कारेणालंकृतत्वात्तमलङ्कारं तदेवं रूपयतीत्यनेनाभिव्यज्य उपमैव तिरोभूतभेदा रूपकमिष्यत इति रूपकालङ्कारलक्षणसद्भावतस्तदलङ्कारतिरोहितामुपमां दर्शयति ॥

**Colophon:**

प्रमेयरत्नमालाव्याख्या समाप्ता ॥

---

## No. 5177. प्रश्नोत्तररत्नमालिका.
## PRAŚNŌTTARARATNAMĀLIKĀ.

Pages, 8. Lines, 7 on a page.

Begins on fol. 25*b* of the MS. described under No. 5162.

Complete.

Treats of various important items bearing upon good conduct: is in the form of a dialogue between a Guru and his disciple.

**Beginning:**

प्रणिपत्य वर्धमानं प्रश्नोत्तररत्नपद्धतिं वक्ष्ये ।
नागनरामरवन्द्यं देवं देवाधिपं वीरम् ॥
नत्वा जिनेश्वरं वीरं वक्ष्ये नीतिप्रकाशकम् ।
शिष्याचार्योक्तिसंबन्धं प्रश्नोत्तरविधानकम् ॥
कः खलु नालङ्क्रियते दृष्टादृष्टार्थसाधनपटीयान् ।
कण्ठस्थितया विमलप्रश्नोत्तररत्नमालिकया ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भगवन् किमुपादेयं गुरुवचनं हेयमपि च किमकार्यम् ।
को गुरुरधिगततत्त्वः सत्त्वहिताभ्युद्यतस्सततम् ॥
त्वरितं किं कर्तव्यं विदुषा (सं)सारसन्ततिच्छेदः ।
किं मोक्षतरोर्बीजं सम्यग्ज्ञानं क्रियासहितम् ॥

**End:**

दानं प्रियवाक्सहितं ज्ञानमगर्वं क्षमान्वितं शौर्यम् ।
त्यागसहितं च वित्तं दुर्लभमेतच्चतुर्भद्रम् ॥
इति कण्ठगता विमलप्रश्नोत्तररत्नमालिका येषाम् ।
ते मुक्ताभरणा अपि विभान्ति विद्वत्समाजेषु ॥
विवेकात् त्यक्तरा[किजा]ज्येन राज्ञेयं रत्नमालिका ।
रचितामोघवर्षेण सुधियां सद[म]लङ्कृतिः ॥.

---

No. **5178.** बन्धत्रिभङ्गी.

BANDHATRIBHANGĪ.

Pages, 21. Lines, 5 on a page.

Begins on fol. 32*a* of the MS. described under No. 5159.

Complete.

Treats in Prakrit about the bondage of the soul.

**Beginning:**

प्रणम्य परमात्मानं जिनं केवलवेदिनम् ।
ओघाविस्तारयोर्वृत्तिं वक्ष्ये कर्णाटभाषया ॥
णमिऊण णेमिचंदं असहाअपराक्कमं महावीरम् ।
बन्धुदयसत्तजुत्तं ओघादेसेथअं बोच्छम् ।
सअलङ्केक्कं गेक्कं गहिआ रसविद्धरंससख्खेअम् ।
वण्णण सद्धं थअधुइ धम्मकहा होइ णिअमेण ॥
देहे अविणाभावि बन्धणसङ्घाद इदि अबन्धुदया ।
वण्णचउक्के भिण्णे गहिदे चत्तारि बन्धदये ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बन्धादेकं मिच्छं उदअं सत्तं पडुच्च तिवि हव्खु ।
दंसणमोहं मिच्छं मिस्सं सम्मत्तमिदि जाणे ॥

**End:**

सुक्के सदरचउक्कं वामंतिमबारसश्चण चयत्थि ।
कम्मे वअणाहारे बन्धस्सन्तो अणं तोअ ॥

* * *

**Colophon:**

बन्धत्रिभाङ्गी समाप्ता ॥

सण्ढापुव्वखगेधीवेदिअपुव्वखवगगुणं ठाणे ।
णहितित्थणामबन्धो तित्थयरोदव्वभावपुंवेदि ।

---

No. **5179.** रत्नकरण्डः—कर्णाटकटीकासहितः.

RATNAKARANDAH WITH KANARESE MEANING.

Substance, palm-leaf. Size, 9½ × 1¼ inches. Pages, 168. Lines, 6 on a page. Character, Kanarese. Condition, good. Appearance, old.

A manual of Jainism. Complete with a commentary in Kanarese.

The subject treated of herein are—

१. दर्शनाधिकारः.
२. सम्यग्ज्ञानाधिकारः.
३. अणुव्रताधिकारः.
४. गुणव्रताधिकारः.
५. शिक्षाव्रताधिकारः.
६. सल्लेखनाधिकारः.
७. श्रावकनिलयाधिकारः.

By Samantabhadra.

The transcription of this manuscript was completed on Wednesday the 8th of the bright half of Śrāvaṇa in the year Kāḷayukti.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

नमः श्रीवर्धमानाय निर्धूतकलिलात्मने ।
सालोकानां त्रिलोकानां यद्विच्छा दर्पणायते ॥

देशभूमिसमीचीनं धर्मं कर्मनिबर्हणम् ।
संसारदुःखतस्सत्त्वान् यो धरत्युत्तमे सुखे ॥

सद्दृष्टिज्ञानवृत्तानि धर्मं धर्मेश्वरा विदुः ।
यदीयप्रत्यनीकानि भवन्ति भवपद्धतिः ॥

श्रद्धानं परमार्थानामाप्तागमतपोभृताम् ।
त्रिमूढापोढमष्टाङ्गं सम्यग्दर्शनमस्व(व्य)यम् ॥

आप्तेनोत्सन्नदोषेण सर्वज्ञेनागमेशिनाम् ।
भवितव्यं नियोगेन नान्यथा ह्याप्तता भवेत् ॥

क्षुत्पिपासाजरातङ्कजन्मान्तकभयस्मयाः ।
न रागद्वेषमोहाश्च यस्याप्तस्स प्रकीर्त्यते ॥

परमेष्ठी परं ज्योतिः विरागो विमलः कृतिः(ती) ।
सर्वज्ञोऽनादिमध्यान्तः सार्वश्शास्तोपलाल्यते ॥

अनात्मार्थं विना रागैः शास्ता शास्ति सतो हितम् ।
ध्वनन् शिल्पिकरस्पर्शात् मुरजः किमपेक्षते ॥

आप्तोपज्ञमनुल्लङ्घ्यमदृष्टेष्टविरोधकम् ।
तत्त्वोपदेशकृत्सार्वं शास्त्रं कापथघट्टनम् ॥

विषयाशावशातीतो निरारम्भोऽपरिग्रहः ।
ज्ञानध्यानतपोरत्नः तपस्वी स प्रशस्यते ॥

**End :**

पापमरातिर्धर्मो बन्धुर्जीवस्य निश्चिन्वन् ।
समयं यदि जानीते श्रेयोज्ञाता ध्रुवं भवति ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



येन स्वयं वीतकलङ्कविद्यादृष्टिक्रियारत्नकरण्डभावम् ।
नीतस्तमायाति प्रतीच्छयैव सर्वार्थसिद्धिस्त्रिषु विष्टपेषु ॥

यः श्रावकव्रते शुद्धः परमाराधनाश्च सः ।
करोत्यन्तेऽच्युते स्वर्गे देवानामधिपो भवेत् ॥

सुखयतु सुखभूमिः कामिनं कामिनीव
सुतमिव जननी मां शुद्धशीलो भुनक्तु ।
कुलमिव गुणभूषा कन्यका सम्पुनीतात्
जिनपतिपदपद्मप्रेक्षणी दृष्टिलक्ष्मीः ॥

**Colophon:**

इति श्रीसमन्तभद्रस्वामिविरचिते रत्नकरण्डके श्रावकनिलयाधिकारः सप्तमः परिच्छेदस्समाप्तः ॥

---

No. **5180.** रत्नकरण्डकः.

RATNAKARAṆḌAKAḤ.

Pages, 46. Lines, 9 on a page.

Begins on fol. 12*b* and 25*a* of the MS. described under No. 5167.

Complete.

Same work as the above without the commentary.

---

No. **5181.** रत्नकरण्डकः.

RATNAKARAṆḌAKAḤ.

Pages, 39. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 5162.

Complete.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5182. विंशतिप्ररूपणी.

## VIṀŚATIPRARŪPAṆĪ.

Pages, 44. Lines, 7 on a page.

Begins on fol. 36*a* of the MS. described under No. 5170.

Incomplete.

Deals in Prakrit with 20 different subjects connected with Jainism : the Sanskrit equivalents of the stanzas are also given.

**Beginning :**

सिद्दं सुद्दं पणमिअ जिणेन्दवरणेमिचन्दमकळङ्कम् ।
गुणरअणभूसणुदअं जीवस्स परूपणं बोन्द(च्छ)म् ॥

सिद्धं शुद्धं प्रणम्य जिनेन्द्रवरनेमिचन्द्रमकळङ्कम् ।
गुणरत्नभूषणोदयं जीवस्य प्ररूपणं वक्ष्यामि ॥

* * * *

गुणजीवा पज्जत्ति पाणासण्णा अ मग्गणा ओ अ ।
उवजोगो वि अ कमसो विंसन्तुपरूपणा भणिअ ॥

गुणजीवौ पर्याप्तिः प्राणास्संज्ञाश्च मार्गणाश्च ।
उपयोगोऽपि च क्रमशो विंशतिप्ररूपणा भणिताः ॥

**End :**

पुरु गुणभोगे सेदे करेदि लोके हि पुरुगुणं कम्मम् ।
पुरुउत्तमो अ जम्मा तं मा सो वण्णिओ पुरुसो ॥

पुरु गुणभोगे शेते करोति लोकेषु पुरुगुणं कर्म ।
पुरुषोत्तमो हि यस्मात्तस्मात्स वर्णितः पुरुषः ॥

णेव इत्थी णेव पुमं णउंसओ उहयलिङ्गवदिरित्तो ।
इट्ठावग्गिसमाणयवेअणगुरुओ कलुसचित्तो ॥

नैव स्त्री नैव पुमान् नपुंसक उभयलिङ्गव्यतिरिक्तः ।
इष्टकाग्निसमानकवेदनगुरुकः कलुषचित्तः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



णारअतिरिअणरामरआउगमिदिचउविहो हवे आऊ ।
णाम चादा(द्दाचा)वीसपिण्डापिण्डप्पभेएण ॥
नारकतिर्यङ्मानुषामरायुरिति चतुर्भिदो भवेदायुः ।
नाम द्वाचत्वारिंशत् पिण्डापिण्डप्रभेदेन ॥

---

## No. 5183. विंशतिप्ररूपणीव्याख्या.

## VIṀŚATIPRARŪPAṆĪVYĀKHYĀ.

Pages, 110. Lines, 8 on a page.

Begins on fol. 59*a* of the MS. described under No. 5170.

A commentary on the work described under the previous number: by Padmaprabhatraividhyacakravartin.

Contains the commentary on the following Mārgaṇās:—

१. गतिमार्गणा.
२. इन्द्रियमार्गणा.
३. कायमार्गणा.
४. योगमार्गणा.
५. वेदमार्गणा.
६. संयममार्गणा.
७. लेश्यामार्गणा.
८. भव्यमार्गणा.
९. सम्यक्त्वमार्गणा.
१०. संज्ञामार्गणा.
११. आहारमार्गणा.
१२. ज्ञानमार्गणा.

**Beginning:**

णमियूण णेमिचन्दं असहायपरक्कमं महावीरम् ।
बन्दुदयसंतजत्तं ओहादेसीदयं बोध(च्छ)मु ॥

* * * *

संभेदो ओघित्तिय गुणसण्णासाचमोहजोगभवा ।
बिन्दारादीसुत्तियमङ्गणसण्णासकम्मभवा ॥

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मिण्डोसासणमिस्सो अविरदसम्मोयदीसिविरदोय ।
विरदापमत्तइदरो आघंओयाणियज्जसुहुमोय ॥

**End:**

स्याद्वादाचलकेसरी कुमतभोगक्षोणिबद्धासद(भृद्दारण):
श्रीभोगेन्दुपदारविन्दमकरन्दानन्दपुष्पन्धयः ।
सिद्धान्तामृतवार्धिवर्धनकरप्रालेयरोचिस्सदा
जीयाद्भूनुतपद्मनन्दियतिपः त्रैविद्यचक्रीश्वरः ॥

**Colophon:**

इति विंशतिप्ररूपणीव्याख्या श्रीपद्मप्रभत्रैविद्यचक्रिश्वराविरचिता समाप्ता ॥

---

No. **5184.** सज्जनचित्तवल्लभः.

SAJJANACITTAVALLABHAḤ.

**Pages,** 10. Lines, 7 on a page.

Begins on fol. 21*a* of the MS. described under No. 5162.

Complete.

On the required state of mind which really leads to freedom from the bondage of Saṁsāra.

**Beginning:**

नत्वा वीरजिनं जगत्रयगुरुं मुक्तिश्रियो वल्लभं
पुष्पेषुक्षयनीतबाणनिवहं संसारदुःखापहम् ।
वक्ष्ये भव्यजनप्रबोधजननं ग्रन्थं समासादहं
नाम्ना सज्जनचित्तवल्लभमिमं शृण्वन्तु सन्तो जनाः ॥
रात्रिश्चन्द्रमसा विनाब्जनिवहैर्नो भाति पद्माकरो
यद्वत्पण्डितलोकवर्जितसभा दन्तीव दन्तं विना ।
पुष्पं गन्धविवर्जितं मृतपतिः स्त्रीवेह तद्वन्मुनिः
चारित्रेण विना न भाति सततं यद्यप्यसौ शास्त्रवान् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



देहे निर्ममता गुरौ विनयिता नित्यं श्रुताभ्यासिता
चारित्रोज्वलता महीपसमता संसारनिर्वेगता ।
अन्तर्बाह्यपरिग्रहत्यजनता धर्मज्ञता साधुता
साधो साधुजनस्य लक्षणमिदं संसारविच्छेदनम् ॥
किं वस्त्रत्यजनेन भो मुनिरसावेतावता जायते
क्ष्वेदेन च्युतपन्नगो गतविषः किं जातवान् भूतले ।
मूलं किं तपसः क्षमेन्द्रियजयः सत्यं सदाचारता
रागादींश्च बिभर्ति चेन्न स यतिर्लिङ्गी भवेत्केवलम् ॥

**End:**

वेतालाकृतिमर्धदग्धमृतकं दृष्ट्वा भवत्थण्ट(यात्कम्प)ते
यासां नास्ति भयं त्वया समा(म)महो जल्पन्ति चेत्रत्युत ।
राक्षस्यो भुवि नो भवन्ति वनिता मामागता भक्षितुं
मत्वैवं प्रपलायतां मृतिभयात्त्वं तत्र मा स्थाः क्षणम् ॥
लब्धार्थो यदि दानधर्मविषये दातुं न यैः शक्यते
दारिद्रो(द्र्यो)पहतास्तथापि विषयाष(स)क्तिं न मुञ्चन्ति ये ।
धृत्वा ये चरणं जिनेन्द्रगदितं तस्मिन् समन्दोद्यमा-
स्तेषां जन्म निरर्थकं गतमजाकण्ठस्तनाकारवत् ॥
वृत्तैर्विंशतिभिश्चतुर्भिरधिकैस्सलक्षणेनोत्थितैः
ग्रन्थं सज्जनचित्तवल्लभमिमं श्रीमल्लिषेणोदितम् ।
कृत्वात्मेन्द्रियकुञ्जरान् समदतो रुन्धन्तु ते दुर्जयान्
विद्वांसो विषयाटवीषु सततं संसारविच्छित्तये ॥

**Colophon:**

सज्जनचित्तवल्लभस्समाप्तः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5185. सत्त्वगुणस्थानत्रिभङ्गी.
## SATTVAGUṆASTHĀNATRIBHAṄGĪ.

Pages, 18. Lines, 5 on a page.

Begins on fol. 56*a* of the MS. described under No. 5159.

Complete.

On the development of the quality of Sattva: is in Prakrit.

**Beginning:**

पञ्चणवदोण्णि अट्ठा वीसं चउरो कमेण तेण उदि ।
दोण्णिअपञ्चअ भणिआ एदाओसत्त पअडीओ ॥
तित्थाहारं जुगवं सव्वं तित्थण्णमिच्छगादिति ए ।
तस्सत्तकम्मिआणं तग्गुणठाणं ण संभवदि ॥
चत्तारि विखेत्ताइं आउगबन्धेण ओइ सम्मत्तम् ।
अणमदमहव्वदाइं णलहइ देवा उगम्मोत्तुम् ॥
णिरअतिरिख्खसुराउग सत्तेणाहि देस सअलवदिखवगा ।
अअदचउक्कं तुअणं अणिअट्टिकरणचरिमम्मि ॥

**End:**

सोमे तिहुवणमहिओ सिद्धो बुद्धो णिरञ्जणो णिच्चो ।
दिसदुवरणाणळाहं चरित्तसिद्धं समाहिञ्च ॥

* * * *

**Colophon:**

सत्त्वत्रिभङ्गी समाप्ता ॥

---

## No. 5186. सत्त्ववर्गः.
## SATTVAVARGAḤ.

Pages, 10. Lines, 5 on a page.

Begins on fol. 65*b* of the MS. described under No. 5159.

Incomplete.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

णमिऊण वड्ढमाणं कणआणिहं देवराअपरिपुज्जम् ।
पअडीणसत्तठाणं खगे भङ्गे समं बोच्छम् ॥
आउगबन्धाबन्धणभेदमकाऊणवण्णणं पढमम् ।
भेदेणअभङ्गसमं परइवणं होदि विदिअं हि ॥

**End:**

साणे पणइगि भङ्गा बद्धस्सिअरस्स चारिदो चेव ।
मिस्से पणपणभङ्गा बद्धास्सिअरस्स च उ च ऊणे आ ॥

---

No. **5187.** सप्तभङ्गीतरङ्गिणी.

SAPTABHAṄGĪTARAṄGIṆĪ.

Substance, palm-leaf. Size, $19\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 52. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

On the seven possible probabilites regarding the reality and unreality of things.

**Beginning:**

वन्दित्वा सुरसन्दोहवन्दिताङ्घ्रिसरोरुहम् ।
श्रीवीरं कुतुकात् कुर्वे सप्तभङ्गीतरङ्गिणीम् ॥

इह खलु तत्त्वार्थाधिगमोपायं प्रतिपादयितुकामस्सूत्रकारः प्रमाणनयैरधिगम इत्याह । तत्राधिगमो द्विविधः—स्वार्थः परार्थश्चेति । स्वार्थाधिगमो ज्ञानात्मको मतिश्रुतादिरूपः, परार्थाधिगमः शब्दरूपः । स च द्विविधः—प्रमाणात्मको नयात्मकश्चेति । कात्स्न्र्यतस्तत्त्वार्थाधिगमः प्रमाणात्मकः, देशतस्तत्त्वार्थाधिगमो नयात्मकः । अयं द्विविधोऽपि भेदस्सप्तधा प्रवर्तते विधिप्रतिषेधादिप्राधान्यात् । इयमेव प्रमाणसप्तभङ्गी नयसप्तभङ्गीति च कथ्यते । सप्तानां भङ्गानां वाक्यानां स-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



माहारः समूहस्सप्तभङ्गीति तदर्थः । तानि च वाक्यानि—स्यादस्त्येव घटः, स्यान्नास्त्येव घटः, स्यादस्ति नास्ति च घटः, स्यादवक्तव्य एव, स्यादस्ति चावक्तव्यश्च, स्यान्नास्ति चावक्तव्यश्च, स्यादस्ति नास्ति चावक्तव्यश्च इत्येतत्सप्तवाक्यसमूहस्सप्तभङ्गीति कथ्यते ।

**End:**

एवंरीत्या मतान्तरेष्वप्यनेकान्तप्रक्रिया . . . .
. . . . . . . ह्येति सर्वमवदातम् ॥

**Colophon:**

अनेकभङ्गैराक्रान्ता सिद्धान्ताम्बुधिसङ्गता ।
करोतु विद्वदानन्दं सप्तभङ्गीतरङ्गिणी ॥
साधारणे तुलाशुद्धद्वादश्यां भृगुवासरे ।
समाप्तिमगमत्सेयं सप्तभङ्गीतरङ्गिणी ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## RELIGION : VAIṢṆAVA.

### (a) VIŚIṢṬĀDVAITA-ŚRĪVAIṆṢAVISM.

---

No. **5188.** अङ्कुरार्पणविधिः

ANKURĀRPAṆAVIDHIḤ.

Substance, palm-leaf. Size, $15\frac{3}{4} \times 1\frac{1}{2}$ inches. Pages, 8. Lines, 6 on a page. Character, Grantha. Condition, fair. Appearance, old.

Begins on fol. 1*a*. The other work herein is Dhvaja-Lakṣaṇa 4*b*.

Wants one leaf in the beginning; otherwise complete.

Lays down the rules in connection with the ceremonial sowing of different kinds of grain as a preliminary rite to ensure the auspicious fulfilment of religious ceremonies connected with temple festivals.

**Beginning:**

. . . . . . . . . ण्डुद ।
स्तनयोः कुलवृद्धिश्च जठरे सर्वसम्पदः ॥

एवं मृदं गृहीत्वा खनिमभ्यर्च्य तस्मिन् स्थले यवादिकं निक्षिपेत् । श्रीसूक्तं भूसूक्तं शाकुनसूक्तं च पठद्भिर्ब्राह्मणैस्सह तूर्यघोषेण ग्रामप्रदक्षिणं कृत्वा, अङ्कुरार्पणमण्टपं प्रविश्य,

प्रतिष्ठाकर्मणः पूर्वमङ्कुरार्पणमारभेत् ।
न कर्म फलदं ब्रह्मन्नङ्कुरारोपणं विना ॥
तस्मादारभ्यमाणेषु कर्षणादिषु कर्मसु ।
प्रागेव वापयेद्बीजान्यङ्कुरार्थं यथाविधि ॥

**End:**

अङ्कुरेषु च पीतेषु शुक्लेषु च तथा ऋजु ।
विद्याच्छुभं प्ररूढेषु विपरीतेषु चाशुभम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कर्मार्थमङ्कुराण्यादौ यस्समारोपयेद्गुरुः ।
स एव कर्म कार्त्स्न्येन कुर्यात्प्राज्ञोऽपि नेतरः ॥

अनुजो वाथ तत्पुत्रः शिष्यो वा तत्समाचरेत् ।
ऋत्विजो वापि तत्कर्म यद्यशक्तो गुरुर्भवेत् ॥

**Colophon:**

इत्यङ्कुरार्पणविधिस्समाप्तः ॥

---

No. **5189.** अगस्त्यसंहिता.

AGASTYASAṀHITĀ.

Pages, 39. Lines, 8 on a page.

Begins on fol. 30*a* of the MS. described under No. 2433.

Adhyāyas 1 to 29.

This is one of the Saṁhitās of the Pāñcarātrāgama.

On the worshipping of Rāma, Hanūmat, etc., as laid down by the sage Agastya.

**Beginning:**

अगस्त्यो नाम देवर्षिसत्तमो गौतमीतटे ।
कदाचिद्दण्डकारण्ये सुतीक्ष्णस्याश्रमं ययौ ॥

प्रत्युज्जगाम तं भक्त्या पुष्पगन्धाक्षतोदकैः ।
पाद्यार्घ्याद्यर्हणं चक्रे तस्मै ब्रह्मविदे मुनिः ॥

सुतीक्ष्णस्तु प्रणम्याह सुखासीनं तपोनिधिम् ।
श्रीमदागमनेनाद्य जीवितं सफलं मम ॥

अद्य जन्मसहस्रेषु तपः फलति सञ्चितम् ।
कामक्रोधादिभिर्दोषैर्भूयोऽहं पीडितो मुने ॥

नाद्राक्षं सम्यगिष्ट्वापि क्रतुभिर्बहुदक्षिणैः ।
सत्पात्रे सर्वदानानि दत्वापि मुनिसत्तम ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भवाब्धेस्तरणोपायं तपस्तत्रापि दुष्करम् ।
किं करिष्याम्यहं तात क्व वा यास्यामि मे वद ॥
इत्युक्तस्सोऽब्रवीत्तेन कुम्भभूतिर्गतस्पृहम् ।
क्षणं विचार्य तत्पौर्वापर्येण मुनिपुङ्गव ॥
अस्ति वक्ष्यामि ते सर्वं रहस्यं वृषभध्वजः ।
यत्प्रत्यपादयत्पूर्वं पार्वत्यै कृपयात्मवित् ॥

अगस्त्यः—

कदाचित्पार्वती प्राह भर्तारं भक्तवत्सलम् ।
कथं मे देव निस्तारो भवाब्धेर्भवभञ्जन ॥
भवव्यामोहितास्सर्वे सद्गतिं प्राप्नुवन्ति नो ।
कामक्रोधादिभिर्दोषैः दृष्टास्तत्र पुनः पुनः ।
उत्पद्यन्ते प्रलीयन्ते पुनर्व्यामोहितास्त्वया ।
रौरवादिषु पच्यन्त पुनस्संसारिणो भुवि ॥
कर्मशेषात्प्रजायन्ते पङ्क(ङ्गव)न्धबधिरादयः ।
क्रिमिकीटादयो भूत्वा पुनस्संसारिणो भुवि ॥

* * *

**Colophon:**

इति श्रीपाञ्चरात्रे परमरहस्ये अगस्त्यसंहितायां प्रथमोऽध्यायः ॥

* * *

स्त्रीपुंनपुंसकाकाररहितः पुरुषोत्तमः ।
नरेश्वरस्सर्वरूपस्सर्ववेदमयो हरिः ॥
सर्वज्ञानमयोऽनन्तोऽनादिरानन्द उच्यते ।
अजस्मरणमात्रेण जन्मादिक्लेशभञ्जनः ॥
तस्यात्मबुद्धिस्सर्वेषां पुनरावृत्तिकर्तनी ।
नियमेनैव वर्णानां स्वाश्रमोक्तेन स प्रभुः ॥

See under the next number for the end.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5190. अगस्त्यसंहिता.
## AGASTYASAMHITĀ.

Substance, palm-leaf. Size, $13\frac{3}{4} \times 1\frac{1}{2}$ inches. Pages, 208. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 18*a*. The other works herein are Sanatkumārasaṁhitā 1*a*, Agastyasaṁhitā 69*b*.

Adhyāyas 1 to 33 complete.

Same work as the above.

See under the previous number for the beginning.

**End:**

शैवानां वैष्णवानां च षट्कर्मात्र विधीयते ।
नान्यत्साधनमस्त्येव मन्त्राद्स्माद्धनूमतः ॥
चोरव्याघ्रादिभीतानामयमेव परायणम् ।
परात्प्रभृति राज्यानां धर्षितानां परैः पुनः ॥
सन्तापा जायुना . . . . परमसैनिके ।
यात्राकाले हनूमन्तं संस्मरन् यः स्वकान्गृ(ट्टू)हान्(त्) ॥
निर्गच्छति स वेगेन इष्टार्थमधिगच्छति ।
स्वापकाले स्मरन्नित्यं चोरभीता(त्या)दिशान्तये ॥

**Colophon:**

इति श्रीपाश्चरात्रे अगस्त्यसंहितायां परमरहस्ये हनूमन्मन्त्रवैभवं नाम त्रयस्त्रिंशोऽध्यायः ॥

अगस्त्यसंहिता समाप्ता ॥

---

## No. 5191. अगस्त्यसंहिता.
## AGASTYASAMHITĀ.

Pages, 69. Lines, 7 on a page.

Begins on fol. 69*b* of the MS. described under No. 5190.

Adhyāyas 1 to 5 complete; 6th incomplete.

One of the Pāñcarātra Saṁhitās.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

अतः परं प्रवक्ष्यामि प्रासादस्य च लक्षणम् ।
प्रासादानां तु सर्वेषां प्रतिमादीर्घ(दैर्घ्य)मुच्यते ।
भूमिश्चतुर्विधा प्रोक्ता प्रासादस्य विशेषतः ।
सुपद्मा भद्रगा पूर्णा धूम्रा चेति चतुर्विधा ॥
चन्दनागरुकर्पूरकदम्बतिलकार्जुनं(नैः) ।
क्रमुकैर्नालिकेरैश्च कुशदर्भैस्समावृता ॥

**End:**

तत्र नृत्तं च गेयं च वाद्यं चैव तु कारयेत् ।
प्रतिष्ठापञ्चको ह्येष साधारणविधिस्स्मृतः ॥

**Colophon:**

इति श्रीपाञ्चरात्रेऽगस्त्यसंहितायां प्रतिष्ठापटलो नाम पञ्चमोऽध्यायः ॥

आराधनविधिं वक्ष्ये यदाह भगवान् हरिः ।
स्नानपूर्वाः क्रियास्सर्वा वैदिकास्तान्त्रिका अपि ॥

* * * *

शुद्धोदकेन वा कुर्यात् तेषां यद्वै कुशोदकम् ।
अर्घ्यं शुद्धोदकैर्वापि पूरयित्वा पृथक्पृथक् ॥
अर्चयित्वा यथान्यायं पूर्वादिक्रम.

---

No. **5192.** अगस्त्यसंहिता.

AGASTYASAṀHITĀ.

Substance, palm-leaf. Size, 14 × 1¼ inches. Pages, 40. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a* The other work herein is Viśvāmitra-saṁhitā 21*a*.

Adhyāyas 1 to 8.

One of the Pāñcarātra Saṁhitās. On the performance of certain religious rites.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



The following subjects are treated of herein.

१. गायत्रीस्वरूपकथनम्.
२. न्यासध्यानसन्ध्याविधिः.
३. न्यासध्यानसन्ध्याविधिः.
४. जपहोमप्रयोगविधिः.
५. नानाप्रयोगविधिः.
६. पूर्णाभिषेकविधिः.
७. सर्वोत्तमविधियोगः.
८. ध्यानविधियोगः.

**Beginning:**

अपरं मेरुसङ्काशं कैलासशिखरप्रभम् ।
सिद्धविद्याधरगणैः ऋषिसङ्घैस्समावृतम् ॥
कुशपुष्पपलाशाद्यैस्सर्वतो गन्धमादने ।
तन्मध्ये तं सुखासीनं तपस्स्वाध्यायतत्परम् ॥
अगस्त्यं परिपप्रच्छ नारदस्सर्वतत्त्ववित् ।
भगवन्मुनिशार्दूल सर्ववेदविदां वर ॥
गायत्रीं परमां विद्यां श्रोतुमिच्छामि तत्परः ।
नारदस्य वचः श्रुत्वा प्रयतमासी(तात्म)न्महामुने ॥
साधु पृष्टं त्वया ब्रह्मन् समाहितमनाः शृणु ।
यथाश्रुतं मया लब्धं ब्रह्मलोके पितामहात् ॥
तथैव वर्धते ब्रह्मन् समाहितमनाः शृणु ।
ततो गायत्रिमाहात्म्यमङ्गन्याससमन्वितम् ॥
शक्तिबीजं च वर्णं च तत्त्वभेदमृषिं तथा ।
देवताक्षरभेदं च ध्यानं कालत्रयात्मकम् ॥
पुरश्चर्याविधिं तद्वद्धोमकर्मविधिं तथा ।
विनियोगं ततः पश्चात्सर्वं वक्ष्येऽधुना स्त(त)था ॥

**End:**

दक्षिणे तु चतुर्हस्तं वामे च इतरत्रयम् ।
शक्तिमन्त्रं तथा चैव स्रुक्स्रुवौ दक्षिणे करे ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्यजनं तोमरं चैव घृतपात्रं तु वामके ।
स्वाहां तु दक्षिणे भागे वामे देवीं स्वधां तथा ॥
रक्तवस्त्रं तथोष्णीषं रक्तमाल्यानुलेपनम् ।
एवं ध्यात्वा समाहृष्टा(ष्टः) क्षिपेदित्थं समाहितः ॥

**Colophon:**

इत्यगस्त्यनारदसंवादे ध्यानविधियोगो नामाष्टमोऽध्यायः ॥

---

No. **5193.** अर्चादीज्याप्रभावः.

ARCĀDĪJYĀPRABHĀVAḤ.

Substance, palm-leaf. Size, 17¾ × 1⅜ inches. Pages, 144. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

The first two Paricchēdas complete.

On the importance of worshipping images of Viṣṇu.

**Beginning:**

अथेज्योपयुक्तविशेषवचनानि कानिचित्प्रदश्य(दर्श्य)लिख्यन्ते
अर्चायामधिकप्रीतिरेकान्ते हरिमर्चयेत् ।
तदभावेऽग्निहृत्सूर्यभूम्यम्बुगगनादिकम् ॥
यस्य गेहेऽन्यदेवार्चासक्तो वा न जनार्दनः ।
तस्यान्नं नैव भोक्तव्यमपि क्रतुसहस्रिणः ॥

भारते—

ब्राह्मणानां हितायैव प्रादुर्भावाः कृता मया ।
प्रादुर्भावाकृतिः काचिदर्चनीया जनाधिप ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीपाश्चरात्ररक्षायाम्—

केशवार्चा गृहे यस्य न तिष्ठति-महीपते ।
तस्यान्नं नैव भोक्तव्यमभक्ष्येण समं हि तत् ॥

**End:**

ता(का)रिकां वाप्यधीयीत द्रव्याभावे विचक्षणः ।
मनसा भावयेद्रूपं यत्तस्या यादृशं हि यत् ॥

इत्यत्र ता(का)रिकामितीज्याकरणमन्त्रोपलक्षकम् । द्रव्याणामप्यलाभे तु मन्त्रैरेव समर्चयेदित्यनिरुद्धोक्तेः अनवच्छेदात् बाह्याभ्यन्तरयागसाधारणमिदम् । प्राणाग्निहोत्रमन्त्रांस्तु विलुप्ते भोजने (त्यजे)दिति स्मृतेश्च । तस्यास्तद्वाच्याया इति यावत् । वाच्यवाचकयोरभेदोपचारः । यद्द्रव्यं यादृशं विहितमीदृशं तदपि भावयेदित्यर्थः ॥

**Colophon:**

इति द्वितीयः परिच्छेदः ॥

---

## No. 5194. अष्टाक्षरदीपिका.

## AṢṬĀKṢARADĪPIKĀ.

Substance, paper. Size, 8⅝ × 6¾ inches. Pages, 151. Lines, 15 on a page. Character, Grantha. Condition, good. Appearance, new.

Breaks off in the 8th Adhyāya.

On the sacredness and purificatory influence of the mystic eight-lettered prayer formula Ōm-Namō-Nārāyaṇāya.

**Beginning:**

श्रीमन्निखिलबोधाब्धिर्वैकुण्ठान्नारदो मुनिः ।
अम्बरीषस्य राजर्षेराजगाम गृहोत्तमम् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तमासीनं महाभागं काञ्चने परमासने ।
अर्घ्याद्यर्हणया प्रीतं वीणासक्तकराम्बुजम् ॥
अम्बुजाक्षपदाम्भोजचिन्तामृतसुनिर्वृतम् ।
प्राञ्जलिः प्रणतो भूत्वा परिपप्रच्छ भूपतिः ॥

* * *

मन्त्रास्सर्वार्थदास्सन्ति बहवो हरिवाचकाः ।
तेषां को मुनिशार्दूल भवतः परमो मतः ॥
कथं कमलपत्राक्षः पूज्यश्श्रेयोऽर्थिभिर्हरिः ।
फलं च पूजिते तस्मिन् कीदृशं जगतो गुरो ॥
कथं ध्येयो विधातॄणां विधातासावधोक्षजः ।
किंलक्षणा हरेर्भक्ताः केन तुष्यति केशवः ॥
कैर्लिङ्गैर्मङ्गलाधारैर्भक्तिमन्तो विभूषिताः ।
तद्भक्ताराधने पुंसां निन्दने च कथं फलम् ॥
एतत्सर्वं मुनिश्रेष्ठ कृपया वक्तुमर्हसि ।

**End:**

गोविन्दार्चापरा यद्वन्मोदन्ते वैष्णवे पुरे ।
तद्भक्ताराधनक्षीणकल्मषाश्च तथा नराः ॥
ये तु भक्ताननादृत्य पूजयन्ति दिनं(निजं) पदम् ।
न तेषां भगवत्पूजां स्वीकरोत्यम्बुजेक्षणः ॥
स्वाराधनं विहायापि स्वभक्तानर्चयन्ति ये ।
तेभ्यः प्रसन्नो विश्वेशस्सिद्धिमिष्टां प्रयच्छति ॥

**Colophon:**

इति श्रीमदष्टाक्षरदीपिकायां सप्तमोऽध्यायः ॥

* *

भ्रामयन्तं महादण्डं महिषस्कन्धसंस्थितम् ।
अञ्जनाचलसङ्काशं धूम्रविद्योतितप्रभम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5195. अष्टादशभेदनिर्णयः.

## AṢṬĀDAŚABHĒDANIRṆAYAḤ.

Substance, palm-leaf. Size, 14⅞ × 1¼ inches. Pages, 23. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete.

On the 18 doctrinal differences between the Teṅgalai and Vaḍagalai sects of Śrī-Vaiṣṇavas.

The work is also called Vivādārthasaṅgraha.

By Raṅganāthasūri of Vatsagōtra.

This manuscript is said to have belonged to Parama Śrīnivāsācār, son of Prasannācār of Tiruppāṟkaḍal.

**Beginning:**

अष्टादशार्थविषये द्रमिडप्रबन्धव्याख्यातृभिर्गुरुभिरुक्तमिहार्थभेदम् ।
श्रीभाष्यमुख्ययतिभूमिपतिप्रबन्धव्याख्यातृभिश्च कथितं प्रविभज्य वक्ष्ये ॥

द्रमिडाचार्यदृष्टार्थं पूर्वं वक्ष्ये यथामति ।
संस्कृताचार्यदृष्टार्थं पश्चात्सद्भिर्नियोजितः ॥

अत्र पूर्वैस्सङ्गृहीतोऽयं श्लोकः—

"भेद(:)स्वामिकृपाफलान्यगतिषु श्रीव्याप्त्युपायत्वयो-
स्तद्वात्सल्यदयानिरुक्तिवचसोर्न्यासे च तत्कर्तरि ।
धर्मत्यागविरोधयोस्स्वविहिते न्यासाङ्गहेतुत्वयोः
प्रायश्चित्तविधौ तदीयभजनेऽणुव्याप्तिकैवल्ययोः ॥

इति स्वामिकृपाफलान्यगतिषु=स्वामिकृपा च फलं च अन्यगतिश्च स्वामिकृपाफलान्यगतयः तासु विषये । भेदः । स्वामिकृपा निर्हेतुका सा साक्षात्पुरुषार्थहेतुः; तस्य परमकारुणिकत्वात् ।

**End:**

अत एव स्वात्मानुभवो नश्वर एव । अनावृत्तिं वदता भाष्ये-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



णापि न विरोधः । कूराधिपवाक्यस्यानावृत्तावेव तात्पर्यम् । एवं कल्पनं प्रमाणबलादेव ॥

"चतुर्विधा मम जना भक्ता एव हि ते श्रुताः ।
अहमेव गतिस्तेषां निराशीःकर्मकारिणाम् ॥

ये तु शिष्टास्त्रयो भक्ताः फलकामा हि ते मताः ।
सर्वे च्यवनधर्माणः प्रतिबुद्धस्तु मोक्षभाक् ॥"

इति च्यवनधर्मत्वोक्त्या कैवल्यस्य नश्वरत्वमुक्तमिति सर्वं समञ्जसम् ॥

---

No. **5196.** अष्टादशभेदनिर्णयः.

ASṬĀDAŚABHĒDANIRṆAYAḤ.

Substance, palm-leaf. Size, 16¼ × 1¼ inches. Pages, 22. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, new.

Complete.

Same work as the above.

---

No. **5197.** अष्टादशभेदनिर्णयः.

AṢṬĀDAŚABHĒDANIRṆAYAḤ.

Substance, paper. Size, 8¾ × 5¼ inches. Pages, 48. Lines, 9 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Begins on fol. 27*a*. The other works herein are Rājakālanirṇaya 1*a*, Śrībhāṣyaguruparamparā 55*a*.

Complete.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5198. अष्टादशभेदानिर्णयः.

## AṢṬĀDAŚABHĒDANIRṆAYAḤ.

Substance, palm-leaf. Size, 16¾ × 1½ inches. Pages, 16. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Begins on fol. 1*a*. The other work herein is Prapannapārijāta 19*a*.

Same work as the above, though the colophon here is different.

**Colophon :**

इति श्रीवत्सकुलतिलकश्रीनिवासाचार्यसूनो रङ्गनाथस्य कृतिषु विवादार्थसङ्ग्रहः संपूर्णः ॥

---

## No. 5199. अष्टादशरहस्यार्थविवरणम्.

## AṢṬĀDAŚARAHASYĀRTHAVIVARAṆAM.

Pages, 31. Lines, 18 on a page.

Begins on fol. 35*a* of the MS. described under No. 4882.

Complete.

An investigation into the meaning of eighteen minor religious works called Rahasyas : by Rāmānuja.

**Beginning :**

श्रीमन्महाप्रसादपरमभागवतपदपद्मकर्णिके जयतः ।

अयश्चेतनः अनादिकर्मप्रवाहेन(ण)संसारमहार्णवनिमग्नः अज्ञानेनात्मानमज्ञात्वा तेनाज्ञानेन हेतुनाहङ्कारममकारयुक्तस्सन् अहङ्कारहेतुभ्यां रागद्वेषपरवशस्सन् कारणभूताभ्यां रागद्वेषाभ्यां हेतुभ्यां पुण्यपापरूपकर्माण्याचरन् पुण्यपापरूपहेतुभिः सुखदुःखानुभवोपकरणशरीराणि बिभ्रत् तापत्रयदुःखपरम्परां निरन्तरमनुभवन् कर्मपरतन्त्रस्सन् संसरति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवं संसृतिचक्रस्थे भ्राम्यमाणे स्वकर्मभिः ।
जीवे दुःखाकुले विष्णोः कृपा काप्युपयुज्यते ॥

**End:**

गच्छतां दूरमध्वानं तृष्णामूर्च्छितचेतसाम् ।
पाथेयं पुण्डरीकाक्षनामसङ्कीर्तनामृतम् ॥

इति श्रियः पत्युः सर्वविधबन्धुत्वं ज्ञात्वा स एव निर्हेतुक उपाय इति स्थितिः ॥

**Colophon:**

इति श्रीरामानुजविरचितं सम्पूर्णमष्टादशरहस्यार्थविवरणम् ॥

---

No. **5200.** अष्टोत्तरशतदिव्यदेशनामानि.

ASṬŌTTARAŚATADIVYADĒŚANĀMĀNI.

Pages, 5. Lines, 7 on a page.

Begins on fol. 40a of the MS. described under No. 3546.

Complete.

A description of the 108 ancient and holy shrines in India dedicated to the worship of Viṣṇu

**Beginning:**

सबाह्याभ्यन्तरं देहं व्याप्य दामोदरं स्थितम् ।

* *

प्रविष्टोऽहं न मे किञ्चिद्भयं नास्ति कदाचन ।
भयं नास्ति कदा चनों नम इति ।

नारद उवाच—

देवदेव जगन्नाथ सर्वज्ञ करुणानिधे ।
श्रोतुमिच्छामि ते ब्रह्मन् विष्णुस्ता(स्था)नानि मे वद ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ब्रह्मोवाच—

अष्टोत्तरशतस्थानेष्वाविर्भूतं जगत्पतिम् ।
नमामि जगतामीशं नारायणमनन्यधीः ॥
श्रीवैकुण्ठे वासुदेवमामोदे कर्षणाह्व(यम्) ।
प्रद्युम्नं च प्रमोदाख्ये संमोदे चानिरुद्धकम् ॥
सत्यलोके तथा विष्णुं पद्माक्षं सूर्यमण्डले ।
क्षीराब्धौ शेषशयनं श्वेतद्वीपे तु तारकम् ॥

**End:**

आद्यं स्वयंव्यक्तमिदं विमानं रङ्गसंज्ञकम् ।
श्रीमुष्णवेङ्कटाद्रिं च सालग्रामं च नैमिशम् ॥
तोताद्रिपुष्करं चैव नरनारायणाश्रमम् ।
अष्ट मे मूर्तयस्सन्तु स्वयंव्यक्तं महीतले ॥

---

No. **5201.** **अहिर्बुध्न्यसंहिता.**

AHIRBUDHNYASAṀHITĀ.

Substance, paper. Size, $13\frac{1}{4} \times 8\frac{3}{8}$ inches. Pages, 67. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 67*a*. The other work herein is Vasiṣṭhasaṁhitā 1*a*.

Breaks off in the 11th Adhyāya.

One of the Pāñcarātra Saṁhitās.

**Beginning:**

अक्षरत्रितयाव्यक्तविकाराक्षादिरूपिणे ।
परव्यूहादितत्त्वाय नमश्चक्राय चक्रिणे ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदधिष्ठितां शक्तिं स(न)मस्कुरुते—

सोमसूर्यानलाकल्पामकल्पामिन्दुशेखराम् ।
पञ्चबिन्दुं हरेश्शक्तिं पञ्चकृत्यकरीं न(नु)मः ॥

आप्लुतं दिव्य . . . यामुपासीनं परं पदम् ।
भरद्वाजोऽथ पप्रच्छ दुर्वाससमकल्मषम् ॥

अत्र पदशब्देन वस्तूच्यते—" पदं व्यवसितित्राणस्थानलक्ष्म्य(क्ष्मा)ङ्घ्रिवस्तुषु "—इत्यमरः । उत्कृष्टं वस्तु नारायणमुपासीनमित्यर्थः ।

भरद्वाजः—

अनसूयाहृदानन्द-भगवन् तपसां निधे ।
अस्ति मे संशयः कश्चित्तन्मे व्याख्यातुमर्हसि ॥

अग्निष्टोमक्रिया येऽस्मिन् येऽथर्वणविनिर्णये ।
महोदयेऽस्त्रसंज्ञे च प्रवर्तकनिवर्तके ॥

लोकपालास्त्रसंज्ञे च तत्तत्सामर्थ्यसंच्युते ।
महोदयासु शक्तीषु वह्निसूर्येन्दुवर्त्मनाम् ॥

* * *

सुदर्शनाश्रयत्वं तु तत्र तत्र निरूपितम् ।
किं कृतं तस्य माहात्म्यं स्वतस्संसर्गतोऽपि वा ॥

किं तत्सुदर्शनं नाम कालश्शब्दार्थ इष्यति(ते) ।
तेन किं क्रियते कर्म जगद्व्याप्नोति तत्कथम् ॥

कियन्तः कीदृशः के च व्यूहास्तस्योदिता मुने ।
प्रयोजनं च किं तेषां व्यूहा तेषां च कीदृशी ॥

**End :**

प्रमाणव्यूह एतावान् अर्थाकारो निदर्शितः ।
सुदर्शनस्य देवस्य शब्दाकारमथो शृणु ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इति प(ा)ञ्चरात्रे अहिर्बुध्न्यसंहितायां दशमोऽध्यायः ॥

* * * *

तावत्तावद्विचारैश्च पुरुषाव्यक्तिगोचरैः ।
तत्त्वतात्त्विककल्पैश्च नानारतिविचिन्तनैः ॥

मुने कर्मविका(चा)रैश्च जातिकल्पैरनेकशः ।
ज्ञानाज्ञानसमाख्यातगुणदोषविचारणैः ॥

---

No. **5202.** आगमप्रामाण्यम्.

ĀGAMAPRĀMĀṆYAM.

Substance, palm-leaf. Size, 14¾ × 1¼ inches. Pages, 113. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Sajjana-vaibhava 58*a*.

Complete.

On the authoritativeness of the Pāñcarātrāgama: by Yāmunācārya.

**Beginning:**

यत्पदाम्भोरुहध्यानविध्वस्ताशेषकल्मषः ।
वस्तुतामुपयातोऽहं यामुनेयं नमामि तम् ॥

जगज्जन्मस्थितिध्वंसमहानन्दैकहेतवे ।
करामलकवद्विश्वं पश्यते विष्णवे नमः ॥

ये मे केचन मत्सरात्सवयसो दुर्मानसारा नरा
गम्भीरां गुणशालिनीमपि गिरां(रं) निन्दन्ति नन्दन्तु ते ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सारासारविवेककौशलदशापारे परेऽवस्थिताः
सन्तस्सन्त्यनसूयवोऽपि बहवश्शंसन्ति ये मद्गिरम् ॥

अभिनिवेशवशीकृतचेतसां बहुविदामपि सम्भवति भ्रमः ।
तदिह भागवतं गतमत्सरा मतमिदं विमृशन्तु विपश्चितः ॥

इह केचिद्य(दि)तस्ततोऽवगतकतिपयकुतर्कशकलविष्फूर्जितमनसस्त्रयीमार्गसंरक्षणव्याजेन निजविमर्शकौशलातिशयमुपदर्शयन्तः परमपुरुषविरचितनिरतिशयनिश्श्रेयसगोचरपाञ्चरात्रतन्त्रप्रामाण्ये विप्रतिपद्यन्ते ; वदन्ति च—

द्वेधा खलु प्रमाणत्वं वचसामवसीयते ।
एकं मानान्तरापेक्षमनपेक्षमथेतरत् ॥

तत्रापि,

न तावत्पुरुषाधीनरचनं वचनं क्वचित् ।
आसीदति प्रमाणत्वमनपेक्षत्वलक्षणम् ॥

पौरुषेयं हि वचः प्रमाणान्तरं प्रतिपन्नवस्तूपस्थापनायोपादीयमानं वक्तुस्तदर्थसिद्धिमनुरुध्यमानमेव प्रमाणभावमनुभवति ।

**End:**

यथा चैकायनशाखाया अपौरुषेयत्वं तथा काश्मी[र]रागमप्रामाण्यमे(ए)व प्रपञ्चितमिति । प्रकृतानां तु भागवतानां सावित्र्यनुवचनादित्रयीधर्मसम्बन्धस्य स्फुटतरमुपलब्धेर्न तत्त्यागनिमित्तव्रात्यत्वादिसन्दोहं सहत इति ॥

यत्तत्कल्पितयुक्तिभिश्शकलशः कृत्वा तदीयं मतं
यच्छिष्यैरुदमर्दि सात्त्व(त)मतस्पर्धावतामुद्धतिः ।
यच्चेतस्सततं मुकुन्दचरणद्वन्द्वास्पदं वर्तते
जीयान्नाथमुनिः स्वयोगमहिमप्रत्यक्षतत्त्वत्रयः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आकल्पं विलसन्तु सात्त्वतमतप्रस्पर्धिदुष्पद्धति-
व्यामुग्धोद्धतदुर्विदग्धपरिषद्दैदग्ध्यविध्वंसिनः ।
श्रीमन्नाथमुनीन्द्रवर्धितमनीषोन्मेषतो भूषिता-
स्सन्तस्सन्ततगद्यपद्यपदवीहृद्या ह्यवद्योक्तयः ॥

यत्पदाम्भोरुहध्यानविध्वस्ताशेषकल्मषः ।
वस्तुतामुपयातोऽहं यामुनेयं नमामि तम् ॥

रौद्रिवर्षे सिंहशुक्लनवम्यां भृगुवासरे ।
इदमागमसिद्धान्तप्रामाण्यं लिखितं मया ॥

ग्रन्थोऽयं वेदकोटीररामावरजतावतः ।
तानदासस्य नान्यस्य लेखनं तत्र विद्यते ॥

---

## No. 5203. आगमप्रामाण्यम्.

## ĀGAMAPRĀMĀṆYAM.

Substance, palm-leaf. Size, 15½ × 1⅝ inches. Pages, 112. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete.

Same work as the above.

---

## No. 5204. आगमप्रयोगविषयः.

## ĀGAMAPRAYŌGAVIṢAYAḤ.

Substance, palm-leaf. Size, 14¼ × 1⅛ inches. Pages, 8. Lines, 4 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 34*a*. The other works herein are Nāmaliṅgānuśāsana 1*a*, Dēvyaṣṭōttaraśatanāmāvali 38*a*, Siddharūpa 42*a*.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Incomplete.

On the conduct of certain religious ceremonies in temples.

**Beginning :**

अस्मद्देवायतने पादबन्धपद्मबन्धपद्मालयपद्माश्रय प्रतिक्रमाप्रतिसुन्दराप्रथमफलकाउपानज्जगतिवेदिकुमुदाकम्बपट्टिकामहापाट्टिकालवेदिकापादतोरणाताट्टिकाकुम्भपालिका.

**End :**

मुक्तालयगौरिय(रा)लयहिरण्यालयशल(त)पत्रशालसुगादा(था)शाल(लाध्य)यनशालपागा(क)शालयगशालगोशालद्वारशालद्वारपा.

---

No. **5205.** आराधनकारिका.

ĀRĀDHANAKĀRIKĀ.

Substance, palm-leaf. Size, $11\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 2. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 17*b*. The other works herein are Sudarśanahōmānukramaṇikā (with Prayōga) 1*a*, Śrīprapatti 18*a*, Bhagavatprapatti 20*a*, Tulasīnalinākṣamālāpratiṣṭhā 22*a*.

On how to perform the daily worship of God in one's own house.

**Beginning :**

स्वाचान्तस्सोर्ध्वपुण्ड्रः प्रणमनमजिनाद्यासनं चासुयामः
साङ्गन्यासो जपस्स्याद्धृदयकमलके मानसी देवपूजा ।
वामस्थं वारिपात्रं कुसुममितरतश्चान्यदग्रेऽर्घ्यपाद्या-
चामस्नानीयमर्घ्याद्धरितनुकुसुमस्वात्मनां प्रोक्षणं स्यात्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



साह्वानं चासनार्घ्यै पदसलिलमथाचामपुंसूक्तयुक्त-
स्नानं वस्त्रोपवीते मलयजकुसुमे धूपदीपौ क्रमेण ।
मध्वादी(दिः) पर्के आदावुपरि च सलिलं पायसाद्यन्नजातं
पानीयाचामपूगं परिगतिनमनोद्वासनं विष्णुपूजा ॥

**End:**

कूर्मादीन् दिव्यलोकान् तदनु मणिमयं मण्टपं तत्र शेषं
तस्मिन् धर्मादिपीठं तदुपरि कमलं चामरग्राहिणीश्च ।
विष्णुं देवीर्विभूषायुधगणमुरगं पादुके वैनतेयं
सेनेशं द्वारपालान् कुमुदमुखगणान्विष्णुभक्तान्प्रपद्ये ॥

---

## No. 5206. आराधनोत्सवसङ्ग्रहः.

## ĀRĀDHANŌTSAVASAṄGRAHAḤ.

Substance, palm-leaf. Size, $16\frac{3}{4} \times 1\frac{1}{2}$ inches. Pages, 81. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Lays down the details of divine worship as carried out in temples.

**Beginning:**

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

यस्य द्विरदवक्त्राद्याः . . विष्वक्सेनं तमाश्रये ॥

रामानुजदयापात्रं ज्ञानवैराग्यभूषणम् ।
श्रीमद्वेङ्कटनाथार्यं वन्दे वेदान्तदेशिकम् ॥

सौम्यसर्वगुणोपेतं सिद्धान्तेषु कृतश्रमम् ।
दामोदरगुरुं वन्दे नारायणपदार्चकम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सम्यगष्टाक्षरार्थज्ञं द्वादशाङ्ग(ङ्ग)प्रकाशकम् ।
हृषीकेशगुरुं वन्दे कौशिकान्वयभूषणम् ॥

पाञ्चरात्रार्थतत्त्वज्ञं दयाशान्तिगुणान्वितम् ।
वन्दे प्रद्युम्नभट्टार्यं नारायणपदार्चकम् ॥

* * * *

मृगस्थले समुत्पन्नं तदीयाराधनक्षमम् ।
सुदर्शनार्चनध्यानतत्परं च परात्परम् ॥

गोविन्दभट्टनामानं वन्दे विष्णुपदार्चकम् ।
श्रीमहीभ्यां समेताय केशवाय नमो नमः ॥

मायाविनाशिने तुभ्यं संसारार्णवसेतवे ।
सरस्वत्या समेताय ब्रह्मणे ते नमो नमः ॥

कपिलाय नमस्तेऽस्तु ततः पद्माय ते नमः ।
संवर्ताय नमस्तेऽस्तु ततः कण्वाय ते नमः ॥

* * * *

पाद्मसंहितोक्तसमाराधनविधिरुच्यते—

. . . . . . . . . . . आजानु पादावा मणिबन्धनाद्धस्तौ च प्रक्षाळ्याचम्य, सूतमागधैः प्रबोधिते भगवति द्वारपालान् प्रणम्य, प्रवेशनं याचयित्वा, तैस्सदयावलोकनैः प्रविशेति दत्तानुज्ञः, प्रादक्षिण्येन गर्भगृहद्वारदक्षिणपार्श्वमासाद्य, षडङ्गन्यासं कृत्वा, ताळत्रयं कृत्वा, घण्टां नादयन् ओं यं वायवे नम इति कवाटमुद्घाट्य, मूलमन्त्रेण दक्षिणाङ्घ्रिणान्तः प्रविश्य, जितं त इति भगवन्तं प्रणम्य,

**End:**

द्यौश्शान्तिरन्तरिक्षश्शा(क्षꣳशा)न्तिः पृथिवीशान्तिरापश्शान्तिरोषधयश्शान्तिर्वनस्पतयश्शान्तिश्शान्तिरेव शान्तिः । ओं शतधारं सहस्रधारम्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अपरिमितधारमच्छिद्रमक्लिष्टमक्षयमनन्तमरिष्टमच्युतं परमं पवित्रं भगवान् वासुदेवः पुनातु.

स्थानानि देशा(ते या)नि सहस्रबाहो वरेण्यनामा(मन्) विरजांसि नाम ।
तेभ्यो नमस्ते मधुसूदनाय तत्राभिमानं सर(परि)रक्ष सन्नोम् ॥

इति प्रोक्षयेत् ॥

---

## No. 5207. आशीर्वादः.

## ĀŚĪRVĀDAḤ.

Substance, palm-leaf. Size, 14⅝ × 1⅝ inches. Pages, 8. Lines, 5 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 31*a*. The other work herein is Mahānyāsa 1*a*.

Wants beginning and end.

A treatise containing benedictory sayings pronounced on auspicious occasions.

**Beginning:**

अनवरताग्निहोत्रदर्शपूर्णमासा[वा]ग्रयणेष्टिचातुर्मास्यज्योतिष्टोमातिरात्राप्तोर्यामवाजपेयपौण्डरीकादिमहाध्वरदीक्षामहोत्सवसमयोक्ताध्वर्यूद्गातृब्रह्मत्वादि . . . सन्तोषितजानकीरघुनन्दनौ च भूयास्तामिति . न्तु ।

**End:**

सौदामिनीपुञ्जसन्निभानेकधातुपरिमण्डितशातकुम्भपरिखचितपरार्धवितानपङ्क्तिशोभितचन्द्रशालासमन्वितसुधाशनाधीशमुखसुरालयसमाकुलप्रबलतण्डु(कण्डू)लभुजपारिजातरूपमणिपुञ्जपरिकल्पितविविधप्रा.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. **5208.** ईश्वरसंहिता.

ĪŚVARASAṀHITĀ.

Substance, paper. Size, 13 × 8¼ inches. Pages, 244. Lines, 25 on a page. Character, Grantha. Condition, good. Appearance, new.

Adhyāyas 1 to 15.

One of the Saṁhitās included in the Pāñcarātrāgama. It deals with the various ceremonies connected with the celebrations of festivals in temples.

**Beginning :**

नमस्सकलकल्याणदायिने चक्रपाणये ।
विषयार्णवमग्नानां समुद्धरणहेतवे ॥
नारायणपदाम्भोजसमाराधनलालसाः ।
वेदवेदाङ्गनिपुणास्तपोनिष्ठा महर्षयः ॥
इतिहासपुराणज्ञा धर्मशास्त्रविशारदाः ।
भगवद्भक्तिनिरताश्शमादिगुणसागराः ॥
नारायणं तपस्यन्तं नरनारायणाश्रमे ।
संसेवन्तस्सदा भक्त्या मोक्षोपायविवित्सवः ॥
संस्थिता मुनयस्सर्वे नारायणपरायणाः ।
कालेन केनचित्स्वर्गान्नारायणदिदृक्षया ॥
तत्रावतीर्य देवर्षिर्नारदस्सकुतूहलः ।
दृष्ट्वा नारायणं देवं नमस्कृत्य कृताञ्जलिः ॥
पुळकाञ्चितसर्वाङ्गः प्रहृष्टवदनो मुनिः ।
स्तुत्वा नानाविधैस्स्तोत्रैः प्रणम्य च मुहुर्मुहुः ॥
पूजयामास तं देवं नारायणमनामयम् ।
अथ नारायणो देवस्तमाह मुनिपुङ्गवम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मुनयो ह्यत्र तिष्ठन्ति प्रार्थयाना हरेः (पदम्) ।
एतेषां सात्त्वतं शास्त्रमुपदेष्टुं त्वमर्हसि ॥

इत्युक्त्वान्तर्दधे श्रीमान्नारायणमुनिस्तदा ।
तच्छ्रुत्वा भगवद्वाक्यं मुनिर्हृष्टतनूरुहः ॥

तदाज्ञां कर्तुकामोऽथ निर्जगाम मुनीश्वरः ।
अपश्यदाश्रमवरमृषीणामूर्ध्वरेतसाम् ॥

* * *

एष प्रकृतिधर्माख्यो वासुदेवैकगोचरः ।
प्रवर्त्यते कृतयुगे ततस्त्रेतायुगादिषु ॥

विकारवेदास्सर्वत्र देवतान्तरगोचराः ।
महतो वेदवृक्षस्य मूलभूतो महानयम् ॥

स्कन्धभूता ऋगाद्यास्ते शाखाभूताश्च योगिनः ।
जगन्मूलस्य वेदस्य वासुदेवस्य मुख्यतः ॥

प्रतिपादकता सिद्धा मूलदेवाख्यता द्विजाः ।

**End :**

प्रायश्चित्तेषु कार्येषु सर्वाण्येतानि कल्पयेत् ।
तेषां स्नपनभेदं तु वक्ष्याम्युपरि विस्तृतम् ॥

स्नपनानां विधानं तु दिव्यशास्त्रोक्तवर्त्मना ।
यथावत्कथितं सम्यक् किमन्यच्छ्रोतुमिच्छथ ॥

**Colophon :**

इति श्रीपाञ्चरात्रे ईश्वरसंहितायां स्नपनविधिर्नाम पञ्चदशोऽध्यायः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. 5209. उपेन्द्रसंहिता.

UPĒNDRASAMHITĀ.

Substance, palm-leaf. Size, 15⅛ × 1¼ inches. Pages, 59. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, new.

Incomplete.

Adhyāyas 1 to 8.

On certain religious observances of the Śrī-Vaiṣṇavas.

The leading of a virtuous life in Śrīraṅgam is particularly commended here.

**Beginning :**

एकदा तु समासीना मुनयश्शौनकादयः ।
नारदं परिपप्रच्छुर्नैमिशरण्यमाश्रिताः ॥
भगवन् सर्वतत्त्वज्ञ सर्वशास्त्रविशारद ।
सर्वागमार्थसारज्ञ पुराणस्मृतिपारग ॥
श्रीपाञ्चरात्रपाथोधिपरिशीलनतत्पर ।
महर्षे त्वं समर्थोऽसि संसारभयमोचने ॥
पुरा श्रुता विशेषेण कृतत्रेतादिसंश्रु(श्रि)ताः ।
चातुर्वर्ण्यसमाचारा गतयश्च तदाश्रिताः ॥
एकान्तिनां समाचाराः परमैकान्तिनामपि ।
स्वर्गादिगतयः प्रोक्ताः तथा नैश्श्रेयसी गतिः ॥
तत्तद्युगानुसारेण तत्तद्वर्णाश्रमाश्रिताः ।
कथिता धर्मवैगुण्यात्तेषां ह्रासाभिवृद्धयः ॥
पूर्णः प्रोक्तः कृते धर्मः त्रेतायान्तु त्रिपादवान् ।
द्वापरे त्वर्धमात्रेण कलौ पादेन कीर्तितः ।
कामः क्रोधश्च लोभश्च मदो मोहस्तथैव च ॥

* * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एते कलिगुणाः प्रोक्ता वर्धन्ते च दिनेदिने ।
तथापि सुलभा मुक्तिरिति संक्षेपतः पुरा ॥

* * *

इत्युक्तेषु मुनिश्रेष्ठेष्वसौ बुद्धिमतां वरः ।
देवर्षिर्नारदः श्रीमानिदमाह तपस्विनः ॥

शृण्वन्तु ऋषयस्सर्वे भवन्तस्संशितव्रताः ।
श्रोतव्यमखिलं भक्त्या सावधानेन चेतसा ॥

पुरा देवसभामध्ये समासीनं जगत्पतिम् ।
उपेन्द्रं जगतामीशं कण्वः प्राञ्जलिरब्रवीत् ॥

* * *

**Colophon :**

इत्युपेन्द्रसंहितायामुत्तरभागे कण्वप्रश्ने प्रथमोऽध्यायः ॥

**End :**

ततः श्रीवेदचूडार्यगोष्ठीमध्यप्रवेशितः ।
श्रीभाष्यकालक्षेपैकनिरतो नितरां मुने ॥

द्रमिडागमभाष्यार्थपरिशीलनतत्परः ।
सत्संप्रदायनिरतः सदनुष्ठानतत्परः ॥

वेदान्तगुरुपादाब्जभ्रमरीकृतमानसः ।
वसित्वा रङ्गनगरे कंचित्कालं महामुनिः ॥

वेदचूडार्यकृपया गमिष्यति परां गतिम् ।

**Colophon :**

इति उपेन्द्रसंहितायाम् अष्टमोऽध्यायः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5210. उपेन्द्रसंहिता.

## UPĒNDRASAṀHITĀ.

Substance, palm-leaf. Size, 18 × 1⅜ inches. Pages, 48. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Adhyāyas 1 to 8.

Incomplete.

Same work as the above.

---

## No. 5211. ऊर्ध्वपुण्ड्रमहिमा.

## ŪRDHVAPUṆḌRAMAHIMĀ.

Pages, 5. Lines, 10 on a page.

*Begins on fol. 19*a* of the MS. described under No. 3119.

Wants beginning and end.

A collection of stanzas from various Purāṇas and Smṛitis on putting on, on the forehead, the tridental marks which form the distinguishing outward sign of the Śrī-Vaiṣṇavas.

**Beginning:**

देवतान्तरभक्तो वा समबुद्धिरथापि वा ।
नास्तिको वेदहीनो वा न प्रतिष्ठां समाचरेत् ॥

आग्नेयपुराणे—

पञ्चायुधानि धार्याणि भक्तिश्रद्धोपबृंहितैः ।
ललाटे मूर्ध्नि हृद्बाह्वोरेकत्रैकं पृथक् पृथक् ॥
ललाटे तु गदा धार्या मूर्ध्नि चापं ततः परम् ।
नन्दके चैव हृन्मध्ये शङ्खचक्रे भुजद्वये ॥ इत्यादि ।

गारुडपुराणे—

अग्निनैव(सु) संयुक्तं विष्णुचक्राङ्कितं वपुः ।

* * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ब्रह्मचारी गृहस्थो वा वानप्रस्थोऽथ भिक्षुकः ।
अवश्यं धारयेत्पुण्यमूर्ध्वपुण्ड्रं तु शोभनम् ॥

वृद्धवसिष्ठः—

ऊर्ध्वपुण्ड्रं मृदा धार्यं यतीनां च विशेषतः ।
भस्मचन्दनगन्धादीन् वर्जयेद्यावदायुषम् ॥

**End:**

ऊर्ध्वपुण्ड्रस्य मध्ये तु अन्यद्द्रव्यं न धारयेत् ।
हरिद्रां धारयेच्चूर्णं(सर्वे)पापैः प्रमुच्यते ॥

विष्णुधर्मोत्तरे—

अभिषिक्तं तथा चूर्णं कुर्यात्.

---

No. **5212.** ऊर्ध्वपुण्ड्रविधिः.

ŪRDHVAPUṆḌRAVIDHIḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 4*a* of the MS. described under No. 2433.

Complete.

A tract dealing with the mode of putting on the Ūrdhvapuṇḍra, the Mantras to be uttered in connection therewith, etc.

**Beginning:**

(ललाटे)सततं देव्या श्रिया सह विराजितम् ।
चतुश्चक्रं नमस्यामि केशवं कनकप्रभम् ॥

अमृतोद्भवया देव्या समाश्लिष्टमथोदरे ।
नारायणं घनश्यामं चतुश्शङ्खं नमाम्यहम् ॥

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ श्रीवराहरूपिणं भगवन्तं प्रणम्य सनत्कुमारः पप्रच्छ—अधीहि भगवन्नूर्ध्वपुण्ड्रविधिम् । किं द्रव्यम्? कियत् स्थानम्?

**End:**

यो वेदविद्ब्रह्मचारी गृहस्थो वा यतिश्च स सर्वेभ्योऽघेभ्यो मुक्तो भवति । आ चक्षुषः पङ्क्तिं पुनाति
सम्यग्ज्ञानं लब्ध्वा तद्विष्णोः परमं पदमवाप्नोति । न च पुनरावर्तते न च पुनरावर्तत इति—इत्याह भगवान् वराहरूपी ॥

---

No. **5213.** कपिञ्जलसंहिता.

KAPIÑJALASAṀHITĀ.

Substance, palm-leaf. Size, $17\frac{7}{8} \times 1\frac{1}{2}$ and $16\frac{1}{8} \times 1\frac{1}{2}$ inches. Pages, 152. Lines, 9 and 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Adhyāyas 1 to 19, 22 to 24, complete; 25th incomplete.

A Saṁhitā of the Pāñcarātrāgama: given as narrated by Kapiñjala to Kāśyapa.

**Beginning:**

मेरुशृङ्गे महापुण्ये नानारत्नोपशोभिते ।
सिद्धविद्याधराकीर्णे नानागन्धर्वसेविते ॥

नानादेवसमाकीर्णे गजसिंहसमावृते ।
यक्षकिन्नरनागाद्यैर्बहुभिश्च समावृते ॥

* * *

तस्मिञ्छृङ्गे समासीनमुद्यादित्यसन्निभम् ।
कपिञ्जलं मुनिश्रेष्ठं सर्वविद्याविशारदम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वेदवेदाङ्गतत्त्वज्ञमात्मज्ञानपरायणम् ।
वेदार्थवेदिनं विप्रं वासुदेवपरायणम् ॥

विनयेनोपसङ्गम्य काश्यपो वदतां वरः ।
प्रणम्य शिरसा भूमौ पप्रच्छेदं जगद्धितम् ॥

ऋग्यजुस्सामाथर्वादिवेदविज्ञानलक्षणम् ।
कपिञ्जल महाप्राज्ञ श्रुतं सर्वं मयानघ ॥

न श्रुतं पञ्चरात्राख्यं शास्त्रं विष्णुमुखोद्गतम् ।
श्रोतुमिच्छामि विप्रेन्द्र साकारोपासनं च यत् ॥

तच्छास्त्रं विस्तरेणैव वक्तुमर्हसि मेऽनघ ।

कपिञ्जलः—

साधु साधु महाप्राज्ञ काश्यप द्विजसत्तम ॥

यत्पृष्टं तु त्वयेदानीं तच्छृणुष्व वदामि ते ।
शतोत्तराष्टभेदेन वासुदेवमुखान्मुने ॥

पूर्वं श्रुतानि शास्त्राणि ब्रह्मणा शङ्करेण च ।
तानि तन्त्राण्यशेषाणि सकाशाद्ब्रह्मणः पुनः ॥

श्रुतानि तं समागम्य मार्कण्डेयेन धीमता ।
मार्कण्डेयान्मया तानि तन्त्राणि द्विजसत्तम ॥

शतोत्तराष्टभेदेन श्रुतान्यत्र पुरा तथा ।
अष्टोत्तरशतेष्वेषु तन्त्रेषु सकलेषु च ॥

सारमुद्धृत्य वक्ष्यामि शृणुष्वैकमना(नोऽ)धुना ।

काश्यपः—

कति भेदास्तु तन्त्राणां नामधेयानि कानि वा ॥
वक्तुमर्हसि विप्रेन्द्र यदि तुष्टोऽसि मे प्रभो ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कपिञ्जलः—

अष्टोत्तरसहस्राणि अष्टोत्तरशतानि च ॥
पञ्चरात्राणि तन्त्राणि सन्ति विष्णोर्महामुने ।
सर्वेषां पञ्चरात्राणां वक्ता नारायणस्स्वयम् ॥

तन्मूर्तिभेदाः श्रोतार ऋषयश्च तपोधनाः ।
अत एव प्रमाणानि पञ्चरात्राणि काश्यप ॥
श्रुतिमूलानि तान्येव विष्णोः प्रीतिकराणि वै ।

* * *

**Colophon :**

इति श्रीपाञ्चरात्रे कपिञ्जलसंहितायां तच्छास्त्रानुक्रमणं नाम प्रथमोऽध्यायः ॥

आचार्यलक्षणं वक्ष्ये समासाच्छृणु सुव्रत ।
ब्राह्मणीयोनिजं शुद्धे नियतं ब्रह्मवादिनम् ॥

आत्मज्ञमनघं शान्तं नारायणपरायणम् ।
जगदुत्पत्तितत्त्वज्ञं स्थितिसंहारवेदिनम् ॥

**End :**

इति श्रीपञ्चरात्रे कपिञ्जलसंहितायां पुष्पयागविधानं नाम चतुर्विंशोऽध्यायः ॥

* * *

तदेवं कारयेद्योगं वाहनं द्विजसत्तमः ।
पटस्य लक्षणं वक्ष्ये ध्वजदण्डस्य लक्षणम् ॥
दुकूलं पट्ट.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5214. कपिञ्जलसंहिता.

## KAPIÑJALASAṀHITĀ.

Substance, palm-leaf. Size, $16\frac{3}{8} \times 1\frac{1}{8}$ inches. Pages, 310. Lines, 10 on a page. Character, Grantha. Condition, injured. Appearance, old.

Incomplete. The leaves are ill-arranged.

Same work as the above.

---

## No. 5215. कश्यपोत्तरसंहिता.

## KAŚYAPŌTTARASAṀHITĀ.

Substance, palm-leaf. Size, $17\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 177. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 9*a*. The other work herein is Purāṇavacanāni 1*a*.

Adhyāyas 18 to 31. There are two Adhyāyas reckoned as the 29th Adhyāya, and two Adhyāyas reckoned as the 31st Adhyāya.

Deals with the religious duties to be performed by various Śrī-Vaiṣṇavas.

**Beginning:**

तक्षकः—

भगवन् सर्वधर्मज्ञ सर्वशास्त्रविशारद ।
वर्णान्वर्णाश्रमाचारान्वक्तुमर्हसि मे प्रभो ॥

काश्यपः—

वर्णाश्रमांस्तु तद्धर्मान् शृणु वक्ष्यामि पन्नग ।
ब्राह्मणः क्षत्रियो वैश्यश्शूद्रश्चेति प्रकीर्तिताः ॥
वर्णाः क्रमेण चत्वारो ब्रह्मणा परिकीर्तिताः ।
तेषां चतुर्णां वर्णानां ब्राह्मणो गुरुरुच्यते ॥
चत्वार आश्रमा प्रोक्ताः क्रमेणैतान् श्रृणुष्व मे ।
ब्रह्मचर्याश्रमः पूर्वं गृहस्थाख्यस्ततः परम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वानप्रस्थाश्रमः पश्चात्सन्न्यासस्तु तुरीयकः ।
चत्वार आश्रमास्त्वेते ब्राह्मणस्य प्रकीर्तिताः ॥
क्षत्रियस्य त्रयः प्रोक्ता द्वौ वैश्यस्य प्रकीर्त्तितौ ।
शूद्रस्यापि च सम्प्रोक्तौ द्वावेकः पक्षभेदतः ॥
विवाहमात्र एकस्स्याद्गार्हस्थ्यब्रह्मचर्यके ।
द्वौ वानप्रस्थगार्हस्थ्यब्रह्मचर्याणि च त्रयः ॥

**End:**

श्रीकृष्णमूर्तेर्देव्योश्च शङ्खचक्रयुगस्य च ।
तदाराधनपात्राणां घण्टायाश्च विशेषतः ॥
प्रतिष्ठा प्रोक्षणविधिस्सम्यगुक्ता मयाधुना ।
किमन्यच्छ्रोतुकामोऽसि वद पन्नगसत्तम ॥

**Colophon:**

इति कश्यपोत्तरसंहितायां वर्णाश्रमकाण्डे भगवत्प्रतिष्ठाप्रोक्षणसुदर्शन-पाञ्चजन्यपात्रादिप्रतिष्ठाप्रोक्षणविधिर्नाम द्वात्रिंशोऽध्यायः ॥

---

No. **5216.** कश्यपोत्तरसंहिता.
KAŚYAPŌTTARASAṀHITĀ.

Pages, 80. Lines, 7 on a page.

Begins on fol. 102*a* of the MS. described under No. 2833.

Adhyāyas 25 to 32.

Same work as the above.

---

No. **5217.** कश्यपोत्तरसंहिता.
KAŚYAPŌTTARASAṀHITĀ.

Substance, palm-leaf. Size, $16\frac{1}{8} \times 1\frac{3}{8}$ inches. Pages, 68. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, new.

Begins on fol. 1*a*. The other work herein is Tithinirṇaya 35*a*.

Adhyāyas 19 to 29.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5218. कश्यपोत्तरसंहिता.

## KAŚYAPŌTTARASAṀHITĀ.

Substance, palm-leaf. Size, 11¼ × 1 inches. Pages, 15. Lines, 7 on a page. Character, Grantha Condition, good. Appearance, old.

Begins on fol. 9*a*. The other work herein is Viṣṇusaṁhitā 1*a*.

29th Adhyāya only complete.

Same work as the above.

---

## No. 5219. कारिकादर्पणः.

## KĀRIKĀDARPAṆAḤ.

Pages, 153. Lines, 20 on a page.

Begins on fol. 21*a* of the MS. described under No. 4459.

Complete.

A commentary on the Sanskrit stanzas found in the Rahasyatrayasāra of Vēdāntācārya: by Varadakavi, a disciple of Śrīnivāsārya, son of Varadācārya of Ātrēyagōtra.

**Beginning:**

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

गुरुभ्यस्तद्गुरुभ्यश्च नमोवाकमधीमहे ।
वृणीमही(हे) च तत्राद्यौ दम्पती जगतां पती ॥

नाभिपङ्कजनीडस्थवेधःकीरगिरोत्सुकौ ।
नमामि प्रणवस्यार्थौ दम्पती जगतां पती ॥

वन्देऽहं निगमान्तार्यचरणाम्भोरुहद्वयम् ।
यद्रेणवो नृणां मुक्तिनिर्माणपरमाणवः ॥

विगाहे निगमान्तार्यविष्णुपादसमुद्भवाम् ।
रहस्यत्रयसाराख्यां त्रिस्रोतसमकल्मषाम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आत्रेयवरदाचार्यमस्मदाचार्यमाश्रये ।
सर्वज्ञस्सम्प्रदायं यो बालिशं मामशिक्षयत् ॥

आत्रेयश्रीनिवासार्यसुतोऽहं वरदः कविः ।
रहस्यत्रयसारस्य व्याकुर्वे कारिकाः क्रमात् ॥

जगति निगमचूडाचार्यवाचां रहस्यं
निधिमिव जननान्धो निर्भयस्साहसिक्यात् ।

प्रकटयितुमसाध्ये सम्प्रवृत्तोऽस्मि यद्वा
प्रतिभुव इव तन्मे देशिका दर्शयन्ति ॥

तत्र भ[ग]वान् वेदान्ताचार्यो निखिलजगदुज्जीवनाय श्रीरहस्यत्रय-साराख्यं मोक्षशास्त्रं प्रणिनाय । तत्र चासौ प्रथममावश्यकतया गुरु-परम्परामा भगवत्तो ज्ञेयां प्रकाश्य अनादिकालं संसरतो जीवस्य कदा-चिदीश्वरसौहार्दयादृच्छिकसुकृतादिप्रणाळ्या देशिककरुणाकटाक्षविषयत्वेन भगवत्प्राप्त्युपायान्वय इत्युपोद्घातमारचय्य, गुरूपसदनादनन्तरमपि बहु-वेदितव्यप्रमाणेषु सत्स्वपि सारतमांशबोधाय प्रवृत्तिर्युक्तेति प्रतिपाद्य, श्रीमद्रामानुजदर्शनेऽस्मिन्प्रतितन्त्रसिद्धान्तासिद्धान् कांश्चिदसाधारणानर्थान् समर्थ्य, तदनु मुमुक्षूणामवश्यं ज्ञेयमर्थपञ्चकमभिधाय, चिदचिदीश्वर-स्वरूपाणि विशदीकर्तुं तत्त्वत्रयाधिकारं प्राक्रमत ।

* * * *

शङ्काद्वयमपि धर्मभूतज्ञानप्रतिबन्द्या परिहरन् कारिकारूपेण निबध्य दर्शयति—धियः स्वयंप्रकाशत्वमिति ।

अस्यार्थः—

धियो धर्मभूतज्ञानस्य स्वयंप्रकाशत्वं बद्धे संसारिजीवे । कदाचित् विषयाप्रकाशनदशायाम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

तस्मादिहामुत्र च तत्पादावाचार्यपादौ शरणमिति प्राप्यं प्रापक-मिति देशिका यामुनादयो विदुः । अत्र परत्र चापि नित्यं यदीय-चरणौ शरणं मदीयमिति समुपदिष्टवन्तः । तस्मादाचार्यचरणावेव शरण-मिति सर्वदा न्यस्तभरैः प्रपन्नैस्सुखेन वर्तितव्यमिति भावः ॥

**Colophon:**

इति श्रीमदात्रेयवरदाचार्यचरणाम्बुजचञ्चरीकस्य तत्सुतश्रीनिवासार्य-करुणैकजीवनस्य वरदकवेः कृतिषु कारिकादर्पणे सम्प्रदायप्रक्रियाभाग-स्तुरीयः ॥

कारिकादर्पणस्सम्पूर्णः ॥

---

## No. 5220. कारिकादर्पणः.
## KĀRIKĀDARPAṆAḤ.

Substance, palm-leaf. Size, 17 × 1½ inches. Pages, 66. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 77*a*. The other works herein are Divyasūriprōktagāthāvalīvarṇana (Maṇipravāḷa) 1*a*, Rahasyatrayasārasaṅgrahaślōkavyākhyā (Maṇipravāḷa) 21*a*.

From Arthapañcakādhikāra to the end.

By Varadācārya.

Same work as the above.

---

## No. 5221. कूरेशविजयः.
## KŪRĒŚAVIJAYAḤ.

Substance, palm-leaf. Size, 12 × 1¼ inches. Pages, 29. Lines, 6 on a page. Character, Grantha. Condition, fair. Appearance, old.

Begins on fol. 1*a*. The other work herein is Kūrēśavijayavyākhyā 16*a*.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Complete.

On the relative superiority of Viṣṇu to Śiva: by Kūrēśa generally known as Kūrattāḻvār.

This author is said to have maintained his view successfully in the court of a Cōla king.

**Beginning:**

गायत्र्या बोधितत्वाद्दशरथतनयस्थापितारधितत्वा-
च्छौरेः कैलासयात्राव्रतमुदिततयाभीष्टसन्तानदानात् ।
नेत्रेण स्वेन साकं दशशतकमलैर्विष्णुना पूजितत्वा-
त्तस्मै चक्रप्रदानादपि च पशुपतिस्सर्वदेवप्रकृष्टः ॥

* * * *

वैशिष्टे(ष्ट्ये) योनिपीठायितनरकरिपुश्लिष्टभावेन शम्भोः
स्वस्यैवार्धप्रतीकायितहरिवपुषालिङ्गितत्वेन यद्वा ।
अप्राधान्याद्विशिष्टाद्वयसमधिगमे दानवानामरातेः
स्थाणोः प्राधान्ययोगादपि च पशुपतिस्सर्वदेवप्रकृष्टः ॥

इति पूर्वपक्षश्लोकसङ्ग्रहः ।

पञ्चविंशतिकक्ष्याभिरुपन्यस्ते परे मते ।
सार्धया शतदूषण्या सिद्धान्तं वक्ति कूरराट् ॥

गायत्र्या बोधितत्वादित्यत्र एकादशभिर्हेतुभिस्समाधत्ते गायत्रीपूर्वं कृत्येति द्वाभ्यां श्लोकाभ्याम्—

गायत्रीपूर्वकृत्याचमनविधिपुरस्स्नानसङ्कल्पकार्ये
गोविन्दाख्याप्रयोगाद्धरिरिति कथनाच्छ्रुत्यधीत्यादिकाले ।
भर्गश्शब्दस्य सूर्यात्मकहरिमहसोर्वाचकत्वात्पुरस्ता-
दोङ्काराख्येयभावादवननिजगुणाच्छुद्धसत्त्वाश्रयत्वात् ॥
प्रख्याताशेषदेवप्रणमनविषयत्वात्तपोयज्ञकर्म-
स्तोमन्यूनाधिकत्वप्रशमपटिमवद्दिव्यनामस्मृतित्वात् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ब्रह्मण्यत्वाद्गिरीशाहुतिविधिषु जलस्पर्शनाद्विष्णुपादा-
ज्जाताम्भोधारितत्वादपि न पशुपतिर्विष्णुरेव प्रकृष्टः ॥

**End:**

नित्यं वैशिष्ट्यरूपाद्द्वयमतवचनायुक्तभावाद्विशिष्टा-
द्वैतस्य स्वाङ्गलिङ्गाविरतयुततया चक्रिणो युक्तमुक्तेः ।
मुक्तेः स्यादप्रसङ्गाद्भवत उभयथा चिद्विवर्तापवर्गा-
युक्तत्वादेव शक्तेरपि न पशुपतिर्विष्णुरेव प्रकृष्टः ॥
कूरेन्द्रेणेति साध्यै(र्धै)स्सदसि च वि(शत)विधैर्दूषणैस्सप्तरात्रं
वादे लुप्ता विपक्षाः प्रतिवचनजडा विस्मयान्तानवा(न्मौनमा)पुः ।
तं दृष्ट्वा जैत्रघोषं वि(व्य)तनुत स महापूर्णनामार्यवर्यः
श्रुत्वा चैतत्तदानीं समजनि विमनाश्चोळभूपस्सभृत्यः ॥

**Colophon:**

कूरेशविजयं(यस्)सम्पूर्णम्(:) ॥

---

## No. 5222. कूरेशविजयः.
## KŪRĒŚAVIJAYAḤ.

Substance, palm-leaf. Size, $13\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 13. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Kūrēśavijaya-vyākhyā 7*b*.

Complete.

Same work as the above.

---

## No. 5223. कूरेशविजयः.
## KŪRĒŚAVIJAYAḤ.

Pages, 7. Lines, 30 on a page.

Begins on fol. 1*a* of the MS. described under No. 4907.

Wants 5 stanzas in the beginning.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5224. कूरेशविजयः.
## KŪRĒŚAVIJAYAḤ.

Substance, palm-leaf. Size, 17⅞ × 1⅛ inches. Pages, 5. Lines, 6 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Begins on fol. 95*a*. The other works herein are Śrīstava 1*a*, Śrīstutivyākhyā 11*a* and 38*a*, Śrīstavavyākhyā 84*a*, Yathōktakāristōtra 98*a*.

Wants beginning.

Same work as the above.

---

## No. 5225. कूरेशविजयः.
## KŪRĒŚAVIJAYAḤ.

Substance, palm-leaf. Size, 9 × 1⅝ inches. Pages, 26. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, new.

Almost complete.

Same work as the above.

---

## No. 5226. कूरेशविजयः.
## KŪRĒŚAVIJAYAḤ.

Pages, 24. Lines, 6 on a page.

Begins on fol. 30*a* of the MS. described under No. 4979.

Complete.

Same work as the above.

---

## No. 5227. कूरेशविजयव्याख्या.
## KŪRĒŚAVIJAYAVYĀKHYĀ.

Pages, 33. Lines, 30 on a page.

Begins on fol. 4*b* of the MS. described under No. 4907.

Complete.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



A commentary on the Kūrēśavijaya of Kūranātha : by Dharmācāryasudhī.

**Beginning:**

श्रियः पतित्वादपि भूपतित्वं प्रख्यापयित्वा परमं मुरारेः ।
भूमिस्थले भूपतिनामनिष्ठां वंशप्रतिष्ठां महतीमवाप ॥

धर्माचार्यसुधीस्सोऽयं निर्मोति विदुषां मुदे ।
विष्णुपारम्यपद्यानां प्रमाणमणिसम्पुटम् ॥

पत्युः पशूनां परतां पद्यैः पञ्चभिरावृताम् ।
निराकरोति कूरेशो बुधसङ्ख्यागतैस्तु तैः ॥

पञ्चविंशतिकक्ष्याभिरुपन्यस्ते मते परैः ।
सिद्धान्तं वक्तुमारेभे सप्रमाणं स कूरराट् ॥

सार्धया शतदूषण्या सिद्धान्तं वक्ति कूरराट् ॥

श्रीकूराधिपवाक्यानां व्याख्याने भुवि कः प्रभुः ।
तत्प्रसादस्तु(दात्तु) लेखिन्या मयालिख्यत तत्स्वयम् ॥

भग(व)द्रामानुजार्यशिष्यावतंसाः श्रीमन्महापराशरभट्टारकपदप्रशंसाः श्रीमद्वेदमार्गप्रतिष्ठापनाचार्योभयवेदान्तनिष्ठागरिष्ठा अनन्तकल्याणगुणपरिपूर्णाः श्रीवत्साङ्कमिश्राः चोळभूपालसभायां सप्तरात्रमतिमात्रं परतत्त्ववादे प्रवृत्ते कैश्चिन्मोहशास्त्रशङ्काकलङ्कितहृदयैः कुदृष्टिभिरुपन्यस्तान् हेत्वाभासान् प्रत्यादिशन्तो दृश्यन्ते—गायत्रीति ।

"गायन्तं त्रायते यस्माद्गायत्री तेन कथ्यते, न गायत्र्याः परो मन्त्रः, ब्रह्मवर्चसकामस्तु गायत्रीं वेद मातरम् ।" इत्यादिप्रमाणप्रसिद्धिमत्यां गायत्र्याम् । तत्पूर्वा या कृत्या क्रिया सन्ध्यारूपा तस्यां च । "कृत्या क्रियादेवतयोः" इति नानार्थः ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

यद्वेति । वैशिष्ट्यप्रसङ्गमेवान्यथा कथयति—पार्वत्याः स्वाङ्गार्धप्रदानात् हरिहरनाथावतारशेषाङ्गार्धस्य केशवाय दानादेव उभयथा वैशिष्ट्याभावात् शम्भोरशरीरत्वप्रसिद्धेश्च । परमरहस्यमाकृष्याह भवतस्तव मते उभयथापि शक्तेर्नित्यशक्तेर्भूतचित्स्वरूपापवर्गायुक्तत्वादेव न पशुपतिर्विष्णुरेव प्रकृष्ट इति निश्चयः ॥

कूरेन्द्रेणेति सार्धैस्सदसि शतविधैर्दूषणैस्सप्तरात्रं
वार(द्)क्षिप्ता विपक्षाः प्रतिवचनजडा विस्मयान्मौनमापुः ।
तद्दृष्ट्वा जैत्रघोषं व्यतनुत सुमहापूर्णनामार्यवर्यः
कृत्वा चैतत्तदानीं समजनि विमनाश्चोळभूपस्समन्त्री ॥

इति सङ्ख्यानन्तरश्लोक(:) स्फुटार्थः ॥

**Colophon:**

कूरेशविजयस्स(व्याख्यानं स)म्पूर्णः(म्) ॥

---

No. **5228.** कूरेशविजयव्याख्या.

KŪRĒSAVIJAYAVYĀKHYĀ.

Pages, 47. Lines, 6 on a page.

Begins on fol. *1a* of the MS. described under No. 4979.

Complete.

Same work as the above.

---

No. **5229.** कूरेशविजयव्याख्या.

KŪRĒSAVIJAYAVYĀKHYĀ.

Substance, palm-leaf. Size, $15\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 78. Lines 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5230. कूरेशविजयव्याख्या.
## KŪRĒŚAVIJAYAVYĀKHYĀ.

Pages, 76. Lines, 6 on a page.

Begins on fol. 16*a* of the MS. described under No. 5221.

Incomplete.

Same work as the above.

---

## No. 5231. कूरेशविजयव्याख्या.
## KŪRĒŚAVIJAYAVYĀKHYĀ.

Pages, 31. Lines, 8 on a page.

Begins on fol. 7*b* of the MS. described under No. 5222.

Incomplete.

Same work as the above.

The commentator's prefatory stanzas are wanting in this manuscript.

---

## No. 5232. कूरेशविज्ञापनम्.
## KŪRĒŚAVIJÑĀPANAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 2*a* of the MS. described under No. 5048.

Complete.

A cryptic message in three stanzas sent by Kūrattāḻvār to a distant correspondent. The message bears upon the doctrines of Śrīvaiṣṇavism, while apparently relating to Pāṇini's grammar.

**Beginning:**

तिस्रोऽष्टका आयानाख्या धीविशेषवतां नृणाम् ।
तत्र पश्चिमं पूर्वं मां नह्यत्यन्ताय मध्यमः ॥

अस्यार्थः—

अष्टका अष्टाक्षराध्येतारः । धीविशेषवतां नृणां स्वरूपोपायपुरुषार्थवतां नृणाम् । तिस्रः आख्याः स्वरूपनिष्ठः, उपायनिष्ठः, पुरुषार्थनिष्ठश्चेति त्रीणि नामानि आयान् प्रापुः अङ्गीचक्रुरित्यर्थः । तत्र तेषां मध्ये ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

हे पश्चिम दैष्टिक यतिवर । पूर्वं प्रथममास्तिकं मां मध्यमः नास्तिकः कृमिकण्ठः । अन्ताय नाशाय नश्यति बध्नाति अहं किं करवाणि, भवत्सेवा मां कदा सेत्स्यतीति भावः ॥

No. **5233.** क्रियाप्रदीपः.

KRIYĀPRADĪPAḤ.

Substance, paper. Size, 8⅜ × 6½ inches. Pages, 147. Lines, 17 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 25*a*. The other work herein is **Śrīkākuḷakṣētramāhātmya** 1*a*.

Incomplete.

Deals with certain purificatory ceremonies to be conducted in the Dēvarājasvāmi temple at Conjeeveram.

**Beginning:**

श्रीदेवराजस्वामिनः पश्चिमाभिमुखस्य चतुराव(र)णयुक्तस्य मन्दिरस्य परिवारार्चनप्रयोगो वक्ष्यते । गर्भगृहद्वारे आयुश्शाखायां [मि]शक्त्यै नमः, दक्षिणशाखायां वाग्देव्यै नमः, परिश्रियै नमः, उत्तरशाखायां रत्यै नमः ।

**End:**

पुण्याहवाचनप्रयोगो वक्ष्यते । विष्णुगाय्त्र्या गलन्तिकां प्रक्षाल्य प्रणवेनाम्बुपूरितां कृत्वा.

No. **5234.** गुरुपरम्परास्तोत्रम्.

GURUPARAMPARĀSTŌTRAM.

**Pages**, 4. Lines, 11 on a page.

Begins on fol. 118*a* of the MS. described under No. 1873.

Complete.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Stanzas in praise of a certain line of Gurus to be repeated before one gets branded on the upper part of the right and left arm with the metallic medals representing Viṣṇu's discus and conch respectively.

**Beginning:**

क्रमप्याद्यं गुरुं वन्दे कमलागृहमेधिनम् ।
प्रवक्ता छन्दसां वक्ता पञ्चरात्रस्य यस्स्वयम् ॥
सहधर्मचरीं शौरेस्संमन्त्रितजगद्धिताम् ।
अनुग्रहमयीं वन्दे नित्यमज्ञातनिग्रहाम् ॥
वन्दे वैकुण्ठसेनान्यं देवं सूत्रवतीसखम् ।
यद्वेत्रशिखरस्पन्दे विश्वमेतद्व्यवस्थितम् ॥
यस्य सारस्वतस्रोतो वकुलामोदवासितम् ।
श्रु(ती)नां विश्रमायालं शठारिं तमुपास्महे ॥

**End:**

लक्ष्मीकुमारतातार्यं सर्वतन्त्रविशारदम् ।
श्रीवेङ्कटोपपदवद्वरदार्यं गुणाकरम् ॥
श्रीवेङ्कटार्यवेदान्तरामानुजगुरूत्तमौ ।
श्रीवीरराघवं श्रीमद्वेङ्कटं वरदं गुरुम् ॥
वेदान्तलक्ष्मणगुरुं वेङ्कटं वरदं गुरुम् ।
वेदान्तलक्ष्मणगुरुं प्रणमामि गुरून् क्रमात् ॥

अस्मद्गुरुपरम्पराभ्यो नमः ॥

---

## No. 5235. गुरुपरम्परास्तोत्रम्.

## GURUPARAMPARĀSTŌTTRAM.

Pages, 6. Lines, 8 on a page.

Begins on fol. 57*b* of the MS. described under **No. 2833.**

Complete.

**Same work as the above.**

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5236. गृहार्चाप्रतिष्ठाविधिः (मूलम्).

## GṚHĀRCĀPRATIṢṬHĀVIDHIḤ (ORIGINAL).

Substance, palm-leaf. Size, 13⅝ × 1¼ inches. Pages, 2. Lines, 5 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 22*a*. The other works herein are Gṛhārcāpratiṣṭhāvidhi 1*a*, Yajñōpavītapratiṣṭhādhāraṇa 23*a*, Pūrvācāryattaniyan 29*a*, Pañcasaṁskāravidhi 33*a*, Śūdrapañcasaṁskāra 35*a*, Gṛhārcāsaṁprōkṣaṇavidhi 42*a*, Gāruḍōpaniṣad 44*a*, Vaiṣṇavōtsava 47*a*, Pañcagavyavidhi 51*a*, Taṭākapratiṣṭhāvidhi 52 and 65*a*, Gṛhyaratna 58*a*, Saṁprōkṣaṇavidhi 68*a*.

Incomplete.

On the various preliminary religious ceremonies to be performed in connection with the consecration of divine images of Viṣṇu for purposes of worship in houses.

**Beginning :**

श्रीभगवानुवाच—

गृहार्चास्थापनं वक्ष्ये शृणु नारद तत्त्वतः ।
उत्तरायणकाले तु शुक्लपक्षे शुभे दिने ॥

पुण्यर्क्षतिथिवारेषु प्रतिष्ठां वै समाचरेत् ।
प्रतिष्ठादिवसात्पूर्वे पञ्चमे सप्तमेऽह्नि वा ॥
स्वसूत्रोक्तविधानेन कारयेदङ्कुरार्पणम् ।

**End :**

आदधीत शुभामर्चां सर्वसम्पत्करां(रीं)पराम् ।
अन्यूनानतिरिक्ताङ्गां सर्वाङ्गेषु निरीक्ष्य ते(च) ॥

ऊर्ध्वदृष्टिमधोदृष्टिं तिर्यग्दृष्टिं विवर्जयेत् ।
पार्श्वदृष्टिर्विनाशस्स्य(।)दधो(दृष्ट्या यशःक्षयः) ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5237. गृहार्चाप्रतिष्ठाविधिः.

### GṚHĀRCĀPRATIṢṬHĀVIDHIḤ.

Substance, palm-leaf. Size, 17 × $1\frac{3}{8}$ inches. Pages, 37. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 24*a*. The other work herein is Śrīraṅgarājastava 1*a*.

Complete.

Similar to the above. This is found in the Paramasaṁhitā.

**Beginning:**

श्रीभगवानुवाच—

गृहार्चनविधौ विष्णुं प्रतिष्ठाप्य समर्चयेत् ।
भोगकैवल्यसिद्ध्यै च स्वकुलोद्धारणाय च ॥

अप्रतिष्ठितबिम्बस्य पूजनं सिद्धिहानिकृत् ।
बिम्बं मन्त्रमयं कृत्वा तस्मिन् देवं समर्चयेत् ॥

**End:**

नित्यार्चनं ततः कुर्याद्यावज्जीवमतन्द्रितः ।
महोत्सवं त्रिदिवसं कुर्याद्भक्त्यनुसारतः ॥

**Colophon:**

इ . . . (पर)मसंहितायां विष्णुप्रतिष्ठाविधिस्समाप्तः ॥

---

## No. 5238. गृहार्चाप्रतिष्ठाविधिः.

### GṚHĀRCĀPRATIṢṬHĀVIDHIḤ.

Pages, 17. Lines, 10 on a page.

Begins on fol. 132*a* of the MS. described under No. 1873.

Complete.

Similar to the above. This is said to be according to the Pañcarātra of Śaunaka.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

. . . गृहार्चाप्रतिष्ठानुक्रमणिका—

प्रतिष्ठादिवसात्पूर्वे पञ्चमे सप्तमे वा दिवसे रात्रौ सुप्रक्षाळितपाणिपादः स्वाचान्तश्शुचौ देशे विप्रानुज्ञापूर्वकं विष्वक्सेनाराधनं कृत्वा, प्राणानायम्य, श्रीगोविन्देत्याद्यस्यां शुभतिथौ अस्य श्रीभगवतो देवदेवस्य श्रीभूमिनीळासमेतस्य प्रतिष्ठाकर्म करिष्य इति सङ्कल्प्य, पुनः प्राणानायम्य, श्रीगोविन्देत्याद्यस्यां शुभतिथौ प्रतिष्ठाकर्माङ्गमङ्कुरार्पणं कृत्वा सुरक्षितं गोपायेत् । ततः

शिल्पिहस्तात्समादाय सम्यग्बिम्बं (परी)क्षयेत् ।
समदृष्टिं प्रसन्नास्यां सुरूपां शुभलक्षणाम् ॥
अर्चां संस्नाप्य मृत्तोयैस्सलिलेष्वधिवासयेत् ।
ऊर्ध्वदृष्टिमधोदृष्टिं तिर्यग्दृष्टिं च वर्जयेत् ॥
ऊर्ध्वदृष्ट्या वित्तनाशः अधोदृष्ट्या यशःक्षयः ।
तिर्यग्दृष्ट्या वयोनाशस्तस्माद्ग्राह्या समेक्षणा ॥

**End:**

एकमुहूर्तं जलाधिवासः । एकमुहूर्तं धान्याधिवासः । ततो नेत्रोन्मीलनादिप्रतिष्ठाकर्मप्रोक्षणदिवसा . . . . . मे सप्तमे वा दिवसे पालिकोद्वासनं कुर्यात् ॥

**Colophon:**

इति पाञ्चरात्रे शौनकीये गृहार्चाप्रतिष्ठाविधिस्समाप्ता(प्तः) ॥

---

No. **5239.** गृहार्चाप्रतिष्ठाविधिः.

GṚHĀRCĀPRATIṢṬHĀVIDHIḤ.

Substance, palm-leaf. Size, 15½ × 1½ inches. Pages, 11. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 20*a*. The other works herein are Pañca-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



saṁskārakāla 1*a*, Smṛtivacanāni 1*b*, Bahubiṁbapūjāvidhi 3*a*, Darśapūrṇamāsasthālīpāka 5*a*, Adhyayanahōma 8*a*, Sudarśanahōmaprayōgānukramaṇikā 13*b*, Varṇanyāsa 15*a*, Rajasvalāphala 16*a*, Sandhyāvandanavidhi 25*b*, Tulasīpadmākṣamālikāpratiṣṭhā 28*a*, Śrīcūrṇapratiṣṭhā 29*b*, Snānavidhi 32*b*, Anuṣṭhānavidhi (maṇipravāla) 36*a*, Gṛhārcāsamprōkṣaṇavidhi 37*a*, Sudarśanādipratiṣṭhā 40*a*, Gṛhārcāpratiṣṭhā 45*b*, Nṛsiṁhāṣṭōttaraśatanāmāvali 52*a*, Ūnamāsikanirṇaya 54*a*, Strīśūdrapañcasaṁskāravidhi 55*a*.

Complete.

Same work as the above.

---

## No. 5240. गृहार्चाप्रतिष्ठाविधिः.

## GṚHĀRCĀPRATIṢṬHĀVIDHIḤ.

Substance, palm-leaf. Size, $6\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 31. Lines, 7 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Yatisaṁskāra 17*a*.

The work contains both Vidhi and Prayōga.

Incomplete.

Similar to the above. Lays down the rules as given in the Parāśarasaṁhitā.

**Beginning :**

श्रीपराशरसंहितायाम्—

गृहार्चनविधौ विष्णुं प्रतिष्ठा(प्य)समर्चयेत् ।
भोगकैवल्यसिध्यर्थं स्वकुलोद्धारणाय च ॥

अप्रतिष्ठितबिम्बस्य पूजनं सिद्धिहानिकृत् ।
बिम्बं मन्त्रमयं कृत्वा तस्मिन्देवं समर्चयेत् ॥

उत्तरायणकाले तु शुक्लपक्षे विधीयते ।
स्थापनं देवदेवस्य गृहेष्वालयकेष्वपि ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

ततः पुरुषसूक्तेन इन्द्रादिब्रह्मपर्यन्तैः कल(शोदकैर)भिषिच्य स्वर्णचूर्णविमिश्रितं हरिद्राचूर्णं तुलसीद(लयुक्त)मभिषेचयेत् । ततो नालिकेराम्भसाभिषिच्य शुद्धो . . . . . . . . शं नो वातः पवताम्.

---

No 5241. गृहार्चाप्रतिष्ठाविधिः.

GṚHĀRCĀPRATIṢṬHĀVIDHIḤ.

Pages, 13. Lines, 6 on a page.

Begins on fol. 45*b* of the MS. described under No. 5239.

Complete.

Same work as the above.

---

No. 5242. गृहार्चाप्रतिष्ठाविधिः.

GṚHĀRCĀPRATIṢṬHĀVIDHIḤ.

Pages, 41. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 5236.

Complete.

Similar to the above.

**Beginning:**

कृत्वाङ्कुरं मृत्स्नपनं जलाधिवासं च पर्यग्निकपञ्चगव्यम् ।
मृत्स्न(ा)पनप्रार्थनपुण्यनान्दीमुखादिकं कङ्कणबन्धनं च ॥

* * * *

सृष्टिप्रतिष्ठानवधान्यदर्शनस्नानार्चनावाहनमत्र कृत्वा ।
समन्त्रमर्घ्यादिनवाष्टकुम्भस्नानाद्यलङ्कारनिवेदनं चरेत् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रयोगः—

आचार्यः पादौ प्रक्षाल्याचम्य, प्राणानायम्य, सङ्कल्प्य, विष्वक्सेनं संपूज्यास्यां तिथौ अस्य श्रीदेवदेवस्य श्रीमन्नारायणस्य प्रतिष्ठोत्सवकर्म करिष्यामि ।

**End:**

प्रतिष्ठासीति देवेशं स्वस्थाने विनिवेशयेत् ।
ततो नित्यार्चनं कुर्यात् यथाशास्त्रमतन्द्रितः ॥
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

* * * *

**Colophon:**

गृहार्चाप्रतिष्ठाविधिस्समाप्ता(प्तः) ॥

---

## No 5243. गृहार्चासम्प्रोक्षणविधिः.

GṚHĀRCĀSAṀPRŌKṢAṆAVIDHIḤ.

Substance, palm-leaf. Size, 7⅝ × 1 inches. Pages, 16. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Lays down the various religious ceremonies to be performed when from any cause the images of God kept in temples or in houses become in any manner injured.

**Beginning:**

सम्प्रोक्षणविधिं वक्ष्ये देवालयविधौ हरेः ।
येन सम्प्रोक्ष्य(क्षि)ते बिम्बे सन्निधत्ते सदा हरिः ॥
पूर्वस्थापितबिम्बस्य न पुनस्स्थापितं स्मृतम् ।
स्थापने तु महादोषस्तस्य सम्प्रोक्षणं स्मृतम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अङ्गभङ्गादिसंस्थाने प्रतिष्ठां पुनराचरेत् ।
जलाधिवासरहितं नेत्रोन्मीलनवर्जितम् ॥
खनने चाग्निदाहे च चिरलुप्ते तु पूजने ।
चण्डालसूतिकोदक्याशवपातकदूषिते ॥
विण्मूत्रश्लेष्मसंस्पर्शे सम्प्रोक्ष्यैव समर्चयेत् ।
अन्यथा निष्फला पूजा महान् दोषस्स जायते ॥

**End:**

मूलमन्त्रेण शतं हुत्वा, अग्निं परिषिच्य, उपस्थानं कृत्वा, विष्वक्सेनपूजायां देवाग्रे गुरुमर्चयेत् ॥

**Colophon:**

इति शौनकीये सम्प्रोक्ष(ण)विधि(:)समाप्तः ॥

---

No. **5244.** गृहार्चासंप्रोक्षणविधिः.
GṚHĀRCĀSAṀPROKṢAṆAVIDHIḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 42*a* of the MS. described under No 5236.

Complete.

Same work as the above.

---

No. **5245.** गृहार्चासंप्रोक्षणविधिः.
GṚHĀRCĀSAṀPRŌKṢAṆAVIDHIḤ.

Substance, palm-leaf. Size, 9⅓ × 1¼ inches. Pages, 7. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol 76*a*. The other works herein are Mudrārākṣasa 1*a*, Viṣṇusahasranāma 27*a*, Śrīguṇaratnakōśavyākhyā 46*a*, Yadugirīśastuti 56*a*, Nārāyaṇavarman 65*a*, Śēṣasaṁhitā 68*a*, Śrīpādatīrthagrahaṇa 79*a*.

Complete.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5246. गृहार्चासंप्रोक्षणविधिः.

## GṚHĀRCĀSAṀPRŌKṢAṆAVIDHIḤ.

**Pages**, 7. Lines, 6 on a page.

Begins on fol. 37*a* of the MS. described under No. 5239.

Complete.

Same work as the above.

---

## No. 5247. गृहार्चासम्प्रोक्षणविधिः.

## GṚHĀRCĀSAṀPRŌKṢAṆAVIDHIḤ.

**Pages**, 6. Lines, 11 on a page.

Begins on fol. 128*b* of the MS. described under No. 1873.

Complete.

Similar to the above. This is according to the Pāñcarātra of Śaunaka.

**Beginning :**

पाद्मे बिम्बप्रतिष्ठाकालनिर्णयः—

अयने चोत्तमं प्रोक्तमुत्तरायणमत्र तु ।
जङ्गमस्थापने चैव दक्षिणायनमेव च ॥
प्रायश्चित्तनिमित्तादौ सर्वकालं प्रकल्पयेत् ।

* * * *

स्थापनं प्रोक्षणं चैव शास्त्रोक्तं सम्प्रकल्पयेत् ।
दग्धवारं दग्धयोगं तिथिदग्धं तु वर्जयेत् ॥
तिथिवारानुसारेण देवस्य स्थापकस्य च ।
स्थानस्य राज्ञो राष्ट्रस्य स्थापनप्रोक्षणादिषु ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

श्रीसूक्तभूसूक्ताभ्यां प्रत्यृचं हुत्वा प्रायश्चित्ताद्युपस्थानान्तं कृत्वा भगवन्तं स्तोत्रैस्स्तुत्वा सेनेशादींश्च संपूज्याचार्याय दक्षिणां दत्वा वैष्णवांश्च भोजयेत् ॥

**Colophon:**

इति श्रीपाञ्चरात्रे शौनकीये गृहार्चासम्प्रोक्षणविधिस्समाप्ता(प्तः) ॥

---

No. **5248.** जन्माष्टमीजयन्तीश्रीरामनवम्यादिनिरूपणम्.

JANMĀṢṬAMĪJAYANTĪŚRĪRĀMANAVAMYĀDI-NIRŪPAṆAM.

Substance, palm-leaf. Size, $15\frac{7}{8} \times 1\frac{3}{8}$ inches. Pages, 92. Lines, 6 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Brahmasaṁhitā 47*a*.

Complete

On how to fix the date of the anniversary of the birthdays of Śrī-Kṛṣṇa and Śrī-Rāma

**Beginning:**

बृन्दावनचरं वन्दे बृन्दारकनिषेवितम् ।
जयन्तीसम्भवं कृष्णं जयन्तीपूजकप्रियम् ॥
श्रीपराङ्कुशनाथार्ययामुनार्यमुनीन्मुदा ।
नत्वा लक्ष्मणयोगीन्द्रान्निगमान्तगुरूनपि ॥
वेदान्तलक्ष्मणमुनीन् ज्ञानवैराग्यभूषणान् ।
जन्माष्टमीजयन्त्योस्तु स्वरूपादि निरूप्यते ॥
अनन्तरं च श्रीरामनवम्यादिनिरूपणम् ।
क्रियते भगवत्प्रीत्यै विदुषां प्रीतये तथा ॥

अत्र दशनिर्णयकालनिर्णयस्मृतिसङ्ग्रहकालप्रकाशिकादिषूपात्तवचनान्येवोदाह्रियन्ते—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र वक्ष्यमाणलक्षणा जयन्तीभिन्ना जन्माष्टमी सर्वैरप्युपोषितव्या । तथा कालनिर्णयस्मृतिसङ्ग्रहदशनिर्णयादावुदाहृतवचनम्—

केवलेनोपवासेन तस्मिञ्जन्मदिने मम ।
सप्तजन्मकृतात्पापान्मुच्यते नात्र संशयः ॥ इति ॥

**End:**

मर्पणमन्त्रस्तु—

अज्ञानतिमिरान्धस्य व्रतेनानेन . . . ।
. . . सुमुखो नाथ ज्ञानदृष्टिप्रदो भव ॥
कृष्ण कृष्ण कृपालो त्वमगतीनां गतिर्भव ।
संसारार्णवमग्नानां प्रसीद मधुसूदन ॥

इति मन्त्रद्वयं जपित्वा . . . . . . हरये निवेदयेत् ॥

इति सर्वं निरवद्यम् ॥

कारितेत्थं भगवता स्वप्रीत्यै विदुषां प्रिया ।
अस्मत्कृतिरियं श्रीशपादयोर्विनिवेशिता ॥

---

## No. 5249. जीर्णोद्धारः.

## JĪRṆŌDDHĀRAḤ.

Substance, palm-leaf. Size, $17\frac{7}{8} \times 1\frac{3}{8}$ inches. Pages, 24. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, new.

Begins on fol. 16*a*. The other works herein are Sāttvikabrahmavidyāvilāsa 1*a*, Bhūparīkṣādi 28*a*, Pratiṣṭhāprayōga 38*b*.

Complete.

Deals with the various religious ceremonies to be conducted when old and fallen temples are repaired, or newly built, or when the divine images in the temples are renewed or replaced.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

ब्रह्मोवाच—

प्रतिमानां तथा धाम्नां जीर्णानां भगवन्नहम् ।
उद्धारं श्रोतुमिच्छामि तन्मे ब्रूहि यथातथम् ॥

श्रीभगवान्—

स्वायम्भुवार्षदिव्येषु मानुषेषु चतुर्ष्वपि ।
अङ्गहानौ रत्नजेषु तत्तज्जाम्बूनदैः पुनः ।

**End :**

विधिवच्च समाधाय सिञ्चेत्सर्वेण मूर्धनि ।
ततः पूर्वोक्तविधिना पूजयेत्पुरुषोत्तमम् ॥

---

No. **5250.** तत्त्वदीपः.

TATTVADĪPAḤ.

Substance, palm-leaf. Size, 17⅜ × 1½ inches. Pages, 107. Lines, 9 on a page. Character, Grantha. Condition, fair. Appearance, old.

Complete.

A work investigating the meaning of Aṣṭākṣaramantra, Dvayamantra and Caramaślōka: by Saumyajāmātṛmuni.

**Beginning :**

वेदान्तवेद्यं गुरुभिस्सुगुप्तमन्त्रद्वयं श्लोकमुखं रहस्यम् ।
(यस्तत्त्वदीपात्सुपथश्चकार तं सौम्यजामातृमुनिं प्रपद्ये) ॥

अस्मद्गुरुभ्यस्तेषां च गुरुभ्यो विदधे नमः ।
निदधे च शिरस्यादिगुरोः पादौ श्रियःपतेः ॥

अस्मद्गुरुदया[या]यातयतीन्द्राङ्गीकृतान्वयः ।
लभेय लब्धविज्ञानो लक्ष्मीपतिपदद्वयम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मन्त्रद्वयोत्तमश्लोकविषयोऽर्थविवेचकः ।
गुरुस्नेहदशारूढस्तत्त्वदीपः प्रकाश्यते ॥
तत्रार्थतत्त्वमाचार्योद्यथामति यथाश्रुतम् ।
वर्ण्यते मननार्थाय मतो ह्यर्थः स्थितो भवेत् ॥

अयं जीवात्मा स्वयं नित्यनिर्मलज्ञानानन्दैकस्वरूपस्वाभाविकज्ञातृत्वकर्तृत्वभोक्तृत्वस्वरूपधर्मो भगवदायत्तस्वरूपस्थितिप्रवृत्तिकतया तच्छरीरत्वेन तदनन्यार्हशेषत्वादिरूपस्वासाधारणाकारस्सर्वप्रकारतत्पारतन्त्र्ययुक्ततद्दास्यैकरसस्तदनुभवजनितानवधिकातिशयनित्यानन्दयोगयोग्योऽपि गुणत्रयात्मिकया . . . . . . . . . . . . . .
निरन्तरविततविविधनिरवधिकदुःखसागरपरिप्लुतो वर्तते ।

**End:**

तस्मान्मन्मना भूत्वेत्यादिश्लोकद्वयेन चरमश्लोकेनैकेन वा सर्वोपायविलक्षणभगवदेकोपायत्वव्यवसाय एव भगवता स्वेनैव सादरं विधीयत इत्यस्यैव शरण्याभिमततरत्वसम्प्रतिपत्तेरयमेवोपायविशेषस्सर्वाधिकारिणां स्वाभिलषितपुरुषार्थसिद्ध्यर्थं स्वोज्जीवनार्थं च समाश्रयणीय मि(इ)ति नि(र)वद्यम् ॥

सौम्यजामातृमुनिना गुरुस्नेहदशान्वयात् ।
चरमश्लोकसारार्थतत्त्वदीपः प्रदर्शितः ॥
आरण्यकगुहान्तस्थमदृश्यं गुरुगोपनात् ।
सम्पश्यति रहस्यार्थं तत्त्वदीपान्वितः पुमान् ॥

---

## No. 5251. तत्त्वदीपः.
## TATTVADĪPAḤ.

Pages, 176. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 4985.

Complete.

**Same work as the above.**



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. **5252.** तत्त्वदीपः.

TATTVADĪPAḤ.

**Substance**, palm-leaf. Size, 13¼ × 1⅝ inches. Pages, 67. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, new.

Incomplete.

Same work as the above.

---

No. **5253.** तत्त्वदीपिका.

TATTVADĪPIKĀ.

**Pages**, 30. Lines, 6 on a page.

Begins on fol. 17*a* of the MS. described under No. 4646.

Complete.

Wants many leaves.

A controversial work intended to establish that Nārāyaṇa is the Supreme Brahmn: by Śrīnivāsācārya, son of Tātācārya.

**Beginning:**

श्रियःपतिं जगत्सृष्टिस्थितिसंहृतिकारणम् ।
प्रपद्ये भक्तरक्षार्थमवतीर्णं परं हरिम् ॥

यद्यपि भगवान्नारायणः पुरुषोत्तमः परं ब्रह्म परं ज्योतिः परतत्त्वं परमात्मेत्यादिशब्दैरभिधीयते सकलजगत्कारणं सत्संरक्षणाय अजोऽपि जायते मुक्तप्राप्यश्चेति सत्सम्प्रदायः, तथापि शिवादय एव कासुचि-द्याख्यासु परत्वेन प्रतीयन्ते । एते जगत्कारणतया मुमुक्षुभिर्ध्येया इति केषां चिन्मन्दमतीनां विप्रतिपत्तिर्जायेतापि । अतस्तद्व्युदासाय प्रवृत्तोऽयं ग्रन्थ इति प्रयोजनवानेवायमारम्भः । अयमिह पूर्वपक्षसङ्ग्रहः—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सद्ब्रह्मात्मादिशब्दानां विशेषे पर्यवस्थितिः ।
शिवादिशब्दिते न्याय्या न तु नारायणाह्वये ॥

**End:**

नहुषप्रश्ने च—

" विष्णुं ब्रह्मण्यदेवेशं पुराणपुरुषोत्तमम् ।
लोकनाथमनाद्यन्तं जगतः कारणं परम् ॥
नार्चयन्ति च ये मूढाः परमात्मानमव्ययम् ।
ते यान्ति नरकं घोरमक्षरं भरतर्षभ ॥"

इत्यादीनि बहूनि वचनानि सन्ति ! विस्तरभयान्न लिख्यन्ते । एवं निखिलजग(दु)दयविभवलयलीलो भगवान् नारायण एव पर इति सुस्थितम् ॥

**Colophon:**

इति श्रीमत्कौशिककुलतिलकताताचार्यसूनोः श्रीनिवासाचार्यस्य कृतिषु तत्त्वदीपिका समाप्ता ॥

---

## No. 5254. तत्त्वाविवेकः.

## TATTVAVIVĒKAḤ.

Substance, palm-leaf. Size, 17 × 2 inches. Pages, 27. Lines, 9 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete.

An enquiry into the nature of the soul, the world and Īśvara: by Piḷḷalōkācarya, son of Kṛṣṇapāda.

**Beginning:**

लोकाचार्याय गुरवे कृष्णपादस्य सूनवे ।
संसारभोगिसन्दष्टजीवजीवातवे नमः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रामानुजार्याङ्घ्रिरजस्तेजितस्वान्तदर्पणे ।
. . . . . . . मात्मानात्मतदात्मनाम् ॥

श्रियःपतेरखिलचेतनाचेतनपदार्थसार्थसकलविधशासितुः परात्मनः परावरनिखिलजगज्जन्मजीवनलयैकलीलस्य भगवतो नारायणस्य . . . . . . . . . . . . . . . . . . . परपुरुषार्थलाभाय तत्त्वत्रयमवगन्तव्यम् । ननु तमेवं विद्वानमृत इह भवति । तमेव विदित्वातिमृत्युमेतीत्यादिभिर्भगवत्तत्त्वज्ञानस्यैकस्यैव मोक्षसाधनत्वश्रवणात् ।

**End:**

श्रीभूमिनीलाधिपतिः चिदचित्तत्त्वनायकः ॥
समस्तशब्दवाच्यश्च विना स्वामी च हेतुना ।
एवं वेदान्ततत्त्वज्ञैर्वैकुण्ठपतिरीरितः ॥

* * *

**Colophon:**

इति श्रीमल्लोकाचार्यकृतौ तत्त्वविवेके ईश्वरनिरूपणाधिकारस्तृतीयः ॥

---

No. **5255.** तप्तचक्राद्यङ्कनप्रमाणानि.

TAPTACAKRĀDYAṄKANAPRAMĀṆĀNI.

Pages, 10. Lines, 10 on a page.

Begins on fol. 25*a* of the MS. described under No. 4443.

Complete.

Gives the authorities showing the necessity of undergoing the religious ceremony of Samāśrayaṇa.

**Beginning:**

पवित्रं ते विततं ब्रह्मणस्पते । प्रभुर्गात्राणि पर्येषि विश्वतः
. . . . . . . . . . . . अस्याश्श्रुतेरयमर्थः—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ब्रह्मणो वेदस्य चतुर्मुखस्य ब्राह्मणजातियुक्तानां सर्वेषां य(प)ते ! रक्षकेति विष्णुसम्बोधनम् । प्रभुस्त्वं विश्वतो विश्वेषां गात्राणि पर्येषि व्याप्नोषि; अन्तर्यामिरूपेण वर्तते(से) ।

**End:**

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥

इति श्रुतिस्मृतीतिहासपुराणसदाचारसिद्धत्वादिति दिक् ॥

**Colophon:**

तप्तचक्राद्यङ्कनप्रमाणानि ॥

---

No. **5256.** तुलसीनलिनाक्षमालाप्रतिष्ठा.

TULASĪNAḶINĀKṢAMĀLĀPRATIṢṬHĀ.

**Pages**, 2. Lines, 9 on a page.

Begins on fol. 22*a* of the MS. described under No. 5205.

Complete.

On the sanctifying of rosaries made up of lotus-beads and Tulasī-beads.

**Beginning:**

तुळसीनळिनाक्षमालिकाप्रोक्षणविधिं व्याख्यास्यामः—

ब्राह्मणैरनुज्ञाप्य, विष्वक्सेनाराधनं कृत्वा, मूलमन्त्रेण पद्माक्षमालिकां मार्जयित्वा, पञ्चगव्यैः स्नापयित्वा, पुण्याहजलेन प्रक्षाळ्य,

**End:**

श्रीमन्त्रेणाष्टोत्तरशतं हुत्वा, ततः श्रीभूमिसूक्ताभ्यां तद्गायत्रीभ्यां च हुत्वा, मालिकामादाय, देवपादारविन्दयोस्समर्प्य, तामादाय तत्र शतवारं श्रीमन्त्रं जपेत् ॥

**Colophon:**

इति वासिष्ठसंहिताप्रोक्ततुळसीनळिनाक्षमालाप्रतिष्ठा ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5257. तुलसीपद्माक्षमालिकाप्रतिष्ठा.

## TULASĪPADMĀKṢAMĀLIKĀPRATIṢṬHĀ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 28*a* of the MS. described under No. 5239.

Complete.

Similar to the above.

**Beginning:**

ततः पद्माक्षतुलसीमालिकां धारयेद्गृहे ।
श्रीमत्पवित्रमतुलं देवदेवेन धारितम् ॥
पद्माक्षमालिका धार्या सततं ब्रह्मचारिभिः ।
प्रतिष्ठितविधानेन तुलसीमालिकापि च ॥
पद्माक्षमालिका ग्राह्या मूलमन्त्रेण मार्जयेत् ।
पञ्चगव्यैस्स्नापयित्वा पुण्याहाद्भिस्ततः परम् ॥

**End:**

पद्माक्षतुलसीमालां श्रीपवित्रं यथाक्रमम् ।
सन्धार्य नित्यकर्माणि विष्णोः प्रीत्यर्थमाचरेत् ॥
प्रीत्यर्थं देवदेवस्य देवस्य जगतीपतेः ।
नित्यकर्माणि कुर्वीत ततो नैमित्तिकान(न्य)पि ॥

---

## No. 5258. दुरर्थदूरीकरणम्.

## DURARTHADŪRĪKARAṆAM.

Substance, paper. Size, 13¼ × 8½ inches. Pages, 147. Lines, 30 on a page. Character, Grantha. Condition, good. Appearance, new.

Incomplete.

Herein the author Mahāmahōpādhyāya Tirupputkuḷi Kṛṣṇatātācārya maintains that Rahasyatraya is not different from the Vēdāntaśāstra in scope and significance.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

सकृत्प्रपन्नसंरक्षादीक्षितं सर्वकारणम् ।
जगदीश्वरमद्वन्द्वं द्वन्द्वं किमपि संश्रये ॥
तुषारधरणीधरस्फुरदुदारकोटीतटी-
निरर्गळविनिर्गळद्विबुधवाहिनीविभ्रमैः ।
वचोभिरवनीतले कुमतिगर्वसर्वङ्कषो
मम स्फुरतु मानसे श्रुतिशिरोगुरुस्सन्ततम् ॥
वकुळभूषणपादसरोरुहप्रवणमानससंयमिशेखरम् ।
कलयतो निगमान्तगुरोः पदे कृतधिये करवै गुरवे नमः ॥
लक्ष्मीकुमारतातार्यवंशाम्बुधिसुधाकरः ।
श्रीवेङ्कटगुरुर्जीयाद्यतो मे जननद्वयम् ॥
जीयाद्गोपालतातार्यः पितृव्यो मे कवीश्वरः ।
यदीयचरणाम्भोजात्तातार्यीकी जनिर्मम ॥
श्रीवासयोगीश्वरपादसेवालब्धागमान्तद्वयसम्प्रदायः ।
श्रीकृष्णतातो महतां नियोगाद्दूरीकरोत्यद्य दुरर्थजातम् ॥

यत्तावदभिहितम् । "मुमुक्षुर्वै शरणमहं प्रपद्ये । अमृतस्यैष सेतुः । यमेवैष वृणुते तेन लभ्यः । न्यास इति ब्रह्म" इत्यादिवाक्यविशेषास्तत्सङ्ग्रहरूपं रहस्यत्रयं च वेदान्तशास्त्राद्भिन्नमिति तन्न । उपनिषत्स्वरूपस्य मोक्षतत्साधनादिप्रतिपादनपरशास्त्रत्वरूपस्य वा वेदान्तशास्त्रत्वस्योक्तवाक्येष्वबाधात् ।

**End:**

भगवत एव फलित्वेऽपि हि भगवता दीयमानस्य चेतनगतकैङ्कर्यस्य चेतनेच्छाविषयत्वाभावे तस्य पुरुषार्थदायित्वं न सिध्यति । तस्मादुपायसम्बन्धमन्तरेण केवलस्वातन्त्र्येणैव भगवता कस्यचित् चेतनस्य स्वीकार इत्येतत् सर्वथानुपपन्नमिति स्थितम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5259. देवतान्तरोपासननिरासः.

## DĒVATĀNTARŌPĀSANANIRĀSAḤ.

**Pages**, 3. Lines, 10 on page.

Begins on fol. 21*b* of the MS. described under No. 3119.

A tract inculcating that a Vaiṣṇava should not worship any deity other than Viṣṇu.

**Beginning:**

महाभारते मोक्षधर्मे—

ब्रह्माणं नीलकण्ठं च याश्चान्या देवतास्स्मृताः ।
प्रतिबुद्धा न सेवन्ते यस्मात्परिमितं फलम् ॥
पाञ्चरात्रविदो ये च यथाक्रमपरा नृप ।
एकान्तभावोपगताः तं हरिं प्रविशन्ति ते ॥

आरण्यपर्वणि हि—

मद्भक्तजनवात्सल्यं पूजायां चानुमोदनम् ।
स्वव्यू(हा)भ्यर्चनं चैव मदर्थे डम्भवर्जनम् ॥

**End:**

एवमेव हरिर्देवस्सर्वेशस्सर्वभावनः ।
वरदोऽभूत्पुरा मह्यं तेनाहं दैवतैर्नतः ॥
एतद्रहस्यं वेदानां पुराणानां च सत्तम । इति.

---

## No. 5260. द्रमिडभाषाध्ययनकर्तव्यताविचारः.

## DRMIḌABHĀṢĀDHYAYANAKARTAVYATĀ-VICĀRAḤ.

**Pages**, 9. Lines, 6 on a page.

Begins on fol. 105*a* of the MS. described under No. 4898.

Complete.

A dissertation intended to bring out the importance of the study of the well-known collection of Tamil psalms called Tiruvāy-moḻi.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

न च(न)म्लेच्छितवै नापभाषितवै । म्लेच्छो ह वा एषः । यदप-शब्द इत्यपशब्दरूपद्रमिडभाषोच्चारणस्य निषिद्धत्वात् कथं तदध्यय-नस्यादर्तव्यता ? (न म्लेच्छि)तवै न मुच्छितव्यमित्यर्थः । तथा(च) नानृतं वदेदिति अनृतवदनस्य निषिद्धत्वात् अयथावस्थितार्थकथनलक्षणा-नृतवदनस्येव अयथावस्थितशब्दकथनलक्षण(।पशब्द)वदनस्यापि निषिद्ध-त्वात् व्याकरणाधिकरणे मीमांसकैस्तथा प्रतिपादितत्वाच्च कथं भाषा-प्रबन्धाध्ययनस्यादर्तव्यतेति वाच्यम्; न म्लेच्छितवा इत्यस्य क्रतुप्रक-रणपठितत्वेन क्रत्वर्थतया क्रतोर्बहिरपशब्दप्रयोगे दोषाभावात् ।

**End :**

तस्मिन्नधिकरणे शाक्याद्यागमानां वेदवैदिकनिन्दापराणां भेदानुमान-द्वारा धर्मप्रमित्युपयोगाभावसमर्थनेऽपि मन्वादिस्मृतिवत् वैदिकार्थनिबन्धन-बद्धश्रद्धस्यास्य प्रबन्धस्य श्रुत्यनुमानद्वारा धर्मप्रमित्युपयोगित्वसम्भवेन इतिहासपुराणस्थानाभिषिक्त[क]त्वे दोषाभावादित्यलमि(म)तिचर्चया ॥

---

No. **5261.** द्रमिडोपनिषत्तात्पर्यम्.

DRAMIḌŌPANIṢATTATPARYAM.

Substance, palm-leaf. Size, $9\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 35. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Complete.

Gives in Sanskrit stanzas the significance of the various parts of Tiruvāymoḻi : by Abhirāmavara.

**Beginning :**

यश्चकार सकलार्थसम्पदां व्यञ्जनीं द्रविडवेदसङ्गतिम् ।
तं द्वितीयशरणापमन्वहं नौमि सुन्दरवराह्वयं मुनिम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आचारो(र्यो)दितपद्धत्या द्राविडाम्नायसङ्गतिम् ।
अभिधास्ये विशेषज्ञैरादरादृह्यतामियम् ॥
श्रीमान् गुणाम्बुधिरवाप्तसमस्तकाम-
श्शौरिश्शठारिमनु जन्मपरिश्रमं तम् ।
आकस्मिकेक्षणवशाददितिनित्यमुक्त-
बृन्दात्तृणीकरणशक्तिधरश्चकार ॥
आद्ये वयस्यपि ततोऽनुभवन्मुरारि-
मस्तन्यपानरसिकश्शठजिन्मुनीन्द्रः ।
आस्थाय मौनमवदी(धी)र्य च लोकवृत्त-
माषोडशाब्दमतिवाहितवान् दिनानि ॥

ये राघवे भरतलक्ष्मणजानकीनां ये घोषमुग्धसुदृशामपि नन्दसूनौ ।
भावा रसैकवपुषः प्रथितश्शठारिस्तानेव वा तदधिकानुत तत्र लेभे ॥

* * • *

तत्रादिमे तु शतके दशके तदाद्ये सम्यग्गुणाकृतिविभूतिसमेतमीशम् ।
अध्यक्षयन् परमनुग्रहतस्तदीयात्तद्दास्ययोजितमनाश्शठजिद्बभूव ॥

வீடுமின் ।

संसारिणोऽप्यनुजिघृक्षुरसौ दयालुरल्पास्थिरेतरपुमर्थरुचिं निरस्यन् ।
तत्त्यागपूर्वहरिभक्तिसुधां बुधानामुद्दीपनीमुपदिदेश मुनिर्द्वितीये ॥

பத்துடை ।

**End:**

तद्दर्शनं च मनसैव न चक्षुषेति
भक्त्या युतः परमया भगवान् शठारिः ।
पद्माज्ञया भगवतः परिहृत्य मान्द्यं
प्राप्य त्वरापरवशो दशमे प्रपेदे ॥
आचार्योदितपद्धत्या द्राविडाम्नायसङ्गतिम् ।
अभ्यधादेवमाचार्यस्त्वभिरामवराह्वयः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5262. ध्वजलक्षणम्.

## DHVAJALAKṢAṆAM.

Pages, 5. Lines, 6 on a page.

Begins on fol. 4*b* of the MS. described under No. 5188.

Incomplete.

On the quality and dimensions of the cloth to be attached to the temple flag-staff prior to the commencement of important festivals and ceremonies in temples.

**Beginning:**

तत्तू(न्तू)त्थं क्षौमवसनं निर्दोषं सूक्ष्ममावृतम् ।
कार्पासं(च) यथावित्तं ध्वजार्थे कल्पयेद्बुधः ॥
आयतं दशभिर्हस्तैर्विस्तीर्णं पञ्चभिर्दृढम् ।
मूलबेरसमायामं द्वारायाममथापि वा ॥

**End:**

अस्वातन्त्र्यादसामर्थ्याच्छूद्रादीनामभावतः ।
तस्मान्मानानि(नेषु) सर्वेषां न्यूनाधिक्योपशान्तये ॥
समालोकय नेत्राभ्यां शीतलाभ्यां पटस्थित[म्] ।
सर्वदोषापहारिभ्यां वैनतेय प्रसीद ओम् ॥

---

## No. 5263. नवविष्णुमूर्तिप्रतिष्ठा.

## NAVAVIṢṆUMŪRTIPRATIṢṬHĀ.

Substance, palm-leaf. Size, 16¾ × 1⅝ inches. Pages, 5. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 48*a*. The other works herein are Śaṭhakōpadrāviḍamāhātmya 1*a*, Trailōkyamōhanakavaca 12*a*, Gadyatraya 18*a*, Rājayōga 30*a*, Aṣṭākṣaramantrarājayōga (Telugu) 35*a*, Sarasvatīpūjāvratakalpa 51*a*, Kṛṣṇāṣṭamīvratakalpa 57*a*.

Relates the manner of consecrating new images of Viṣṇu for worship.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

पुण्याहवाचनम् ।

नवमूर्तेरिशिल्पिहस्तैः कारितस्य प्रतिष्ठायां संपूर्णसन्निधानसकलफलावाप्त्यर्थं नवविष्णुमूर्तिप्रतिष्ठाख्यं कर्म करिष्यमाणः स्वस्तिपुण्याहवाचनं करिष्ये । ततः पुनस्सङ्कल्प्य एवङ्गुणेत्यादिशुभतिथौ मनोवाञ्छाफलसिद्ध्यर्थं नवविष्णुप्रतिष्ठापनाख्यं कर्म करिष्ये । ततो मूर्तिमन्त्रोदकैरभिषेकः ।

**End:**

पुष्पाञ्जलिं ततो दत्वा धूपदीपौ निवेदयेत् ।
पुनर्नीराजनं कृत्वा पुष्पाञ्जलिमनन्तरम् ॥
गोभूतिलहिरण्याद्यैराचार्यं पूजयेद्बुधः ।
कलशान् दापयेत्पश्चात् ब्राह्मणान् भोजयेत्ततः ॥

---

No. **5264.** निक्षेपचिन्तामणिः.

NIKṢĒPACINTĀMAṆIḤ.

Pages, 80. Lines, 7 on a page.

Begins on fol. 38*a* of the MS. described under No. 30.

Incomplete.

A treatise to show that true Prapatti, *i e.*, complete renunciation and submission to the will of God, when characterised by the five Aṅgas, viz., Ānukūlyasaṅkalpa, Prātikūlyavarjana, Mahāviśvāsa, Kārpaṇya and Gōptṛtvavaraṇa, produces the desired effect of soul-salvation: by Gōpāladēśika of Ātrēyagōtra.

**Beginning:**

अखिलभुवनरक्षासाधनायावतीर्णे
कुमतिकलिविलासध्वान्ततिग्मांशुजाले ।
निरवधिक[ा]रुणाब्धौ वेदचूडागुरौ मे
भवतु परमभक्ति(:) श्रीनिधौ वेङ्कटेशे ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्षरन्ती सायुज्यं झटिति जगतां पापमखिलं
क्षिपन्तीं सन्तापं द्रुतमु(म)पनयन्ती शुभगुणान् ।
वहन्ती मूर्त्या श्रीश्रुतिमकुटरामानुजमुने-
श्चरन्ती(न्या)साख्या मनसि मम विद्या निवसतात् ॥

अस्मद्देशिकतद्गुरून् श्रुतिशिरश्चूडार्यरामानुजौ
रङ्गेशं रघुपुङ्गवानुजगुरुं श्रीमन्नतार्तिच्छिदम् ।
श्रीरामानुजपूर्णयामुनमुनीन् रामारविन्देक्षणौ
नाथश्रीशठकोपसैन्यरमणश्रीश्रीपतीन् भावये ॥

(आत्रेय)कृष्णार्यमथागमान्तरामानुजार्यं गुरुसार्वभौमम् ।
श्रीरङ्गनाथं च गुरुं प्रणम्य निक्षेपचिन्तामणिमा(तनो)मि ॥

आचार्यचरणैरुक्तान्न्यासाङ्ग(ा)ङ्ग्यादिगोचरान् ।
विशेषान् विप्रकीर्णान् स दर्शयामि यथामति ॥

तत्र निक्षेपन्यासापरप(र्याय)प्रपत्तिविद्याया अङ्गानि—

आनुकूल्यस्य सङ्कल्पः, प्रातिकूल्यस्य वर्जनं, कार्पण्यं, महाविश्वासः, गोप्तृत्ववरणं चेति पञ्च वेद्यानि ।

**End :**

जुहुयात्प्रणवेनाग्नौ अच्युताख्ये सनातन इति वचनार्थापातप्रतीत्या वसुरण्येति मन्त्रेणात्म.

---

No. **5265.** निक्षेपचिन्तामणिः.

NIKṢĒPACINTĀMAṆIḤ.

Substance, palm-leaf. Size, 16¼ × 1⅜ inches. Pages, 200. Lines, 7 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Incomplete.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5266. निक्षेपरक्षा.

## NIKṢĒPARAKṢĀ.

Substance, palm-leaf. Size, 16¼ × 1⅜ inches. Pages, 106. Lines, 11 on a page. Character, Grantha. Condition, injured. Appearance, new.

Incomplete.

A treatise on the nature and importance of Prapatti: by Vēdāntadēśika.

This manuscript is said to have belonged to a Śrīnivāsan of Tiruppāṛkaḍal.

**Beginning:**

प्राची सन्ध्या काचिदन्तर्निशायाः प्रज्ञादृष्टेरञ्जनश्रीरपूर्वा ।
वक्त्री वेदान् भातु मे वाजिवक्त्रा वागीशाख्या वासुदेवस्य मूर्तिः ॥

प्रणतिं वेङ्कटेशस्य पादयोर्विदधीमहि ।
यदुक्तयो यतीन्द्रोक्तिरहस्यानां रसायनम् ॥

संसाराध्वगतागतश्रमहरस्सर्वावगाह्य(:)स्वयं
श्रीसंश्लेषसमुल्लसद्धनरस(:)श्रीशस्तटाको महान् ।
नोदिष्टेन महापथेन सुगमो येषां प्रसादादभू-
त्तीर्थं तत्र शुभं प्रकाशयतु नस्तेभ्यो गुरुभ्यो नमः ॥

प्रायः प्रपदने पुंसां पौनःपुन्यं निवारयन् ।
हस्त(:)श्रीरङ्गभर्तुर्मामव्यादभयमुद्रितः ॥

स्थितं तावच्छरीरबाह्याभ्यन्तरकरणप्राणधिषणाविलक्षणः पारलौकिक-सुखदुःखोदर्कानुभवयोग्यः परमपुरुषनित्येच्छातन्त्रितस्वातन्त्र्यपारतन्त्र्योऽ-नादिकर्मप्रवाहहेतुकचतुर्विधदेहप्रवेशजनिततत्तदात्माभिमानसन्तन्यमानावर्ज-नीयदुस्सहदुःखसन्ततिसहस्रसन्ततस्सांसिद्धिकसम्यगध्यक्षयुगपदध्यक्षितस -

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मस्तवस्तुवास्तवेनापि स्वच्छन्दपश्चकृत्यनित्यशक्तिसम्पदापि सर्वजननिरुपाधिकपरमसुहृदापि अनुकम्पनीयानुकम्पावात्सल्यसौशील्यादिगुणगणविपरिणमितपितृत्वोष्मणापि यथावस्थितगुणविभूतिमण्डलपरिमण्डितस्वात्मविश्राणनमहावदान्येनापि पुरुषोत्तमेन परब्रह्मणा नारायणेनानादिकर्म . . . . . . . . . . . . . . . मनोरथगोचरेणार्चिरादिपथेन परमपदमधिरुह्य स्वेन रूपेणाभिनिष्पन्नो भगवन्तमनुभवति प्रत्यगात्मेति ।

तत्र ज्ञानकर्मसमुच्चयवाक्यार्थज्ञानादिपरपक्षप्रतिक्षेपेण कर्मज्ञानानुगृहीतो वेदनध्यानोपासनादिशब्दवाच्यो दर्शनसमानाकृतिनिरतिशयप्रीतिरूपतया भक्तिशब्दाभिलाप्योऽसकृदावृत्त आप्रयाणानुवृत्तो निरन्तरस्मृतिसन्तान एव निश्श्रेयसनिश्श्रेणिकेति निरणायि ।

See under the next number for the end.

---

## No. 5267. निक्षेपरक्षा.

## NIKṢĒPARAKṢĀ.

Pages, 84. Lines, 8 on a page.

Begins on fol. 75*b* of the MS. described under No. 4881.

Incomplete.

Same work as the above.

See under the previous number for the beginning.

**End:**

अतस्समस्ताभिमतसाधनस्वतन्त्रप्रपत्तिविषय एवायं श्लोकः ।

सुदुष्करेण शोचेद्यो येन येनेष्टहेतुना ।
स स तस्याहमेवेति चरमश्लोकसङ्ग्रहः ॥ इति ।

अङ्कूरत्परभक्तिकुङ्कुमलताकाश्मीरकेदारिकां
जीवातुं जरदन्धपङ्गुबधिरप्रायात्मनां प्राणिनाम् ।
निष्प्रत्यूहषडङ्गयोगनिगमप्रासादनिश्रेणिकां
नित्यं चेतसि धारयन्तु सुधियो निक्षेपरक्षामिमाम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विवृतमिह रहस्यं यन्मया गोपनीयः(यं)
स्खलितमपि यदीषद्भूयसा वा तदेतत् ।
निजमहिमविशेषप्रेममात्रेण नाथः
क्षमत इति विचिन्त्य क्षन्तुमर्हन्ति सन्तः ॥
गुरुचरणसपर्यास्वादवैदेशिकानां प्रलपितमवधूय प्राक्तनेनाध्वनैव ।
व्यवृणुत परमार्थं वेङ्कटेशः प्रजानां निगमगिरिनिगूढन्यासविद्यानिधानः ॥

**Colophon :**

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य कृतिषु निक्षेपरक्षा सम्पूर्णा ॥

---

No. **5268.** निक्षेपरक्षाव्याख्या.

NIKṢĒPARAKṢĀVYĀKHYĀ

Substance, paper. Size, $11\frac{1}{8} \times 9\frac{3}{4}$ inches. Pages, 239. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete.

A well-known commentary on the Nikṣēparakṣā of Vēdāntadēśika : by Nṛsiṁharāja.

The subjects treated of herein are :—

१. उपोद्घाताधिकारः.
२. पूर्वपक्षाधिकारः.
३. स्वरूपानुपपत्तिः.
४. लक्षणानुपपत्तिः.
५. अनुष्ठानानुपपत्तिः.
६. विध्यनुपपत्तिः.
७. निषेधसमर्थनम्.
८. ऐक्यसमर्थनम्.
९. अशक्तिसमर्थनम्.
१०. अख्यातिसमर्थनम्.
११. सम्प्रदायविरोधसमर्थनम्.
१२. सिद्धान्ताधिकारः.
१३. स्वरूपसमर्थनम्.
१४. लक्षणसमर्थनम्.
१५. अनुष्ठानसमर्थनम्.
१६. विधिसमर्थनम्.
१७. निषेधभङ्गः.
१८. ऐक्यभङ्गः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१९. अशक्तिभङ्गः.
२०. अख्यातिभङ्गः.
२१. सम्प्रदायविरोधभङ्गः.

**Beginning:**

वधूटीवक्षोजद्वितयघुसृणालिप्तहृदयः
दयासिन्धुर्बन्धुर्दनुजशिशवे स्तम्भजननः* ।
मुखे सिंहः श्रेयस्सुरनरतिरश्चामपि विभुः
स्वयं देवो देयाद्यदुशिखरिशृङ्गाग्रवसतिः ॥
यत्पादाम्भोजसेवासमधिगतसमस्तार्थतत्त्वप्रमाणाः
सर्वोर्वीवादिगर्वाम्बुधिबळकलाकेलिकुम्भीतनूजाः ।
जेजीयन्ते धरायां कथककविघटाकेसरी सर्वतन्त्र-
स्वातन्त्र्यस्सोऽस्तु वृद्ध्यै वृषभधरणिभृन्नाथघण्टावतारः ॥
टीकां निक्षेपरक्षाया नानागुरुमतानुगाम् ।
यथाश्रुति यथान्यायं करोमि कृपया गुरोः ॥

इह खलु संसारसागरे दुस्सहगर्भजन्मजरामरण . . . . . . . . . . . . . स्थूणानिखननन्यायेन सुदृढं स्थापयितुं निक्षेपरक्षाख्यं प्रबन्धं कुर्वता शिष्टाचारपरम्पराप्राप्तं विशिष्टगुरुपरम्परानमस्कारादिरूपं मङ्गलं स्वाचरितं शिष्यशिक्षायै ग्रन्थादौ निबध्यते संसारेति । महान् तटाकः येषां प्रसादात् नेदिष्ठेन महापथेन सुगमोऽभूदित्यन्वयः ।

**End:**

स्वग्रन्थस्य सम्प्रदायागतार्थत्वं श्रद्धेयत्वायाह—गुरुचरणेति । गुरुशि(शु)श्रूषया विद्येति गुरुशि(शु)श्रूषणामेव सम्प्रदायार्थवेदित्वादिति भावः । प्राक्तनत्वं कथमित्यत्राह परमार्थेति ।

इत्थं वेङ्कटदेशिकेन्द्रकथितां निक्षेपरक्षामिमां
व्याख्यत्कौशिकवंशसम्भवगुरोः श्रीश्रीनिवासाह्वयात् ।

---

*तनयायावतरणः इति पाठान्तरम्.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सम्प्राप्तामखिलामनेकगुरुतस्सत्सम्प्रदायागतां
श्रीमद्वात्स्यनृसिंहसूरितनयः श्रीसिंहदेवस्सुधीः ॥
सम्प्रदायागता(तो)ह्यर्था(र्थो)व्यलेखि प्रायशो मया ।
अत्रातिक्रमदोषश्चेत् क्षन्तव्यस्साधुबुद्धिभिः ॥

**Colophon:**

इति श्रीनिगमान्तविद्याकुमुदिनीमोदकरस्य कुशिककुलजलधिचन्द्रस्य वेदान्ताचार्यस्य भागिनेयेन वत्सकुलजलधिकौस्तुभनृसिंहसूरितनयेन नृसिंहदेवेन विरचिता निक्षेपरक्षाव्याख्या समाप्ता ॥

---

No. **5269.** नित्यग्रन्थः.

NITYAGRANTHAḤ.

Substance, palm-leaf. Size, 14 × 1¼ inches. Pages, 24. Lines, 7 on a page. Character, Grantha. Condition, good Appearance, new.

Begins on fol. 1*a*. The other work herein is Vaṅgīpurīśvarakārikāvali 13*a*.

On the conduct of the daily worship of Viṣṇu in houses: by Śrī Rāmānuja.

**Beginning:**

अथ परमैकान्तिनो भगवदाराधनप्रयोगं वक्ष्ये—

भग(व)त्कैङ्कर्यैकरतिः परमैकान्ती भूत्वा भगवानेव स्वशेषभूतेन मया

* * * *

स्वात्मानं प्रीतं कारयितुमुपक्रमत इत्यनुसन्धाय, तीर्थं गत्वा, शुचौ देशे पादौ प्रक्षाल्य ।

**End:**

भगवद्यागशिष्टैर्जलादिभिर्द्रव्यैः विष्वक्सेनमभ्यर्च्य पूर्वोद्धृतं हविश्च दत्वा तदर्चनं परिसमाप्य भगवन्तमष्टाङ्गप्रणामेन प्रणम्य शरणमुपगच्छेत् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5272. पञ्चसंस्कारविधिः.
## PAÑCASAMSKĀRAVIDHIḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 33*a* of the MS. described under No. 5236.

Complete.

On the five Saṁskāras prescribed for Śrī-Vaiṣṇavas.

These five Saṁskāras are Samāśrayaṇa, Ūrdhvapuṇḍradhāraṇa, Dāsyanāmakaraṇa, Mantrōpadēśa and Bhagavadārādhana.

**Beginning :**

अथातः परमसंस्कारविधिं व्याख्यास्यामः—तापनपुण्ड्रधारणदास्यनामकरणमन्त्रोपदेशभगवदाराधनं चेत्यमी पञ्च पञ्चसंस्काराः ।

**End :**

तन्त्रशेषं समाप्य, भगवन्तमुद्वास्य, प्रणीतामो(प्रो)क्षणं ब्रह्मोद्वासनं च कृत्वा, पुण्याहं वाचयित्वा यथाशक्ति वैष्णवानभिवर्तयेत् ॥

**Colophon :**

सम्पूर्णम् ॥

---

## No. 5273. परमसंहिता.
## PARAMASAMHITĀ.

Substance, paper. Size, $13\frac{1}{8} \times 8\frac{5}{8}$ inches. Pages, 202. Lines, 25 on a page. Character, Grantha. Condition, good. Appearance, new.

Contains 31 Adhyāyas.

Lays down the various ways in which Viṣṇu should be worshipped. Forms one of the Saṁhitās of the Pāñcarātrāgama.

**Beginning :**

आसीनमाश्रमे रम्ये नानाद्रुमविभूषिते ।
मार्कण्डेयं महाप्राज्ञं देवलस्समुपागमत् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तं प्रणम्य यथान्यायं तेन चाप्यभिनन्दितः ।
प्रष्टुं प्रचक्रमे विद्वान् परमज्ञानगोचरम् ॥

* * *

अकृत्स्नार्थमसारञ्चाविरुद्धञ्च परस्परम् ।
पञ्चरात्रमिदं प्रोक्तं योगतन्त्रमिदं परम् ॥
निर्मितं परमेणैव पुरुषेण तपोधन ।
सत्यार्थमविसंवादि लोकानां परमं हितम् ॥
सम्मतं योगिनामेतद्वैष्णवानां विशेषतः ।
प्रमाणमिदमेवैकमागमेषु व्यवस्थितम् ॥

**End:**

इत्येवं देवलः प्राप्य वैष्णवं ज्ञानमुत्तमम् ।
मार्कण्डेयं समामन्त्र्य निर्जगाम यथेप्सितम् ॥
य इदं शृणुयान्नित्यं वैष्णवश्शुद्धमानसः ।
तस्य पापानि नश्यन्ति जन्मान्तर(कृतानि च) ॥
(पठि)त्वा य इदं तन्त्रमुपास्ते पुरुषोत्तमम् ।
अचिरेण च कालेन तस्य देवः प्रसीदति ॥
यः पठेदादरादेत(द्यं पाठ)यति वा नरः ।
तस्यापि पापं क्षरति विशेषो(षात्)भक्ति(शालिनः) ॥
तस्मादनेन मार्गेण पूजयेन्मधुसूदनम् ।
(स्वर्गं वा) प्य(प)वर्गं वा निर्व्याजमधिगच्छति ॥

**Colophon:**

परमसंहितायां पञ्चरात्रे संसारसङ्ग्रहे उपसंहारपटल एकत्रिंशोऽध्यायः ॥

परमसंहिता समाप्ता ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मनोबुद्ध्यभिमानेन सह न्यस्य धरातले ।
कूर्मवच्चतुरः पादान् शिरस्तत्रैव पञ्चमम् ॥

* * * *

ततः अर्घ्यजलं प्रदाय भगवन्तमनुज्ञाप्य पूजां समापयेत् ॥

**Colophon:**

भाष्यकारनित्यग्रन्थस्समाप्तः ॥

---

## No. 5270. पञ्चसंस्कारकालः.

## PAÑCASAṀSKĀRAKĀLAḤ.

**Page**, 1. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 5239.

Complete.

Determines what time is auspicious for undergoing the purificatory religious ceremony of Samāśrayaṇa.

**Beginning:**

वैशाखे रत्नलाभश्च ज्येष्ठे मारकमेव च ।
आषाढे बन्धुनाशस्स्याच्छ्रावणे पुत्रलाभकम् ॥

**End:**

इति मासांश्च संशोध्य तिथिवारादिकान्यपि ।
शुभे च दिवसे कुर्यात् तापादीन् देशिकोत्तमः ॥

---

## No. 5271. पञ्चसंस्कारविधानम्.

## PAÑCASAṀSKĀRAVIDHĀNAM.

**Pages**, 5. Lines, 8 on a page.

Begins on fol. 18*a* of the MS. described under No. 4212.

For extracts, see under No. 3670.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. 5274. पराङ्कुशवैभवम्.

PARĀṄKUŚAVAIBHAVAM.

Substance, palm-leaf. Size, 17 × 1 inches. Pages, 39. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, old.

Incomplete.

A collection of authorities extracted from the Purāṇas and the Pāñcarātrāgama on the greatness of Parāṅkuśa (Śaṭhakōpa) and of his well-known Tamil work Tiruvāymoḻi.

**Beginning :**

श्रीमल्लक्ष्मणयोगीन्द्रसिद्धान्तविजयध्वजम् ।
विश्वामित्रकुलोद्भूतं वरदार्यमहं भजे ॥
श्रीमत्रय्यन्तसूरीन्दोः पादयुग्मं भजाम्यहम् ।
यत्कटाक्षा मादृशां श्रीजगन्माता हितैषिणी ।

हारीतस्मृतौ चतुर्थोध्याये—

प्रत्यूषे सहसोत्थाय सम्यगाचम्य वारिणा ।
आत्मानमित्यथारभ्य नमस्कृत्वा गुरूनपि ॥

संहितान्तरे—

अस्मद्गुरुभ्यो नम इत्याचार्यं प्रथमं श्रयेत् ।
परमेभ्यश्च सर्वेभ्यो गुरुभ्यो नम इत्यपि ॥

* * * *

तत्रैव कुरुकामाहात्म्ये प्रथमाध्याये ब्रह्माणं प्रति भगवान्—

द्वितीये तु परार्धे ते दिने त्वाद्ये तु मध्यमे ।
मन्वन्तरे वर्तमाने अष्टाविंशे चतुर्युगे ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कलेरादौ जन्मयोगी शठकोप इति श्रुतः ।
मद्भक्तोऽहं भविष्यामि नेतुं द्राविडतां श्रुतीः ॥
तत्र क्षेत्रे जन्मभाजा शठकोपेन योगिना ।
मुक्तिं भुवि जनास्सर्वे गमिष्यन्ति कलावपि ॥

**End:**

वराहपुराणे वेङ्कटगिरिमाहात्म्ये एकषष्टितमाध्याये वेङ्कटेशनामाष्टोत्तरशते कपिलं प्रति शेषवचनम्—

सुधर्मिणि(णे) सुचैतन्यप्रदात्रे मधुघातिने ।
कृष्णाख्यविप्रवेदान्तदेशिकत्वप्रदाय च ॥

---

No. 5275. पराशरधर्मशास्त्रम्.

PARĀŚARADHARMAŚĀSTRAM.

Pages, 22. Lines, 6 on a page.

Begins on fol. 68*a* of the MS. described under No. 2859.

Contains Adhyāyas 1 to 5, the last few lines of the 7th Adhyāya, its colophon and the 16th Adhyāya; breaks off in the 17th Adhyāya.

Deals with the celebration of temple festivals and the daily worship of God as conducted in temples. This is also probably a part of the Pāñcarātrāgama.

**Beginning:**

श्रीपराशर उवाच—

वेदेषु सर्वशास्त्रेषु प्रायश्चित्तं महत्सु च ।
पापेषु कथितं तेन समानं रामकीर्तनम् ॥
सर्वजन्मसु यत्पापं ज्ञानाज्ञानकृतं भवेत् ।
सर्वं दहति रामस्य कीर्तनं न विचारयेत् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्मात्सर्वप्रयत्नेन सर्वकालेषु बुद्धिमान् ।
रामचन्द्रं स्मरेद्यावन्मृतिस्तावन्न संशयः ॥

**Colophon:**

इति श्रीपाञ्चरात्रधर्मशास्त्रे उत्तरखण्डे प्रथमोऽध्यायः ॥

* * * *

इति श्रीपराशरधर्मशास्त्रे उत्तरखण्डे द्वितीयोऽध्यायः ॥

* * * *

इति श्रीपराशरधर्मशास्त्रे उत्तरखण्डे मन्त्रसंस्कारविधिर्नाम तृतीयोऽध्यायः ॥

**End:**

इति श्रीपराशरधर्मशास्त्रे उत्तरखण्डे चिदचिदीश्वरतत्त्वत्रयस्वरूपकथनं नाम षोडशोऽध्यायः ॥

श्रीपराशरः—

नित्यं सायाह्नसमये डोलायां पूजयेद्धरिम् ।
चतुस्स्तम्भमयां(यीं)दिव्यां चतुर्दामविराजिताम् ॥
दिव्यस्रग्वसनोपेतां शिबिकां परिकल्पयेत् ।
स्तम्भेषु चतुरो वेदानावाह्यात्र प्रपूजयेत् ॥

* * *

डोळाया दर्शनं विष्णोर्महापातकनाशनम् ।
हयमेधायुतं पुण्यं सर्वकामफलप्रदम् ॥
डोळामहोत्सवं कुर्यात्सकृद्वापि नरोत्तमः ।
कुलकोटिं समुद्धृत्य स गच्छेद्वैष्णवं पदम् ॥
यत्र यत्र स्थिता डोळा देवस्य प.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5276. पराशरसंहिता.

## PARĀŚARASAMHITĀ.

**Substance**, palm-leaf. Size, $18\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 62. Lines, 8 on a page. Character, Grantha. Condition, **slightly injured.** Appearance, new.

Begins on fol. 38*a*. The other works **herein are—Prapanna-pārijāta** 1*a*, Śuddhayājilakṣaṇa 16*a*, Vaiṣṇavalakṣaṇa 22*a*.

Breaks off in the 13th Adhyaya.

Defines the characteristics and the daily duties of a Prapanna. This is also a Samhita of the Pañcarātrāgama.

**Beginning:**

प्रपन्नलक्षणं सम्यग्वद मे मुनिसत्तम ।
मूलादिसर्वमन्त्राणां केशवादिमनोस्तथा ॥
विष्णोर्नामसहस्रस्य मन्त्रन्यासादिलक्षणम् ।
तत्तन्मूर्तिप्रतिष्ठार्थं प्रपत्तिफलसिद्धये ॥
. . . . वि॰णुसायुज्यसिद्धये च युगे युगे ।
विष्णुप्रतिष्ठासिद्ध्यर्थं विष्णुदीक्षादिसिद्धये ॥

अथ वक्ष्ये विधानेन शृणुष्व सुतपोधन ।
पूर्वं यद्विष्णुसायुज्यसिद्धये सर्वदा च तत् ॥
विष्णुप्रतिष्ठासिद्ध्यर्थं नित्यार्चासिद्धये सदा ।
सहस्रनाममूर्तीनां मूलादीनां तथैव च ॥
केशवाद्यादिमूर्तीनां मत्स्यादीनां विशेषतः ।
मन्त्रन्यासादिकं वक्ष्ये तत्तद्बिम्बादिलक्षणम् ॥
विप्रादिसर्ववर्णानामाचारं श्रुतिचोदितम् ।
प्रपन्नानां सदाचारं वसिष्ठाद्यैः कृतं च तत् ।
नित्यनैमित्तिकोक्ताद्यमाचारं सात्त्विकं तदा ।
ततः प्रपन्नविप्राणां सर्वेषां च महामुने ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विष्ण्वर्चनादिदीक्षायां निषेकादिक्रियादिषु ।
अर्थपञ्चकसंज्ञानां पञ्चसंस्कारमुत्तमम् ॥
पञ्चकालविधानोक्तं सदाचारं सुसाधितम्* ।
यावज्जीवं प्रपत्त्या च त्वाकारत्रयलक्षणम् ॥
विष्णुसायुज्यसिद्ध्यर्थं कर्तव्यं सर्वदा मुने ।
तापादिपञ्चसंस्काराः प्रपन्नस्य विशेषतः ॥

* * *

**Colophon:**

इति श्रीपाञ्चरात्रे पराशरसंहितायां विशिष्टपरमधर्मशास्त्रे द्वादशोऽध्यायः ॥

**End:**

उपेन्द्रमन्त्रं वक्ष्येऽथ क्रमादेव चतुर्मुख ।
उपेन्द्रस्य च मन्त्रस्य ऋषिर्गार्ग्यस्तथैव च ॥

गायत्री छन्द इत्यु.

---

No. **5277.** पराशरसंहिता.

PARĀŚARASAṀHITĀ.

Substance, palm-leaf. Size, 15¼ × 1½ inches. Pages, 36. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 18*a*. The other work herein is Citra-Pādukāsahasravyākhyā 1*a*.

Breaks off in the 4th Adhyāya.

Forms part of the Pāñcarātrāgama.

Same work as the above.

* सुसात्त्विकम् इति पाठान्तरम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. 5278. पाञ्चकालिकपद्धतिः.

PAÑCAKĀLIKAPADDHATIH.

Substance, palm-leaf. Size, 15⅜ × 1⅛ inches. Pages, 185. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new.

The first Paricchēda complete.

On the daily religious observances of a Śri-Vaiṣṇava to be gone through during five specified periods of the day.

**Beginning:**

श्रियःपतिं भजेमार्चावपुर्धरमहर्निशम् ।
सन्तोऽद्यापि प्रपद्यन्ते यत्कैङ्कर्ये कृतादराः ॥
अज्ञातनिग्रहां विष्णोस्सहधर्मचरीं श्रियम् ।
नमामि सर्वजगतां जननीं करुणामयीम् ॥
यत्सूक्तिशुक्तिनिर्मुक्ताः श्रीशसद्गुणमौक्तिकाः ।
तापं हरन्ति विधृतास्तं शठारिं भजेमहि ॥
तापत्रयाभिसन्तप्ता येन भाष्यामृतात्मना ।
उज्जीविता यतिपतिं तं सदा हृदि मन्महे ॥
यत्सूक्त्युपघ्ना योगीशसूक्तिकल्पकवल्लरी ।
पुष्णात्यभिमतानर्थान् त्रय्यन्तार्यं श्रयेमहि ॥
यन्नाम्न्युच्चरिते प्राज्ञा बध्नन्त्यधिशिरोऽञ्जलीन् ।
कवितार्किकसिंहश्रीतातयार्यमुपास्महे ॥
जन्मत्रयं च मे यस्मात् ज्ञानसद्गुणवारिधेः ।
तं श्रीनिवासवरददेशिकं मनवै तराम् ॥
वात्स्यगोविन्दसूरीन्द्रचरणौ शरणं वृणे ।
येन भाष्यामृतेनाहं पुनरुज्जीवितोऽभवम् ॥
श्रीवत्सवंशकलशीरत्नाकरसुधाकरः ।
रघुनाथगुरूत्तंस(:) श्रेयसे भूयसेऽस्तु नः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीचक्रवर्तिगुरुवर्यपदारविन्दनिर्यन्मरन्दरसतुन्दिलचित्तभृङ्गम् ।
श्रीवत्सवंशकलशार्णवपूर्णचन्द्रं रामानुजार्यगुरुवर्यमुपासिषीय ॥

त्रयीशिखरसूरीन्द्रसम्प्रदर्शितया दृशा ।
प्रदर्श्यते बुभुत्सूनां पाञ्चकालिकपद्धतिः ॥

भगवत्कैङ्कर्यैकरतिः परमैकान्ति(न्ती)भूत्वा दयार्द्रहृदयदेशिकोपदेशात्पाञ्चकालिकधर्मान्यथावदधिगम्य तदनुज्ञातः श्वो रात्रेश्चतुर्थयामे सावधानं परित्यक्तनिद्रः हरिर्हरिरिति सप्तकृत्वस्सङ्कीर्तयन् "ग्राहग्रस्ते गजेन्द्रे रुवति . . . . . . . . . . . . . .
. . . . . लोकत्रयगुरुस्तस्मै दद्यादात्मपदं हरिः" ॥

इति पठित्वा गण्डूषैश्शोधितवक्त्रस्सुप्रक्षाळितपाणिपादो द्विराचम्य जलाभावे वा अशक्तौ व्याहृतित्रयेण प्रणवेन वा नासाग्रस्पर्शपूर्वकं दक्षिणश्रवणं स्पृष्ट्वा.

**End:**

"विधुरो ब्रह्मचारी च वानप्रस्थोऽथ भिक्षुकः ।
परार्थं कर्म कुर्वाणाः पातयन्ति पतन्ति च ॥"

इति निषिद्धान् विना ऋत्विक्पुत्रशिष्यादिभिः स्वसमैरन्यैः कारयेत् । सूतकादावप्येवं सङ्कीर्तनेन यागस्वाध्याययोगफलं सिद्धं भवति ॥

जयन्तु गुरवोऽस्माकं जयन्तु भगवत्प्रियाः ।
जयन्तु भगवद्धर्म(ा) जयन्तु(तु) श्रीनिकेतनः ॥

यत्र भागवता नित्यं पञ्चकालपरायणाः ।
निवसन्ति सदा युक्तास्तत्क्षेत्रं नैमिशाद्वरम् ॥

**Colophon:**

इति प(ा)ञ्चका(लिक)पद्धतौ प्रथमपरिच्छेदः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीचक्रवर्तिरघुवर्यपदारविन्दनिर्यन्मरन्दरसतुन्दिलचित्तभृङ्गम् ।
श्रीवत्सवंशकलशार्णवपूर्णचन्द्रं रामानुजार्यगुरुवर्यमुपासिषीय ॥

श्रीवत्सवंशकलशाम्बुधिपूर्णचन्द्रं श्रीश्रीनिवासवरदार्यतनूजरत्नम् ।
रामानुजार्यपदपङ्कजभृङ्गराजं वेदान्तदेशिकशिखामणिमाश्रयामः ॥

---

No. **5279.** पाञ्चरात्रकण्टकोद्धारः.

PĀÑCARĀTRAKAṆṬAKŌDDHĀRAḤ.

**Substance**, palm-leaf. Size, 12¾ × 1⅓ inches. **Pages**, 118. **Lines**, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

A treatise in support of Yāmunācārya's **Agāmaprāmāṇya**: by Vādhūla Varadācārya.

**Beginning :**

जयति श्रीमहाचार्यो वेदान्तार्थप्रकाशकः ।
कुहनाबद्धसिद्धान्तश्रद्धाध्वान्तदिवाकरः ॥

श्रीपाञ्चरात्रप्रामाण्यकण्टकोद्धारसङ्ग्रहः ।
वाधूलवरदार्येण क्रियते भगवन्मुदे ॥

श्रीपञ्चरात्रमार्गेषु कण्टका निहिताः परैः ।
तत्र सञ्चरतां पुंसां प्रीत्यै तानुद्धराम्यहम् ॥

पञ्चरात्राभिधं तन्त्रं नारायणमुखोद्गतम् ।
मानवादेर्विशेषेण मानतां प्रतिपद्यते ॥

ननु पञ्चरात्रप्रामाण्यमनुपपन्नम् ;

मूलाभावाद्विरुद्धत्वाद्विद्यास्थानेष्वसंग्रहात् ।
वैदिकैरगृहीतत्वादवैदिकपरिग्रहात् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

प्रसिद्धेतिहासपुराणादिवचनविरुद्धानां तथाभूतवचनानामनादरणीयत्वात् अन्ये . . . . . पद्वाश्वागमप्रामाण्यादौ निरस्ता इत्युपरम्यते ॥

श्रीपञ्चरात्रशास्त्रस्य श्रुतिस्मृत्यविरोधिनः ।
तत्त्वविद्वज्जनन्यायैः प्रामाण्यमुपपादितम् ।

**Colophon:**

इति श्रीपञ्चरात्र(स्थ)कण्टकोद्धारसङ्ग्रहः ।
कृतोऽयं विदुषां प्रीत्यै श्रुतिस्मृतिपुरस्सरः ॥

---

No. **5280.** पाञ्चरात्ररक्षा.

PĀÑCARĀTRARAKṢĀ.

Substance, palm-leaf. Size, 14 × 1⅝ inches. Pages, 166. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete in three Adhikāras.

A treatise in support of the authoritativeness of the Pāñcarātrāgama : by Vēdāntadēśika.

The work is divided into 3 chapters—1. Siddhāntavyavasthāpana, 2. Nityānuṣṭhānasthāpana, and 3. Nityavyākhyāna.

The transcription of this manuscript was completed by Vēdānta-Lakṣmaṇārya on the 27th of Kārttika in the year Saumya, Kali 4950.

**Beginning:**

श्रीमद्वेदान्तरामानुजगुरुतनयं तत्पदाम्भोजभृङ्गं
श्रीमच्छ्रीशैलवंशाभिधकलशपयोराशिराकासुधांशुम् ।
श्रीमद्वेदान्तरामानुजयतिचरणाम्भोजयुग्मावलम्बं
भक्त्याहं वेङ्कटश्रीवरदगुरुवरं सन्ततं भावयेयम् ।
श्रीमान् वेङ्कटनाथार्यः . . . सन्निधत्तां सदा हृदि ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चातुर्व्यूहं परं ब्रह्म षाड्गुण्यपरिकर्मितम् ।
पञ्चरात्रस्य कृत्स्नस्य प्रसूतिं पर्युपास्महे ।

अनन्यदेवतास्थायिन्यायते महिते वयम् ।
पञ्चरात्रमहाम्भोधिपारदृश्वनि सज्जने ॥

आरोहन्त्वनवद्यतर्कपदवीसीमादृशां मादृशां
पक्षे कार्तयुगे निवेशितपदान् पक्षे पतद्भ्यः परान् ।

सर्वानुश्रवसारदर्शिसशिरःकम्पद्विजिह्वाशन
क्रीडाकुण्डलमौळिरत्नघृणिभिस्साराविकास्सूक्तयः ॥

अत्र तावत्प्रत्यक्षितसमस्तवेदार्थतत्त्वस्थितिभिः पाराशर्यप्रभृतिभिः महाभारतादिषु भगवच्छास्त्रस्य सार्वभौमं प्रामाण्यं प्रत्यपादि । शारीरके च कपिलकणभक्षभिक्षुक्षपणकपशुपतिसमयप्रतिक्षेपसम(न)न्तरतन्त्रान्तरसहपाठादिसम्भवमन्दमतिव्यामोहशमनाय उत्पत्त्यसम्भवात्, न च कर्तुः करणमिति सूत्राभ्यां पूर्वपक्षमुपक्षिप्य विज्ञानादिभावे वा तदप्रतिषेधः, विप्रतिषेधाच्चेति सूत्रद्वयेन जीवोत्पत्त्याद्यनुपपत्तितत्प्रतिषेधप्रतिपादनद्वारेण सिद्धान्तस्समर्थितः ।

**End:**

अतो यथाधिकारं यथाशक्यमत्र श्रद्धधानैर्दयार्द्रहृदयदेशिकोपदेशपूर्वकमनुप्रविश्य देशकालदशाद्यानुगुण्येनाच्छिद्रं यथाक्रमं समाहृत्य चानुतिष्ठद्भिरनन्यप्रयोजनैः परमैकान्तिभिरनवधिकपरमपुरुषचरणपरिचर्यारूपमपवर्गैश्वर्यं यथारोग्यं यथायोग्यं चात्रैव भोक्तव्यमिति सिद्धम् ॥

सव्यं पादं प्रसार्य श्रृ(श्रि)तदुरितहरं दक्षिणं कुञ्चयित्वा
जानुन्याधाय सव्येतरमितरभुजं नागभोगे निधाय ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पश्चाद्बाहुद्वयेन प्रतिभटशमने धारयन् शङ्खचक्रे
देवीभूषादिजुष्टो जनयतु भजतां शर्म वैकुण्ठनाथः ॥

विदितनिगमसीम्ना वेङ्कटेशेन तत्त-
द्बहुसमयसमक्षं बद्धजैत्रध्वजेन ।
प्रतिपदमवधानं पुष्यतां सात्त्वतानां
परिषदि विहितेयं पाञ्चकाल(रात्र)स्य रक्षा ॥

कण्डूलाः कलिकज्जलाविलधियः केचिज्जडा निष्फलं
विक्रोशन्तु वियच्चरैस्सह बलिव्यत्यासवित्रासित(ा)ः ।
मोघाशापि तथाविधेष्ववितथेष्वार्येष्वमोघा भृशं
मुक्तैश्वर्यमहाफलोद्गमधिया चर्येयमाचर्यताम् ॥

त्यक्तं शास्त्रमलेपकप्रभृतिभिः किं तेन तस्यागतं
प्रद्विष्टं जगदेकचक्षुषि दिवाभीतैस्ततस्तस्य किम् ।
दुग्धं पित्तहतैर्जुगुप्सितमतस्तस्यापि किं दुर्जनै-
स्त्यक्तं चेदपि मत्कृतं सुरुचिरं किं देशिकैस्त्यज्यते ॥

**Colophon:**

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदा-न्ताचार्यस्य कृतिषु श्रीपाञ्चरात्ररक्षायां नित्यव्याख्यानाख्यस्तृतीयोऽधिक(ा)रः ॥

श्रीपाञ्चरात्ररक्षा लिखिता श्रुत्यन्तलक्ष्मणाख्येन ।
पठितव्या द्विजवर्यैर्दातव्या तत्समक्षमेवेयम् ॥

यदि पर[म]भागवतत्वव्यक्षकाचिद्धिनैर्हृता सा स्यात् ।
तेषामुत्तरजन्मन्यामरणान्तं च मूकता भविता ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5281. पाञ्चरात्ररक्षा.

## PĀÑCARĀTRARAKṢĀ.

Substance, palm-leaf. Size, $17\frac{1}{8} \times 1\frac{1}{2}$ inches. Pages, 198. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete.

Same work as the above.

---

## No. 5282. पाञ्चरात्ररक्षा.

## PĀÑCARĀTRARAKṢĀ.

Pages, 154. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 4881.

Complete.

Same work as the above.

---

## No. 5283. पाञ्चरात्ररक्षाहृदयम्.

## PĀÑCARĀTRARAKṢĀHṚDAYAM.

Substance, paper. Size, $13\frac{1}{2} \times 8\frac{1}{2}$ inches. Pages, 298. Lines, 24 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

This gives the substance of the Pāñcarātrarakṣā described under the previous number: by Rāmānujavipaścit.

**Beginning:**

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥
श्रीमत्पद्मसरस्तीरकल्पवल्लीमुपास्महे ।
विरक्ताश्चानुरक्ताश्च यतोऽभिलषितं विदुः ॥
वैपञ्ची नवकाकलीति मुनिना वीणारवोल्लासिना
माद्यत्कोकिलमञ्जुपञ्चम इति व्याधाङ्गनाभिश्श्रुतः ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गोपस्त्रीभिरुदारमन्मथधनुष्टङ्कार इत्यादरात्
रासे वल्लवतल्लजस्य मुरलीनादो विनोदाय नः ॥

फक्कत्कौरवपत्तनप्रभृतयः प्रास्तप्रलम्बादयः
तालाङ्कस्य तथाविधा विहृतयस्तन्वन्तु भद्राणि नः ।

क्षीरं शर्करयेव याभिरपृथग्भूताः प्रभूतैर्गुणै-
राकौमारकमस्वदन्त जगते कृष्णस्य ताः केलयः ॥

अस्मद्गुरून् पर[म]गुरून् श्रुत्यन्ताचार्यलक्ष्मणमुनीन्द्रौ ।
श्रीयामुनार्यनाथौ शठरिपुसेनेशजलधिजाश्रीशान् ॥

आनम्य वङ्गिवंशामृतजलधेर्दिव्यकौस्तुभो विबुधः ।
रामानुजार्यनामा श्रुत्यन्ताचार्यचरणदासोऽयम् ॥

तदनुग्रहस्य भूम्ना विद्वद्भिर्लालनीयमिदम् ।
श्रीपाश्चरात्ररक्षाहृदयं तनुते प्रमोदेन ॥

ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतिम् ।
आधारं सर्वविद्यानां हयग्रीवमुपास्महे ॥

अत्र तावत् पराशरपाराशर्यादिवत् स्वयोगमहिमसाक्षात्कृतसमस्त-वेदार्थतत्त्वः परमकारुणिको भगवान् भाष्यकारः तथाविधानमेव पूर्वाचार्याणां सम्प्रदायं प्रमाणपदवीश्चानुसृत्य संसृत्यर्णवमग्नस्वशिष्यजनपरम्परोद्दिधीर्षया प्रापकत्वप्राप्यत्वोपयुक्तपुरुषकारसम्बन्धिगुणरूपोपकारादिविशिष्ट-शरण्यप्रतिपत्तिप्रकाशकमन्त्ररत्नविवरणमन्त्रभूतैर्गद्यैः स्वानुष्ठानमुखेनान्तिम युगपरमैकान्तिनः प्रपत्तिरेवापवर्गसाधनमिति प्रकाश्य ।

**End**:

अतो वर्णाश्रमद्रव्यकालविशेषानादरेण यथोपनीतैः द्रव्यादिभिः श्रद्धावतामेवाधिकारोक्तेरन्तिमयुगेऽपि ईदृगधिकारिणस्सुलभा एवेति नैतत्प्रबन्धनिर्माणायासवैयर्थ्यमिति सर्वमनवद्यम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीपाञ्चरात्ररक्षाया हृदये सद्गुणोदये ।
अष्टमः पटलो ह्येष योगाख्यस्सुनिरूपितः ॥

इत्थं देशिकसार्वभौमसरणीमालोच्य सन्दर्शिता
तत्ताद्दग्विधपञ्चकालविध(ष)या नित्यक्रियापद्धतिः ।
सन्तस्सारविदो विदन्तु सुतरां मोदन्तु शङ्काकलिं
मुञ्चन्त्वद्य समाचरन्तु करुणासाराः प्रसीदन्तु मे ॥

श्रीनिवासगुरुराट्समीरितो राघवानुजसुधीर्यदाश्रितम् ।
देशिकेन्द्रहृदयानुसारतः पाञ्चकालिकविधिं त्वतीतनत् ॥

श्रीपाञ्चरात्ररक्षाया हृदयं सद्गुणोदयम् ।
समगृह्यत सङ्क्षेपाद्रामानुजविपाश्रिता ॥

श्रीमत्पद्मसरस्तीरवासिना सत्कृपाजुषा ।
सद्भिः सदा तदास्वाद्यं सादरं सारवित्तमैः ॥

श्रीनिवासगुरवे गरीयसे राघवार्यगुरवे महीयसे ।
वेदमौलिगुरवे दयाऽधये सन्ततं हृदि नमो विभावये ॥

**Colophon:**

श्रीपाञ्चरात्ररक्षाहृदयं समाप्तम् ॥

---

No. **5284.** पाञ्चरात्रागमः—प्रदीपिकासहितः.

PĀÑCARĀTRĀGAMAḤ WITH PRADĪPIKĀ.

Substance, palm-leaf. Size, $15\frac{3}{8} \times 1\frac{3}{8}$ inches. Pages, 56. Lines, 6 on a page. Character, Kanarese. Condition, good. Appearance, old.

Adhyāyas 1 to 8.

Begins on fol. 12*a*. The other work herein is Mayaśilpa 1*a*. With Telugu Ṭīkā.

Deals specially with the characteristics of the images consecrated for worship in temples.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



The commentary is by Peddanācārya : it is also called Mantra-dīpikā and is in Telugu.

**Beginning:**

ब्रह्मोवाच—

भगवन् देवदेवेश प्रतिमालक्षणं मम ।
सुविस्तरं यथा ब्रूहि श्रोतुमिच्छामि तत्परः ॥

श्रीभगवानुवाच—

प्रतिमां नालयेत्पूर्वः(र्वे)वक्ष्ये कृत्वा तु लक्षणः(म्) ।
चिन्तयन् कृततन्निश्चेत् चित्तस्थैर्यमवाप्नुयात् ॥
स्थितेऽपि स्थिरतान्नैव क्लेशदानमवाप्नुयात् ।
क्षणक्लेशश्च पुरुषः पतन्निर्वाणमश्नुते ॥
विरक्तमूलता याति त(य)स्मादर्चा कृते(ता) सति(ती) ।
तस्मादर्चां प्रकुर्वीत चित्तस्यालम्बनाय वै ॥
रत्नलोहशिलामृत्स्नादारुस्फटिकमेव च ।
षड्वाचानिणि(ड्द्रव्याणि)प्रशस्तानि प्रतिमाकर्मणि द्विज ॥

* * * *

इति श्रीपेद्दनाचार्यविरचितायां मन्त्रदीपिकायां (पाञ्चरात्रप्रदीपिकायां महोपनिषत्पाञ्चे तन्त्रे क्रियापादे) शिलासङ्ग्रहलक्षणं नाम प्रथमोऽध्यायः ॥

* * * *

इति श्रीपेद्दनाचार्यविरचितायां मन्त्रदीपिकायां शिलासङ्ग्रहलक्षणं नाम प्रथमोऽध्यायः ॥

* * * *

इति पाञ्चरात्रप्रदीपिकायां महोपनिषत्पाञ्चे तन्त्रे क्रियापादे दारुसङ्ग्रहणं नाम द्वितीयोऽध्यायः ॥

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति श्रीपेद्दनाचार्यविरचितायां पाश्वरात्रप्रदीपिकायां दारुसङ्ग्रहणं नाम द्वितीयोऽध्यायः ॥

* * * *

इति श्रीपाश्वरात्रप्रदीपिकायां महोपनिषत्पाञ्चे तन्त्रे क्रियापादे प्रतिमालक्षणं नाम तृतीयोऽध्यायः ॥

* * * *

इति श्रीपेद्दनाचार्यविरचितायां पाश्वरात्रप्रदीपिकायां मन्त्रदीपिकायां प्रतिमालक्षण नाम तृतीयोऽध्यायः ॥

* * * *

इति श्रीपेद्दनाचार्यविरचितायां पाश्वरात्रप्रदीपिकायां प्रतिमासङ्ग्रहजलाधिवासो नामाष्टमोऽध्यायः ॥

**End:**

भगवानुवाच—

देवस्य दक्षिणे पार्श्वे सुखासनगतो गुरुः ।
पुण्याहं वाचयित्वा तु ब्रह्मणेच तन्मुतायच(ब्राह्मणैस्तन्मुखेन च) ॥

श्रीभगवानुवाच—

हविष्यभुग्.

---

## No. 5285. पाश्वरात्रागमः.

## PĀÑCARĀTRĀGAMAḤ.

Substance, paper. Size, $8\frac{1}{2} \times 6\frac{1}{2}$ inches. Pages, 192. Lines, 16 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains the Pūjāvidhi and Pratiṣṭhāvidhi.

Deals specially with the conduct of the worship of Viṣṇu in the Dhanurmāsa—December and January.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

अथातस्संप्रवक्ष्यामि मार्गशीर्षोत्सवं परम् ।
कोदण्डस्थे सवितरि तत्काले सङ्क्रमो भवेत् ॥
स्नपनं विधिवत्कृत्वा मध्यमोत्तमवर्त्मना ।
संस्नाप्य देवदेवेशं वासोभिर्भूषणैस्तथा ॥
विविधैः पुष्पमालाभिर्गन्धैः कर्पूरमिश्रितैः ।
विष्वक्सेनं तथा भक्तान् बिम्बान् संस्थाप्य पूजयेत् ॥
मुद्गान्नं पायसं चैव शर्कराघृतसंयुतम् ।
फलैर्नानाविधैर्भक्ष्यैर्विनिवेद्य मधुद्विषः ॥

**End:**

यथासङ्ख्यं क्रमेणैव[जु]हुत्वादि(चैव)यथाक्रमम् ।
चित्रान्नं पायसं गौल्यं शुद्धान्नं दाधिकं तथा ॥
निवेदयेत्तु देवेशमुत्थाप्य प्रणवेन तु ।
पाद्यमर्घ्यं तथाचामं दत्वास्मै विनिवेदयेत् ॥
दध्योदनं निवेद्याथ सोपदंशं घृताप्लुतम् ।
पुनराचमनं दद्यात् मुखवासन्तु.

---

No. **5286.** पाञ्चरात्रागमः.

PĀÑCARĀTRĀGAMAḤ.

Substance, palm-leaf. Size, $13\frac{1}{2} \times 1\frac{1}{4}$ inches. Pages, 82. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, old.

Wants beginning and end.

Deals specially with the Mudrās used in connection with the worship of Viṣṇu in temples.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

. . . . . . . . संयुता ॥
उभयाङ्गुष्टमुद्रा सा कथिता तव सुव्रत ।
करद्वयेन श्रवसी पिधायैकं प्रसारयेत् ॥
दक्षिणं सा भवेन्मुद्रा पितृणामभिवादने ।
विन्यस्य वामश्रवणे वामहस्ताङ्गुलीस्तथा ॥
प्रसारयेत्करं चान्यं विघ्नराजस्य मुद्रिका ।
अङ्गुष्ठयुगलं मध्ये तर्जन्योस्संहरेद्द्वयोः ॥
एषा भगवती मुद्रा कथिता द्विजपुङ्गव ।
परागमुद्रा कथिता करयोस्संपुटे कृते ॥
स्मृत्वा तु दक्षिणकरे रक्तं सरासिजं पुनः ।

* * *

**Colophon:**

इति श्रीपाञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे विश्वामित्रसंहितायां मुद्राविधिर्नाम त्रयोदशोऽध्यायः ॥

**End:**

दक्षाङ्गुष्ठे पराङ्गुष्ठं क्षिप्त्वा हस्तद्वयेन तु ।
सावकाशामेकमुष्टिं कुर्यात्सा कुम्भमुद्रिका ॥
अधोमुखे वामहस्ते ऊर्ध्वास्यं दक्षहस्तकम् ।
क्षिप्त्वाङ्गुलीरङ्गुलीभिस्संयोज्य परिवर्तयेत् ॥
प्रोक्ता संहारमुद्रेयमर्पणे तु प्रशस्यते ।

**Colophon:**

इति श्रीमन्त्रदेवताप्रकाशिकायां मुद्राविधिष्षष्ठः पटलः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. **5287.** पाश्चरात्रागमः.

PĀÑCARĀTRĀGAMAḤ.

Substance, palm-leaf. Size, 10 × 1¼ inches. Pages, 57. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Incomplete.

The portion relating to Dēvapūjā which is complete deals specially with the preliminary processes to be gone through prior to the conduct of worship.

**Beginning:**

पादौ प्रक्षाळ्याचम्य, देवगृहसमीपं गत्वा तत्तद्वारश्रियं नत्वा जयं च बिजयं च तथा बलं च प्रबलं च द्वारपालांश्च पूजयेत् । वायवायाहि वीतये गृणानो हव्यदातये । नि होता सत्सि बर्हिषि इति द्वारदेवतां वायुं प्रार्थ्य, ताळत्रयेण देहळीमुपस्पृश्य, टङ्कमुद्रया कवाटोत्पाटनं कृत्वा, लोकस्य द्वारमर्चिमत्पवित्रम् । ज्योतिष्मद्भ्राजमानं महस्वत् । अमृतस्य धारा बहुधा दोहमानम् । चरणं नो लोके सुधितां दधातु पूर्वद्वारे द्वारश्रियै नमः । जयाय नमः । विजयाय नमः । दक्षिणद्वारे बलाय नमः । प्रबलाय नमः ।

**End:**

हरिर्हि सर्वदेवानां परमः पूर्णश . . . . ।
स्वतन्त्रोऽन्ये तद्वशा हि सर्वतस्स जगद्गुरुः ॥

ब्रह्मादयश्च तद्भ(क्त)भागिनो भोगमोक्षयोः ।
तस्माद्ध्येयश्च पूज्यश्च वन्द्यो ध्येयस्स(नातनः) ॥

**Colophon:**

इति पूजाध्यायं(यः) सम्पूर्णम्(ः) ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5288. पाञ्चरात्रागमप्रामाण्यम्.

## PĀÑCARĀTRĀGAMAPRĀMĀṆYAM.

Substance, paper. Size, 11⅛ × 8⅞ inches. Pages, 35. Lines, 18 on a page. Character, Devanāgarī. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Pramāṇasāmānyaviśēṣalakṣaṇa 21*a*, Padārthasaṅgraha 49*a*, Māyāvādakhaṇḍanapañcikā 69*b*.

Complete

A work on the authoritativeness of the Pañcarātrāgama: by Bhaṭṭāraka-Śrī-Vēdōttama.

**Beginning:**

अलक्षितं यत्पदमन्तरिक्षे भुवस्स्थलं वै यदधश्चकार ।
बिभेद यच्चाण्डकपालमूर्ध्वं तत्पातु विश्वं पदमच्युतस्य ॥

इह पाञ्चरात्रतन्त्रं विषयः ; तत्किं प्रमाणमप्रमाणं वेति संशयः । किमत्र संशयकारणम् ? उभयपक्षगता युक्त्योऽनिर्धारितविशेषास्संशयकारणम् । तत्र त्रयीविद्भिरत्यन्तापरिगृहीतत्वात् धर्मप्रमाणत्वेन शिष्टैः परिगृहीतचतुर्दशविद्यास्थानेषु पञ्चरात्रतन्त्रस्यापरिगृहीतत्वाच्च त्रयीबाह्यशाक्यदिगम्बरपाशुपतादितन्त्रवत्पञ्चरात्रतन्त्रमप्यप्रमाणमिति पूर्वः पक्षः । सर्वलोकादर्शभूतनारदादिशिष्टपरिगृहीतत्वात्परिगणितशास्त्रानन्तर्भूतत्वेऽपि द्वैपायनवाल्मीकिप्रणीतभारतरामायणादिग्रन्थवत् प्रमाणत्वोपपत्तेर्वेदसंयोगिमनुगौतमादिपुरुषप्रणीतवचनवत् पञ्चरात्रतन्त्रमपि प्रमाणमिति सिद्धान्तः ।

**End:**

तदा भगवदाराधनयोग्यद्रव्येण भगवन्तमाराध्य पुनर्भक्षयेन्नि(न्नै)वेद्यमित्यलमतिविस्तरेण तस्मात्पञ्चरात्रतन्त्रं प्रमाणमिति सिद्धान्तः ॥

**Colophon:**

इति श्रीभट्टारकश्रीवेदोत्तमविरचितं तन्त्रशुद्ध्याख्यं प्रकरणं समाप्तम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. **5289.** पाञ्चरात्रागमसङ्ग्रहः.

PĀNCARĀTRĀGAMASAṄGRAHAḤ.

Substance, palm-leaf. Size, $15\frac{3}{4} \times 1\frac{5}{8}$ inches. Pages, 42. Lines, 7 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Bhagavadārādhanakrama 22*a*.

Incomplete.

A summary of the Pāñcarātrāgama.

**Beginning :**

अथात्र भगवतो वासुदेवस्य प्रतिष्ठाप्रोक्षणविधिं ग्रामशान्तिपुरस्सरं व्या(ख्यास्यामः)—

(उद)गयन आपूर्यमाणपक्षे पुण्ये नक्षत्रे तत्र कर्ता मङ्गलस्नानं कृत्वा विद्वद्भिर्ब्राह्मणैस्सह स्वस्तिमङ्गलसहि . . . . . . . गत्वा श्रुतवृत्तसम्पन्नं विधानज्ञमर्चकमाहूयास्य देवदेवस्येदं कर्म कुर्विति आचार्यत्वेन नियोजयेत् ।

**End :**

श्रीमन्नियतपञ्चाङ्गं मद्रक्षणभरार्पणम् ।
अचीकरस्स्वयं स्वस्मिन्नतोऽहमिह निर्भरः ॥
संसारावर्तवेगप्रशमनशुभदृग्देशिकप्रेक्षितोऽहं
सन्त्यक्तोऽन्यैरुपायैरनुचितचरितेष्वद्य शान्ताभिसन्धिः ।
निश्शङ्कस्तत्त्वदृष्ट्या निरवधिकदयम्.

---

No. **5290.** पाद्मतन्त्रम्.

PĀDMATANTRAM.

Substance, palm-leaf. Size, $15\frac{1}{2} \times 1\frac{3}{4}$ inches. Pages, 294. Lines, 10 on a page. Character, Grantha. Condition, injured. Appearance, old.

Adhyāyas 1 to 33 in Caryāpāda complete.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Forms part of Pāñcarātrāgama; deals with the various ceremonies to be performed in establishing a temple for public worship —from the building of a temple to the completion of the ceremony called Kumbhābhiṣēka.

**Beginning:**

ब्रह्मोवाच—

कर्षणादिप्रतिष्ठान्तं कर्म यत्तत्प्रसिद्धये ।
तं समाराधनविधिं श्रोतुमिच्छामि सांप्रतम् ॥

* * *

भगवंस्तदशेषेण ब्रूहि नो भक्तवत्सल ॥

श्रीभगवान्—

श्रूयतामभिधास्यामि पृष्टं निरवशेषतः ।
आद्यमेकायनं वेदं सद्ब्रह्मप्रतिपादकम् ॥

तेनैव संस्कृता विप्रा मुख्यकल्पाधिकारिणः ।
अन्येषां ब्राह्मणादीनां वर्णानां दीक्षया क्रमात् ॥

अधिकारोऽनुलोमानामपि नान्यस्य कस्य चित् ।
पूजाविधौ भगवतः तेऽनुकल्पाधिकारिणः ॥

प्रतिलोमभुवां सूत प्रथमस्तत्र शस्यते ।
त्रयाणां क्षत्रियादीनामनुलोमभुवामपि ॥

सूतस्य च विशेषेण दीक्षा स्वार्थपरानिशम् ।
परार्थयजनं कुर्युः विप्रा मुख्यानुकल्पयोः ॥

* * * *

भगवन् ब्राह्मणादीनां जन्मकर्म च भाविकम् ।
विहितश्च विवाहश्च यच्च यावच्च यादृशम् ॥

मह्यं जिज्ञासमानाय भक्ताय परमेश्वर ।
तदशेषं यथातत्त्वमुपदेष्टुं त्वमर्हसि ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीभगवान्—
सत्त्वं रजस्तमश्चेति त्रैगुण्यं कमलासन ।
तन्मयीं तनुमास्थाय ससर्जाहं पुरा किल ॥
सत्त्वेऽधिके मुखाद्विप्रानसृजं मिथुनात्मकान् ।
रजोगुणेऽतिशयिते बाहुभ्यां क्षत्रियांस्ततः ॥

**End:**

भवन्तोऽपि यतात्मानो भक्तिमन्तो जनार्दने ।
केन वा कथितं शास्त्रमृषयः कल्मषापहम् ॥
इमं महोपनिषदं श्रद्दधानश्शृणोति यः ।
स याति शाश्वतं ब्रह्म दुष्प्रापमकृतात्मभिः ॥
येन मां प्रथयामास यया पद्मगुरोर्गुरुः(?) ।
तेनेदं (यं)हूयते पुण्यामतनोत्पद्मसंहिताम् ॥
ऋषयस्तं भवन्तोऽपि भजन्तु पुरुषोत्तमम् ।
प्रदास्यति स युष्मभ्यमपवर्गं तपोधनाः ॥
इत्यध्यायस्त्रयस्त्रिंशच्चर्यापादः प्रकीर्तितः ।

**Colophon:**

इति श्रीपञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे चर्यापादे समाराधनाङ्गमन्त्रोद्धारो नाम त्रयस्त्रिंशोऽध्यायः ॥

---

No. **5291.** पाद्मतन्त्रम्.
PĀDMATANTRAM.

Substance, paper. Size, 12 × 9½ inches. Pages, 351. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 53*a*. The other works herein are Aṣṭakavarga 1*a*, Āgamasāra 4*a*, Śivaliṅgapratiṣṭhākrama 11*a*, Grāmadēvatāpratiṣṭhā 31*b*.

Adhyāyas 1 to 33 complete.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5292. पाद्मतन्त्रम्.

## PĀDMATANTRAM.

Substance, palm-leaf. Size, 15⅜ × 1½ inches. Pages, 265. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Adhyāyas 1 to 23 complete, 24th incomplete.

Same work as the above.

---

## No. 5293. पाद्मतन्त्रम्.

## PĀDMATANTRAM.

Substance, paper. Size, 11¾ × 9¼ inches. Pages, 236. Lines, 22 on a page. Character, Grantha. Condition, good. Appearance, new.

Contains 12 Adhyāyas of the Jñānapāda, 5 Adhyāyas of Yōgapāda and 32 Adhyāyas of Kriyāpāda.

Forms part of the Pāñcarātrāgama.

**Beginning:**

आसीनमाश्रमे कण्वं कण्वाश्रमनिवासिनः ।
निश्श्रेयसकरं कर्म प्रष्टुमारेभिरे मुनिः(म्) ॥

ऋषयः—

अधीताः कण्व भगवन् साङ्गोपाङ्गास्सविस्तराः ।
वेदास्त्वत्तस्तदर्थानि शास्त्राणि च यथातथम् ॥
एतेषु यदधीतेषु कैवल्याय न कल्पते ।
कारणं तदपि त्वत्तश्श्रोतव्यं नान्यथा गतिः ॥

कण्वः—

श्रूयतां मुनयस्सर्वे यथापूर्वं मया श्रुतम् ।
उपसङ्गम्य संवर्तमृषिमर्कमिवापरम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रदीप्तमेतमेवार्थं पृष्टवानभिवाद्य तम् ।

* * *

मह्यं शुश्रूषमाणाय प्रत्युवाच यथातथम् ॥

**Colophon:**

इति श्रीपाञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे ज्ञानपादे शास्त्रावतार-कथनं नाम प्रथमोऽध्यायः ॥

* * *

**Colophon:**

इति श्रीपाञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे ज्ञानपादे भुवर्लोकादि-विस्तारकथनं नाम द्वादशोऽध्यायः ॥

* * *

**Colophon:**

इति श्रीपाञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे योगपादे आसनभेद-लक्षणं नाम प्रथमोऽध्यायः ॥

* * *

**Colophon:**

इति श्रीपाञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे योगपादे योगलक्षणं नाम पञ्चमोऽध्यायः ॥

* * *

**Colophon:**

इति श्रीपाञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे क्रियापादे भूपरीक्षा-विधिर्नाम प्रथमोऽध्यायः ॥

**End:**

ब्राह्मणाय प्रसन्नाय श्रोत्रियाय च धीमते ।
यद्वा ज्येष्ठाय पुत्राय न विद्यामरये वदेत् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नमो ब्रह्मण्यदेवाय श्रीधरायाऽव्ययात्मने ।
ऋग्यजुस्सामरूपाय शतरूपाय विष्णवे ॥

**Colophon:**

इति श्रीपाञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे क्रियापादे संवर्तप्रोक्तायां संहितायां गृहार्चादिस्थापनविधिर्नाम द्वात्रिंशोऽध्यायः ॥

---

No. 5294. पाद्मतन्त्रम्.

PĀDMATANTRAM

Substance, palm-leaf. Size, 14½ × 1½ inches. Pages, 514. Lines, 9 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Contains the Pādas Yōga, Jñāna, Kriyā and Caryā.

Fragmentary.

Same work as the above.

---

No. 5295. पाद्मप्रयोगः.

PĀDMAPRAYŌGAḤ.

Substance, palm-leaf. Size, 15⅛ × 1⅜ inches. Pages, 110. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

From Samārādhanavidhi to Puṇyāhavācanavidhi.

On the mode of performing Pūjā to the minor images surrounding Dēvarāja-svāmi in the temple at Kāñcīpuram.

**Beginning:**

श्रीदेवराजस्वामिनः पश्चिमाभिमुखस्य चतुराव(र)णयुक्तस्य मन्दिरस्य परिवारार्चनप्रयोगो वक्ष्यते । गर्भगृहद्वारे अधश्शाखायाम् ओं शक्त्यै नमः, दक्षिणशाखायां वाग्देव्यै नमः, (उ)परि श्रियै नमः, उत्तरशा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



खायां रत्यै नमः, गर्भगृहद्वारोभयपार्श्वयोः, दक्षिणे चण्डाय, वामे प्रचण्डाय, अर्धमण्टपद्वारे दक्षिणे चक्रोत्तमाङ्गिने, वामे शङ्खोत्तमाङ्गिने, विमानदक्षिणभागे उदङ्मुखः स्थित्वा ओं विष्णवे प्रासादरूपिणे हुंफट्स्वाहा—इति विमानम् ।

**End :**

आचार्यदक्षिणां दत्वा ऋत्विजस्संपूज्य, तेभ्योऽपि दक्षिणां दत्वा ततो ब्राह्मणेभ्यो यथाशक्ति दक्षिणां दद्यात् । पुण्याहवाचनप्रयोगो वक्ष्यते । विष्णुगायत्र्या गलन्तिकां प्रक्षाल्य, प्रणवेनाम्बुपूरितां कृत्वा.

---

## No. 5296. पाद्मसंहितातन्त्रम्.
## PĀDMASAṀHITĀTANTRAM.

Substance, paper. Size, 13⅝ × 1 inches. Pages, 244. Lines, 20 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Contains Adhyāyas 25 complete.

Deals with the mode of performing religious festivals in temples.

**Beginning :**

शङ्खचक्रधरं विष्णुं चन्द्रकोटिसमप्रभम् ।
चतुर्भुजं पीतवासं सर्वाभरणभूषितम् ॥
प्रसन्नसौम्यवदनं विष्वक्सेनं नमाम्यहम् ।

भगवदुत्सवप्रारम्भप्रकरणम्—

अङ्कुरार्पणदिवसे प्रातःकाले यजमान आचार्यशिष्यब्रह्मऋत्विक्परिचारकैस्सह स्नात्वा यागशालां प्रवे(वि)श्य स्वगुरुं ध्यात्वा भगवत्प्रार्थनं कुर्यात् । यजमानादय आचार्यब्रह्मऋत्विग्वरणं निश्चयित्वा.

**End :**

एवमेव प्रकारेण सर्वालङ्कारमेव च ।
पनराराधनश्चैव महाहविनि(र्नि)वेदयेत् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ब्राह्मणान् भोजयेच्चैव सहस्रं शतमेव वा ।
तदर्धं वा तदर्धं वा यथावित्तानु दक्षिणा ॥
तत्कर्म विपरीतेन तत्फलश्च विनश्यति ।
तस्मात्सर्वप्रयत्नेन यथाविधि समाचरेत् ॥
तत्फलं लभते तत्र तद्ग्रामं(सग्रामो)विजयी भवेत् ।
सर्वसंपत्करं सौख्यं धनधान्यगवादिकम् ॥

**Colophon :**

इति श्रीपाश्चरात्रे सनत्कुमारसंहितायां संक्षेपप्रोक्षणं नाम पञ्चविंशोध्यायः ॥

---

No. **5297.** पारमेश्वरसंहिता.

PĀRAMEŚVARASAṀHITĀ.

Substance, paper. Size, 13¼ × 8¼ inches. Pages, 670. Lines, 26 on a page. Character, Grantha. Condition, good. Appearance, new.

Adhyāyas 1 to 19 contain Jñānakāṇḍa and Kriyākāṇḍa.

Forms part of Pāñcarātrāgama.

**Beginning :**

नमस्सकलकल्याणदायिने चक्रपाणये ।
विषयार्णवमग्नानां समुद्धरणहेतवे ॥
तोताद्रिशिखरक्षेत्रे सर्वक्षेत्रेषु पूजिते ।
पुण्यतीर्थसमायुक्ते दरीप्रस्रवणान्विते ॥
नानावृक्षसमायुक्ते नानापुष्पलताकुले ।
नानामृगगणाकीर्णे नानापक्षिसमाकुले ॥
प्रशस्ताश्रमसंयुक्ते प्रशस्तवनसंयुते ।
देवदानवगन्धर्वकिन्नरोरगसङ्कुले ॥

* * *



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राजर्षिभिस्समायुक्ते मन्त्रसिद्धैर्महात्मभिः ।
आवृते पुण्यशिखरे वासुदेवास्पदे शुभे ॥
सनको नाम योगर्षिः ब्रह्मपुत्रो महातपाः ।
भगवज्ज्ञानसिध्द्यर्थं तपस्तेपे सुदुष्करम् ॥
शतवर्षं ध्यायमानः परमात्मानमात्मनि ।
न लेभेऽभिमतं सोऽत्र ततो घोरतरं तपः ।
चकार सुचिरं कालं न लेभेऽभिमतं मुनिः ॥
शोकेन महताविष्टो बभूव सनकस्तदा ।
ततश्शोकार्णवे मग्नं जितक्रोधं जितेन्द्रियम् ॥
सनकं मुनिशार्दूलं भगवान् भक्तवत्सलः ।
सुप्रसन्नो जगद्धाता जगाद जगतो हितम् ॥
वासुदेवः परं ज्योतिरदृश्यः पुरुषोत्तमः ।

श्रीभगवान्—

त्वया योगि[illegible]वरेणेह सुतप्तं तप उत्तमम् ।
प्राप्स्यसे न[illegible]चिराद्ब्रह्मन् महतस्तपसः फलम् ॥
समाश्वसिहि भद्रं ते मा विषीद महामते ।
कृतकृत्यो जगत्यस्मिन् शाण्डिल्यः श्रूयते महान् ॥
तमाश्रयस्व भद्रं ते भगवद्धर्मसिद्धये ।

* * *

**Colophon:**

इति श्रीपाञ्चरात्रे ज्ञानकाण्डे शास्त्रावतारो नाम प्रथमोऽध्यायः ॥

**End:**

. . . . . . . . यन्त्रवरस्य मध्ये ।
तस्यापराङ्केऽत्र हरिं विधाय कराम्बुजैश्चक्रधरैश्चतुर्भिः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गर्भावृतिद्वारि(र)गवाक्षयुक्तप्रासादमध्ये विधिवन्निवेश्य ।
समर्चयेद्यो विजयी स भूत्वा भुनक्ति भोगानखिलानिहैव ॥

**Colophon:**

इति श्रीपाञ्चरात्रे पारमेश्वरे क्रियाकाण्डे प्रायश्चित्तविधानं नाम एकोनविंशोऽध्यायः ॥

---

No. **5298.** पुरुषकारमीमांसा.
PURUṢAKĀRAMĪMĀṀSĀ.

Pages, 24. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 3981.

Incomplete.

A work which discusses whether goddess Lakṣmī has a hand in the salvation of the world or not. The author is of opinion that God Viṣṇu is reached only through the mediation of Lakṣmī.

**Beginning:**

स्वतन्त्रस्स्वेच्छया सृष्टिस्थितिसंहारमोक्षणैः ।
यत्समक्षं क्रीडतीशस्तां भजे लोकमातरम् ॥
स्वयंव्यक्ते रङ्गधाम्नि तल्पे वातूलतूलके ।
निवसन्तौ नमाम्याद्यौ जम्पती जनकौ विधेः ॥
श्रीपतिर्जगतो हेतुः प्रपत्तव्यो मुमुक्षुभिः ।
साक्षान्मोक्षप्रदश्चेति श्रुतिसूत्रादिषु स्थितम् ॥
पत्न्याः पतिवदीदृक्त्वमस्ति नेति निरूप्यते ।
कारणं जगतो लक्ष्मीः प्रपत्तव्या शरण्यवत् ॥
साक्षान्मोक्षप्रदात्री च पतिसाम्यागमादिभिः ।
त्रय्यन्तदेशिकस्यायं सिद्धान्त इति केचन ॥
ऊचुरत्र वदन्त्यन्ये त्रयीमौलिगुरोर्मतम् ।

**End:**

यदि नित्यं ततः किं स्यादथानित्यं ततोऽपि किम् ।
ईदृक्संशयविच्छेदस्तास्मिन्दृष्टे भविष्यति ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यदिदं रहस्यं विवृतं यच्च न्यूनं वचोऽधिकं यद्वा ।
कृपया तदिदं क्षमन्तां देवो देव्या च देशिकास्सन्तः ॥

---

## No. 5299. पूर्वाचार्यत्तनियन्.

## PŪRVĀCĀRYATTANIYAN.

Pages, 6. Lines, 5 on a page.

Begins on fol. 29*a* of the MS. described under No. 5236.

Incomplete.

Memorial stanzas in honour of the spiritual preceptors in the Śēṣārya family.

**Beginning:**

गोविन्ददेशिकपदाम्बुजचञ्चरीकं लो(का)र्यलब्धनिगमान्तयुगं सुशीलम् ।
शेषाद्रिनाथकरुणावरुणालयं तं शेषार्यवेङ्कटयतीश्वरमाश्रयेऽहम् ॥
शेषार्यवंशकलशोदधिपूर्णचन्द्रं शेषार्यदेशिकपदाम्बुरुहान्तरङ्गम् ।
शान्त्यादिसाधुगुणभूषणभूषिताङ्गं गोविन्ददेशिकमहं प्रणमामि मूर्ध्ना ॥

**End:**

शेषार्यान्वयवारिधीन्दुममलं श्रीश्रीनिवासात्मजं
लोकाचार्यकृपात्तवेदमकुटीयुग्मं दयासागरम् ।
यद्वद्रीशपदाब्जदत्ततुलसीपुष्पं तदद्रच्याश्रितं
वन्दे साधुवरं शमादिसहितं श्रीशैलवर्यं गुरुम् ॥

---

## No. 5300. प्रकाशसंहिता.

## PRAKĀŚASAMHITĀ.

Substance, paper. Size, 8¾ × 7 inches. Pages, 205. Lines, 12 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

On the process of the creation of the world as proceeding from Viṣṇu.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

ब्रह्मोवाच—

सर्वलोकेश्वरो विष्णुस्सृष्ट्याद्यष्टकृदीश्वरः ।
यथा ससर्ज निखिलं तन्मे ब्रूहि जगद्गुरो ॥

श्रीहंस उवाच—

नारायणोऽनन्तशक्तिः पूर्णानन्दोऽक्षरस्स्वराट् ।
ज्ञानानन्दात्मकानन्ततनुरासीदिति *श्रुतिः ॥
तस्य स्वतन्त्रस्य हरेस्साकल्येन महात्मनः ।
स्वरूपं नैव जानन्ति रमाब्रह्मादयोऽपि तु ॥
तथापि तत्प्रवक्ष्यामि यथा जानासि तत्त्वतः ।
पूर्णकामस्य तस्यास्य सृष्ट्यादेर्न प्रयोजनम् ॥

* * * *

तदा रमां विना कश्चिद(किञ्चिन्ना)न्यदासीन्महीतले ।
शून्यनाम्नश्शिशोर्गर्भे सर्वे जीवास्तदावसन् ।
तदूर्ध्वकुक्षिगो(गा)मुक्ताः प्रभवन्ति महालये ।
मुक्तियोग्या मध्यकुक्षौ नित्यबद्धास्तु नाभितः ॥
अधोऽसुराः कटितटे प्राप्तदुःखास्तदूर्ध्वगाः ।
वसन्ति क्लृप्तानन्दास्ते मुक्ता भुञ्जन्ति नेतरान् ॥

**End:**

सर्वलोकात्मकस्तस्य शिखाग्रे सत्यनामके ।
अद्य ब्रह्मांशतो जातो विष्णोर्नैव चतुर्मुखः ॥
सृष्टस्स्वयं द्रष्टुमिच्छन् चतुर्दिक्षु विधिर्हरिम् ।
मुखानि लेभे चत्वारि नापश्यद्दिक्षु वै स्वयम् ॥
ततस्तन्नाळमध्यान्तश्छिद्रादन्तर्गतो हरिम् ।
पश्यामि(मीति)तथा चक्रे न तत्राविन्ददीश्वरम् ॥

---

* स्मृतिः इति पाठान्तरम्.

For Private and Personal Use Only

सत्याधोभागसन्दष्टसंसृष्टाम्बुस्थ(ल)श्रिया ।
वायू रूपस्य या(यो)धाता भीतो विष्णोर्विभोरभूत् ॥

**Colophon:**

इति श्रीमत्परमतत्त्वनिर्णयप्रकाशसंहितायां प्रथमपरिच्छेदे पञ्चदशोऽध्यायः ॥

---

## No. 5301. प्रतिपुरुषभगवदाराधनसमर्थनम्.

## PRATIPURUṢABHAGAVADĀRĀDHANA-SAMARTHANAM.

Substance, palm-leaf. Size, 13⅛ × 1¼ inches. Pages, 50. Lines, 7 on a page. Character, Grantha. Condition, fair. Appearance, old.

Complete, but wants 10 leaves in the beginning.

Establishes the eligibility of every Śrī-Vaiṣṇava to perform the worship of Viṣṇu.

**Beginning:**

. . . . . . . . . . दर्शनात् ।

முறையாயினுலகெல்லாம் படைத்து इत्यादिना मुरैशब्दस्य कालविशेषवाचकत्वेन श्रवणात् அவர்களுடைய முறை; இவர்களுடைய முறை इत्यादिना मुरैशब्दस्य कालविशेषवाचकत्वेन व्यवहारदर्शनाच्च । सेवाकालोपसंहारकालीनगानविशेषो वा சாற்றுமுறை इत्यभिधीयते ।

**End:**

तस्मान्निखिलनिगमशिखरमुखरितनिजमहिमभगवदनन्तकल्याणगुणगणप्रतिपादकदृष्टादृष्टफलप्रदायकश्रीमद्द्राविडवेदाध्ययनविशेष एव सेवाकालः । स एव भगवद्यागः, तदेव भगवदाराधनं तच्च श्रीवैष्णवसंप्रदायेष्वेव प्रतिपुरुषमस्तीति सिद्धमिति निष्कण्टकोऽयं घण्टापथः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रतिपुरुषं भगवदाराधन(स्य)समर्थनम् ।
शुकवाक्यमिवाकर्ण्य कृपया परिपाल्यताम् ॥

---

No. 5302. प्रतिष्ठाप्रयोगः.

PRATIṢṬHĀPRAYŌGAḤ.

Pages, 81. Lines, 7 on a page.

Begins on fol. 38*b* of the MS. described under No. 5249.

Complete.

On the mode of consecrating divine images set up in Viṣṇu temples for purposes of worship: by Varada.

**Beginning:**

पाञ्चतन्त्रप्रकारेण बहुबेरशिलामये ।
प्रतिष्ठायाः प्रयोगोऽयं वरदेन विरच्यते ॥

प्रतिष्ठाकर्मणः पूर्वं दशाहे नवाहे सप्ताहे पञ्चाहे तृतीयेऽहनि वा यजमानश्शास्त्रोक्तलक्षणोपेतान् ब्राह्मणान् मधुपर्कविधानेन संपूज्य, अस्मिन् प्रतिष्ठाकर्मणि त्वामाचार्यं वृणे(इ)त्येकमाचार्यं वृत्वा ।

**End:**

गुरवे दक्षिणां दद्याद्गोभूहेमादिकं तथा ।
यथाविभवविस्तारं ततो हस्त्यादिवाहनम् ॥

आरुह्य धवळच्छत्रश्वेतचामरवीजितः ।
आचार्यचिह्नैरखिलैर्लक्षितो ब्राह्मणैस्सह ॥

रथयानेनाग्रहारं प्रादक्षिण्येन रथ्यया ।
गत्वा देवस्य सदनं प्रविशेत्स्वस्य धाम वा ॥

**Colophon:**

इत्याचार्याभिषेकविधिः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5303. प्रपत्तिप्रयोगः.

## PRAPATTIPRAYŌGAḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol 43*a* of the MS. described under No. 2965.

Incomplete.

On details regarding the performance of the ceremony of Prapatti.

**Beginning:**

शुक्लाम्बरधरमित्यादि । अस्य श्रीभगवतो महापुरुषस्य महाविष्णो-राज्ञया प्रवर्तमानस्य . . . . . . . . . . . .
भगवत्प्रयोजनार्थं भगवता स्वपादारविन्दयोः भरन्यासं कारयितुं प्रक्रम्य-माणोऽस्मि ।

**End:**

ओम् ओं नमः परायाष्टाक्षरबीजभूतायोङ्कारात्मने नारायणात्मने नम इति गुह्ये, ओम् ओं नमः परायाष्टाक्षरशक्त्यै परमात्मने नारायणात्मने नम इति पादयोः । अयं गुर्वादिन्यासः.

---

## No. 5304. प्रपत्त्यनुष्ठानप्रयोगः.

## PRAPATTYANUṢṬHĀNAPRAYŌGAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 7*a* of the MS. described under No. 3517.

Incomplete.

On the process of religiously surrendering one's self to Viṣṇu with a view to attain salvation.

**Beginning:**

श्रीपाञ्चरात्रे आनन्दसंहितायाम्—

चातुर्वर्ण्यप्रसूतानां . . . . . . . ।
(वैष्ण)वत्त्वे प्रपत्तिस्तु मुमुक्षूणामुदाहृता ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्यादिवचनानुसारेण सदाचार्यः . . . . . श्रमवर्णे जातो मानवः वैष्णवत्वे सति मुमुक्षुश्चेत् तं मुमुक्षायां बहुप्रकारेण परिशोध्य प्र(पत्त्या वा ब्र)ह्मविद्यामुखेन वा श्रीपराङ्कुशनाथयामुनयतीन्द्रादिप्रतिपत्तिं कारयेत् । तदशक्तौ स्वयमाचार्यस्तदर्थं प्रपत्तिं समाचरेत् ।

**End :**

तथैव सर्वदोषघ्नी प्रीतिस्सद्गुरुशिष्ययोः ।
विप्रादीनां विवाहादिष्वखिलेष्वपि कर्मसु ॥
तिथिनक्षत्रवारादेरुचिता ये गुणास्स्मृताः ।
सङ्ग्राह्यास्ते . . . . . तत्सकामपरम्.

---

No. 5305. प्रपत्त्युपायानुष्ठानप्रकारः.

PRAPATTYUPĀYĀNUṢṬHĀNAPRAKĀRAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 47*a* of the MS. described under No. 2965.
Incomplete.
Similar to the above.

**Beginning :**

भगवत्सन्निधिं गत्वा सङ्कल्प्य, गुरुपरम्परानुपूर्वीं प्रणम्य, स्वाचार्यं पुरस्कृत्यास्मदाचार्यान् विलोक्य, मम विज्ञापनं शृणु[ष्व]विज्ञाप्य . . . . . त्वां विना पुरुषकारमलभमानो मया भगवन्तं समाश्रयं कारयस्वेति प्रार्थयमानो महाविश्वासपूर्वकं भगवन्तं भगवत्समाश्रयणे पुरुषकारत्वेनानन्यशरणमहं प्रपद्ये ।

**End :**

अत्र द्वयोच्चारणम् । अत्र श्रीमन्नारायण इतः परं ममेष्टप्रापणानिष्टनिवृत्तौ च न कोऽपि भारः ।

यन्नित्यादि अहं मद्रक्षणभर इत्यादि संसारावर्तवेगेत्यादि ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5306. प्रपन्नगतिदीपिका.
## PRAPANNAGATIDĪPIKĀ.

Pages, 76. Lines, 6 on a page.

Begins on fol. 43*a* of the MS. described under No. 3063.

Complete.

A discussion as to whether the ceremony of Sapiṇḍīkaraṇa should be performed or not in the case of a person who is a Prapanna: by Vēdāntalakṣmaṇa of the family of Lakṣmīkumāratātārya.

**Beginning:**

वरदं द्विरदाद्रीशं करुणावरुणालयम् ।
प्रपन्नजनतानन्दपारिजातमुपास्महे ॥
त्र्यय्यन्तसूरिचरणौ शरणं वरयेऽन्वहम् ।
यत्सूक्तिभिः प्रपन्नानां गतिरद्यापि शोभते ॥
लक्ष्मीकुमारतातार्यवंश्यवेदान्तलक्ष्मणः ।
तातदासो वितनुते प्रपन्नगतिदीपिकाम् ॥
हेमाद्रिर्माधवाचार्यो विज्ञानेश्वरयोगिराट् ।
चन्द्रिकाकृत्सार्वभौमो वैद्यनाथाख्यदीक्षितः ॥
अन्येऽपि ग्रन्थकर्तारो बहवः परिकीर्तिताः ।
मीमांसावल्लभा धर्मशास्त्रतत्त्वार्थवेदिनः ॥
हिताय सर्वलोकानां प्रवृत्तैस्तैर्महात्मभिः ।
आवापोद्वापनिर्धूतशङ्कालेशमनोहरैः ॥
व्यासादिवचनैरेव प्रपन्नजनभीषिकाम् ।
उत्सारयामि निर्भीकास्सन्तु सन्तः क्षमातले ॥
छन्दोक्त्या च छलोक्त्या च सिद्धान्तार्थप्रभेदिनः ।
अवतारान्तरं प्रासाश्चकासति हि केचन ॥
तस्मात्प्रमाणशरणाः प्रकृतार्थं विवृण्महे ।
निष्पक्षपाताश्श्रुत्वा यत्तुष्यन्ति रसिका जनाः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मृता भवन्त्वप्रपन्नाः प्रपन्ना वा प्रपन्नकैः ।
पुत्रैस्सपिण्डीकरणं न कार्यं सर्वथा द्विजैः ॥
सपिण्डीकरणात्तेषां प्रेतत्वोन्मुक्तिपूर्वकम् ।
वस्वादीनां नियाम्यत्वसिद्धेर्विज्ञानयोगिना ॥
प्रोक्तत्वेन च वस्वादिनियाम्यत्वस्य सिद्धये ।
सापिण्ड्येऽनुष्ठिते निष्ठाहानिरेव न संशयः ॥

**End:**

वात्स्यवेदान्तसूरीन्द्रः काम्यं तत्याज चाखिलम् ।
अन्यस्तु केवलं काम्यसपिण्डीकरणं विना ॥
अन्यानि काम्यकर्माणि तत्याजैतन्महाद्भुतम् ।
केचित्तु पूर्विकाचारान् तत्यजुर्नैव किञ्चन ॥
पक्षद्वयेऽपि नास्माकमभिप्रायः प्रजायते ।
प्रमाणशरणत्वेन धर्मशास्त्रे यदीरितम् ॥
आचार्यदिव्यसूक्तीनामविरुद्धं तदेव हि ।
रोचते मम देवाधिनाथस्सम्प्रीयतामितः ॥
श्रीमत्त्रय्यन्तसूरीन्द्रचरणाम्बुरुहद्वयम् ।
चिन्तये चिन्तितप्राप्तप्रतिबन्धनिवृत्तये ॥
प्रमाणगुम्भैस्सस्नेहा देशिकोक्तिप्रवर्तिका ।
प्ररोपिता मया सम्यक् प्रपन्नगतिदीपिका ॥

---

## No. 5307. प्रपन्नगतिदीपिका.

## PRAPANNAGATIDĪPIKĀ.

Substance, palm-leaf. Size, 13¼ × 1 inches. Pages, 70. Lines, 5 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Complete.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5308. प्रपन्नगतिविधिः.

## PRAPANNAGATIVIDHIH.

Pages, 9. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 3959.

Seems complete.

On the state of final deliverance of those who are Prapannas.

**Beginning:**

श्रीशन्यस्तात्मरक्षाभरमनुजगतीं(तिं) सङ्ग्रहेण प्रवक्ष्ये
श्रुत्या स्मृत्या च सिद्धां तदितरसुलभां नो कदाचित्प्रसिद्धाम् ।
श्रीशन्यस्तात्मरक्षाभररहितगतिं चापि वक्ष्ये ऽद्य सम्यक्
सन्देहध्वंसनायाखिलमनुजमनःप्रीतये श्रीशतुष्ट्यै ॥

श्रीशन्यस्तात्मरक्षाभरवरमहितश्रीशसङ्कल्पमात्रा-
द्देहोन्मुक्तस्त्वाचिन्त्यं पदमपि पुनरावर्जितं प्राप्य धन्यः ।
साकं श्रीशेन नित्यैरतिमहिततरैर्मुक्तवर्गैश्च साम्यं
नित्यानन्दं समेतीत्यखिलमुनिमतं सर्ववेदान्तसिद्धम् ॥

**End:**

सामान्योक्तेषु कर्मस्वपि विधिविहितं स्वाधिकारानुरूपं
कुर्यात्सर्वप्रयत्नैरपि मनुजवरस्सात्त्विकत्यागपूर्वम् ।
नो कुर्यात्कर्म किञ्चित्स्वकविधिरहितं स्वाधिकारैर्विरुद्धं
श्रीशन्यस्तात्मभारो यदि चरति तदा पारमैकान्त्यभङ्गः ॥

---

## No. 5309. प्रपन्नधर्मसारः.

## PRAPANNADHARMASĀRAH.

Substance, palm-leaf (Śrītāla). Size, 16 × 2⅜ inches. Pages, 70. Lines, 17 on a page. Character, Grantha. Condition, good. Appearance, new.

Breaks off in the 7th Paricchēda.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



A collection of extracts from different Purāṇas on the daily observances and duties of those who have gone through the ceremony of Prapatti: by Vaikuṇṭhanātha, son of Sundarārya of Bhāradvājagōtra.

**Beginning:**

श्रियःपतिं नमस्कृत्य शेषाचलनिवासिनम् ।
परमैकान्तिनां सम्यग्वक्ष्याम्याचारनिर्णयम् ॥

आचारलक्षणमाह शाण्डिल्यः—

पञ्चेन्द्रियस्य देहस्य बुद्धेश्च मनसस्तथा ।
द्रव्यदेशक्रियाणां च शुद्धिराचार इष्यते ॥

इति परिभाषा ।

पाद्मपुराणे च—

किमत्र बहुनोक्तेन पुराणेस(षु)स्मृतिष्वपि ।
तामसा निरयायैच(व) वर्जयेत्वा(त्ता)न्विचक्षणै(ण): ॥ इति ॥

**End:**

ब्रह्माण्डे—

आशौचं जायते नृणां ग्रहणे चन्द्रसूर्ययोः ।
सूतके मृतके चैव दानादौ कल्पते नरः ॥ इति ।

भ्रात्रे भगिन्यै पुत्राय स्वामिने मातुलाय च ।
मित्राय गुरवे श्राद्धमेकोद्दिष्टं न पार्वणम् ॥

ज्ञातयस्ससमादर्वाक् कनिष्ठा दशमेऽहनि ।
वापयेयुश्च ते सर्वे कर्तृणा (ता च)सह सर्वदा ॥

या सपत्नीसुता मातृसपत्नी या च ते मिथः ।
अहोरात्रेण शुध्येतामाह पारस्करो मुनिः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5310. प्रपन्नपारिजातः.
## PRAPANNAPÂRIJÂTAḤ.

Pages, 29. Lines, 7 on a page.

Begins on fol. 1a of the MS. described under No. 5276 Complete.

A work on the nature of Prapatti : by Varadadēśika.

**Beginning :**

वन्देऽहं वरदार्यं तं वत्साभिजनभूषणम् ।
भाष्यामृतप्रदानाद्यस्सञ्जीवयति मामपि ।
अभङ्गुरकलादानस्थूललक्षत्वमीयुषे ।
तुङ्गाय महसे तस्मै तुरङ्गाय मुखे नमः ॥
लक्ष्मीचक्षुरनुध्यानात्तत्सारूप्यमुपेयुषे ।
नमोऽस्तु मीनवपुषे वेदवेदिवपुष्मते ॥
रजो रजःप्रशमनं प्रपद्य पदयोस्सताम् ।
प्रपन्नपारिजाताख्यप्रबन्धाय यतामहे ॥
प्रपत्तेर्मानसौभाग्यं स्वरूपमधिकार्यपि ।
प्रपन्नानां गुरौ वृत्तिः श्रीशे सूरिषु सत्सु च ॥
विहितेषु व्यवस्थानं वर्जनीयं फलं तथा ।
एते दशार्थाः कथ्यन्ते त्रय्यन्ताद्यर्थसङ्ग्रहात् ॥

**End :**

अशेषापेक्षितं यत्र परितो जायते सताम् ।
प्रपन्नपारिजाताख्यः प्रबन्धः कथितो भुवि ॥
वन्देऽहं वरदार्यं तं वत्साभिजनभूषणम् ।
भाष्यामृतप्रदानाद्यस्सञ्जीवयति मामपि ॥

**Colophon :**

इति श्रीमद्वात्स्यवरददेशिककृतिषु प्रपन्नपारिजाताख्यप्रबन्धस्सम्पूर्णः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5311. प्रपन्नपारिजातः.
## PRAPANNAPĀRIJĀTAḤ.

Pages, 32. Lines, 8 on a page.

Begins on fol. 9*a* of the MS. described under No. 5198.

Complete.

Same work as the above.

---

## No. 5312. प्रपन्नपारिजातः.
## PRAPANNAPĀRIJĀTAḤ.

Substance, palm-leaf. Size, $16\frac{5}{8} \times 1\frac{1}{2}$ inches. Pages, 27. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 37*a*. The other works herein are Aṣṭaślōkī-vyākhyā 1*a*, Abhayapradānasāra 16*a*.

Complete.

Same work as the above.

---

## No. 5313. प्रपन्नविषयः.
## PRAPANNAVIṢAYAḤ.

Substance, palm-leaf. Size, $14\frac{7}{8} \times 1$ inches. Pages, 42. Lines, 5 on a page. Character, Grantha. Condition, good. Appearance, new.

Incomplete.

A general treatise on the mode of life to be led by a person who has adopted Prapatti: by Rāmānujamuni.

Also deals with the funeral obsequies to be performed in relation to a Prapanna after his death.

**Beginning :**

श्रीमन्नाथमुनिश्च यामुनमुनिः श्रीभाष्यकारो मुनिः
श्रीमद्वेदवतंसदेशिक इति श्रीमान् भुवि ख्यातिमान् ।
एते देशिकसत्तमाः श्रुतिशिरस्सिद्धान्तसंव(र्ध)काः
चित्तं मामकमन्वहं प्रकलय(न्त्व)न्तःपुरं श्रीशितुः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कलिबलवशाद्धर्मे लुप्ते निवृत्तिफलप्रदे
भगवति हरौ भक्तैस्सद्भिः सदा समनुष्ठिते ।
तदितरपरामिश्रं धर्मं प्रवृत्तिफलप्रदं
रजसि तमसि प्रादुर्भूते भजन्ति महीसुराः ॥
प्रसादाद्देशिकेन्द्राणामहं रामानुजो यतिः ।
निर्मूलयामि सिद्धान्तं दुर्दान्तञ्च दुरुक्तिभिः ॥

परदेवतापारमार्थ्यनिर्णयः प्रथमं वक्ष्यते ।

भारते मोक्षधर्मे युधिष्ठिरः—

ब्रह्मचारी गृहस्थो वा वानप्रस्थोऽथ भिक्षुकः ।
य इच्छेत् श्रेय आस्थातुं देवतां कां यजेत सः ॥
विधिना केन जुहुयात् दैवं पित्र्यमथापि वा ।
देवतानाञ्च को देवः पितॄणाञ्च पिता च कः ॥

भीष्मः—

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
नारदस्य च संवादमृषेर्नारायणस्य च ॥

नारदः—

कन्त्वद्य यजसे देव पितरं तं न विद्महे ।

नारायणः—

इन्द्रियैरिन्द्रियार्थैश्च सर्वभूतविवर्जितः ।
स ह्यन्तरात्मा भूतानां क्षेत्रज्ञश्चेति कथ्यते ॥
त्रिगुणव्यतिरिक्तोऽसौ पुरुषश्चेति कल्पितः ।
तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विपदां वर ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तं(तां)योनिमावयोर्विद्धि व्यासा(यासौ)सदसदात्मिका ।
आवाभ्यां पूज्यते यं(यो)हि दैवे पित्र्ये च कर्मणि ।।

नास्ति तस्मात्परोऽन्योऽपि पिता देवोऽथ वा द्विज ।
दैवं पित्र्यं च कर्तव्यमिति तस्यानुशासनम् ।।

इति भारते मोक्षधर्मे युधिष्ठिरभीष्मसंवादे नारदनारायणसंवादे नारदं प्रति नारायणोपदिष्टस्सर्वकर्मसमाराध्यः श्रीमन्नारायण एवेति सिद्धान्तितम् ।

**End:**

देवेन्द्रानुज्ञया देवा गणसंज्ञास्सुरूपिणः ।
विमानं दिव्यमारोप्य स्वर्गलोकं नयन्ति हि ।।

संवत्सरेण शनकैरनायासेन भिक्षुकम् ।
अप्सरोभिरनेकाभिः गान्धर्वीभिस्तथैव च ।।

सुशीतलैर्गन्धमाल्यैरलङ्कारैरलङ्कृतम् ।
वालव्यजनहस्ताभिः विजितं पार्श्वयोर्द्वयोः ।।

नृत्तगेयैरनेकैश्च सर्वतः परिशीलितम् ।
तथापि प्रेतका(ता)स्त्येव तत्प्रेतत्वस्य[वि]मुक्तये ।।

दशाहं पायसं पिण्डं चतुस्तर्पणपूर्वकम् ।
यतिप्रीत्यै सुतो दद्यात् चतुरङ्गविवृद्धये ।।

आत्मान्तरात्मा जीवात्मा परमात्मा पुरातनः ।
एतान्यङ्गानि सर्वेषां समान्याहुर्विचक्षणाः ।।

आत्मेति शब्द्यते देहस्त्वन्तरात्मा मनः स्मृतम् ।
जीवात्मा शब्द्यते देही मनोमात्रसहायवान् ।।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कूटस्थः परमात्मेति वेदान्तपरिकीर्तितम्(:) ।
तस्माद्यत्यो(ते)श्चतुर्णान्तु तुष्टये पुष्टये सुतः(तैः) ॥

दशाहं पायसं पिण्डं तर्पणं पूजनं तथा ।
दिने दिने च कर्तव्यं वैकल्यपरिपूर्तये ॥

दशाहानन्तरं श्राद्धं कुर्यात्पार्वणवत्सुतः ।
प्रेतत्वस्य विमुक्तत्वात् पिण्डादीनां प्रदानतः ॥

समायासनिवृत्त्यर्थमेकादशदिने सुतः ।
ततश्च ब्रह्मलोकान्तग.

---

No. **5314.** प्रपन्नसत्कर्मचन्द्रिका.

PRAPANNASATKARMACANDRIKĀ.

Substance, palm-leaf. Size, $16\frac{5}{8} \times 1$ inches. Pages, 44. Lines, 5 on a page. Character, Grantha. Condition, good. Appearance, new.

Incomplete.

On the various household rites and duties of a Prapanna: by Rāmānujayōgin.

**Beginning:**

वर्णाश्रमाचारवतां प्रपन्नानां महात्मनाम् ।
श्रीमान्रामानुजो योगी चक्रे सत्कर्मचन्द्रिकाम् ॥

प्रपन्नकर्तव्यनिषेकादिश्मशानान्तनित्यनैमित्तिककर्मसु अनन्यथासिद्ध जीवलिङ्गं शुद्धमिश्रविकल्पमिति त्रेधा विभागः । तत्र अनन्यथासिद्ध-जीवलिङ्गं नाम मन्त्रोक्तदेवतान्तरं साक्षान्नारायणं कर्तुमशक्यस्थलम् ,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्यथासिद्धजीवलिङ्गं नाम मन्त्रोक्तदेवतान्तरं साक्षात् श्रीमन्नारायणं कर्तुं शक्यस्थलम् । शुद्धविकल्पं नाम भगवन्मन्त्रैर्वा कुर्यात्, देवतान्तरमन्त्रैर्वा कुर्यात्—इति विकल्पितस्थलम् । तदुदाह्रियते ।

**End:**

विष्णोर्ध्रुवमसि स्वाहा । वैष्णवमसि स्वाहा । इति वैष्णवमन्त्रमष्टोत्तरशतमष्टाविंशतिवारं दशवारमेकवारं वा हुत्वा ओं चण्डाय द्वारपालाय नमः । ओं नमो . स्वाहा । ओं सर्वेभ्यो भगवद्द्वारपालेभ्यो नमः । ओं . स्वाहा । इत्यन्तं सकृत्सकृत् हुत्वा अदितेऽन्वमꣳस्थाः । ओं . य । ओं देवसवितः प्रासावीः । ओम्.

---

No. **5315.** प्रपन्नामृतम्.

PRAPANNĀMṚTAM.

Substance, palm-leaf. Size, 17⅛ × 1½ inches. Pages, 36. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, old.

Breaks off in the 9th Adhyāya.

Contains the life of Rāmānujācārya and other important Śrī-Vaiṣṇava teachers.

By Piḷḷailōkācārya.

**Beginning:**

राजच्छिद्रयुतोर्ध्वपुण्ड्रमनिशं रामानुजाख्यं मुनिं
काषायाम्बरमब्जसन्निभगळं कान्तोपवीतत्रयम् ।
भाषासंस्कृ(त)वाग्विलासममलं बद्धाञ्जलिं भास्वरं
श्रीवत्साङ्कमुखाखिलार्यशरणं श्रीभाष्यकारं भजे ॥

श्रीरङ्गराजपदपङ्कजराजहंसं रामानुजार्यपदपङ्कजभृङ्गराजम् ।
श्रीशैलवंशकलशाम्बुधिपूर्णचन्द्रं श्रीरङ्गराजगुरुमन्वहमाश्रयामः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मिथ्यावादिमदान्धसिन्धुरमुधासंरम्भकुम्भस्थली-
निर्भेदोद्भवसूक्तिमौक्ति(क)मणि(णी)शुभ्रे(भ्री)कृताभ्रस्थलः ।
सत्तर्कस्फुरदत्युदग्रनखरो वेदान्तशैलाश्रितः
श्रीरामानुजकेसरी विजयते प्रोद्दण्डविक्रीडितः ॥
कौशिकान्वयसम्भूतं कारुण्यामृतसागरम् ।
नृसिंहाचार्यतनयं रामानुजगुरुं भजे ॥
नाधीतानि च शास्त्राणि न कृतं गुरुपूजनम् ।
वक्ष्यामि कृपया विष्णोरनुगृह्णन्तु देशिकाः ॥
इन्दिरारमणं देवमिभशैलनिवासिनम् ।
विवस्वत्कोटिसङ्काशं देवराजमहं भजे ॥
अस्ति वैकुण्ठनगरं सर्वलोकेषु विश्रुतम् ।
नित्यैर्मुक्तैस्सेव्यमानं विष्णोः प्रीतिकरं शुभम् ॥

* * * *

**Colophon:**

इति प्रपन्नामृते रामानुजचरित्रे वैकुण्ठनाथफणिराजसंवादो नाम प्रथमोऽध्यायः ॥

**End:**

संसेव्य पश्चाद्गमने मतिं कुरु महामते ।
यामुनं द्रष्टुकामस्त्वमद्य दूरादिहागतः ॥
एवंविधा तस्य वृत्तिरद्याभूत् किल मद्गुरोः ।

---

No. **5316.** **प्रमाणसङ्ग्रहः.**

PRAMĀṆASAṄGRAHAḤ.

Substance, palm-leaf. Size, $15\frac{3}{8} \times 1\frac{1}{4}$ inches. Pages, 322. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Incomplete.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



A collection of authoritative passages from various sources to prove that Nārāyaṇa is the Supreme Brahman: by Saumya-jāmātṛmuni.

**Beginning :**

परतत्त्वप्रधानेषु प्रमातव्येषु सर्वशः ।
प्रमाणानि प्रदृश्य(दर्श्य)न्ते प्रबन्धेऽस्मिन्यथाश्रुतम् ॥

प्रथमं तावच्छ्रियःपतिर्नारायण एव सर्वस्मात्पर इति सर्वेष्वपि श्रुतिस्मृतीतिहासपुराणेषु प्रतिपाद्यत इत्युच्यते—तैत्तिरीये तावत् नारायणपरं ब्रह्म तत्त्वं नारायणः पर इत्यादि, तथा यस्मात्परं नापरमस्ति किञ्चित् इत्यादि, महोपनिषदि नारायणपरं ब्रह्म तत्त्वं नारायणः पर इत्यादि, ऐतरेयब्राह्मणे अग्निर्वै देवानामवमो विष्णुः परमस्तदन्तरेण सर्वा अन्या देवता इति, यजुष्यपि अग्निरवमो देवानां विष्णुः परम इति ।

**End :**

शाण्डिल्यः—

उच्चैस्स्वरेण योगान्ते स्तुत्वा स्तोत्रैरनन्यधीः ।
वासुदेवादिदेवानां नाम्नां सङ्कीर्तनं चरेत् ॥

अस्यार्थः—पापं तद्विकाररूपं सर्वं हरतीति हरिः । तथा पराशरः—

ब्रह्माणमिन्द्रं रुद्रं च यमं वरुणमेव च ।
निगृह्य हरते यस्मात्तस्माद्धरिरिहोच्यते ॥

श्रीविष्णुधर्मे शौनकः—

उत्तिष्ठन् चिन्तय हरिं व्रज(न्) चिन्तय केशवम् ।
भुञ्जन् चिन्तय गोविन्दं स्वपन् चिन्तय माधवम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति तेनैव स्वकीयसूत्रे सर्वकर्मारम्भावसानेषु हरिस्मरणमुक्तम्—

* * * *

प्रातः स्मरामि दधिघोषविधूतनिद्रं निद्रावसानरमणीयमुखारविन्दम्
हृद्यानवद्यवपुषं नयनाभिराममुन्निद्रपद्मनयनं नवनीतचोरम् ॥
प्रातर्नमामि मनसा वचसा च मूर्ध्ना पादारविन्दयुगळं परम.

---

No. **5317.** प्रमाणसङ्ग्रहः.
PRAMĀṆASAṄGRAHAḤ.

Pages, 22. Lines, 6 on a page.

Begins on fol. 11*a* of the MS. described under No. 2878.

Incomplete.

Same work as the above.

---

No. **5318.** प्रमाणसङ्ग्रहः.
PRAMĀṆASAṄGRAHAḤ.

Substance, palm-leaf. Size, $17\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 91. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Similar to the above.

By Śrīnivāsācārya, son of Kauśika Śrīnivāsārya.

**Beginning :**

श्रीमदात्रेयनाथार्यान् गुरून्(:)परमान् गुरून् ।
श्रीरामप्रमुखान्वन्दे श्रीमद्रामानुजं मुनिम् ॥
साकं सा कंसहन्त्री शकटकटि(बक)मुखैः पूतनाशान्तनीया
. . . . . . . पातकान् पूतयन्ती ।
कारङ्कारं धरण्यां जनिमदितिसुतान् लीलया पालयन्ती
तुङ्गा मङ्गळचमूर्तिर्मम दिशतु मतिं वाजिरूपा वदान्या ॥
वेदान्तानां प्रथमगुरुणा निम . . . . .
. . . . . . मुहुरपि कलयेऽभीष्टदौ कौशिक श्री -

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वासाचार्यस्य पुत्रो महितजनमुदे सङ्ग्रहिष्यन् क्रमेण ॥
वेदान्ताचार्यसूक्तौ विबुधजनमते श्रीरहस्यत्रयस्य
व्याख्या . . . . . . . . . . ॥
. . . . कौशिककुलमणिः श्रीनिवासार्यसूनु-
स्सङ्गृह्य श्रीनिवासो घनगुरुकरुणाभूषितो दर्शयामि ॥

* * * *

उद्योगपर्वणि षष्टिशततमेऽध्याये सञ्जयः—
मायान्न सेवे भद्रं ते न वृथा धर्ममाचरे ।
शुद्धभावं गतो भक्त्या शास्त्राद्वेद्मि जनार्दनम् ॥
गीतायां षोडशेऽध्याये—
तस्माच्छास्त्रं प्रमाणन्ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥

**End:**

वराहरुधिराभेण शुचिना च सुगन्धिना ।
अनुलिप्तं परार्ध्येन चन्दनेन परन्तपम् ॥
स्थितया पार्श्वतश्चापि वालव्यजनहस्तया ।
उपेतं सीतया भूयश्चित्रया शशिनं यथा ॥
तं तपन्तमिवादित्यमुपपन्नं स्वतेजसा ।
ववन्दे वरदं वन्दी विनयज्ञो विनीतवत् ॥

**Colophon:**

प्रमाणत्तिरट्(सङ्ग्रहः)सम्पूर्णः ॥

---

No. **5319.** **प्रश्नसंहिता.**

PRAŚNASAṀHITĀ.

Substance, paper. Size, $11\frac{1}{4} \times 8\frac{7}{8}$ inches. Pages, 435. Lines, 21 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



This Saṁhitā says that salvation is attainable by worshipping Viṣṇu in accordance with the Pāñcarātrāgama.

**Beginning:**

नमो जगन्निवासाय वासुदेवाय साक्षिणे ।
निर्गुणाय परव्योम्ने शङ्खचक्रगदाभृते ॥
महर्षयः पुरा केचिद्ब्रह्मजिज्ञासवो महीम् ।
पर्यटन्तो महर्षीणामग्निहोत्राणि जुह्वताम् ॥
पुत्रदारैस्समेतानामाश्रमाणि च सर्वशः ।
गत्वा तत्र स्थितान् पूर्वं नमस्कृत्य यथाक्रमम् ॥
पप्रच्छुः केन शास्त्रेण ब्रह्मज्ञानं भविष्यति ।
आराधनं भगवतः कर्तुं शास्त्रेण केन वा ॥
इति पृष्टेषु तेष्वेकः कहोळो नाम वै मुनिः ।
वयं तु कर्मकाण्डोक्तकर्मब्रह्मैव(क) वेदिनः ॥
उपास्महे विष्णुमेव ह्यग्निहोत्रादिरूपिणम् ।

* * *

नारायणमुखोद्गीतं श्रुत्वा श्रीमुनिपुङ्गवाः ।
उपादिशत्पाञ्चरात्रं श्रीप्रश्नमितिसंज्ञितम् ॥
तयोः पूजामकरवं यथावन्मुनिपुङ्गवाः ।
ततस्तु भगवानाह प्रह्वाञ्जलिपुटं स्थितम् ॥
उपदिष्टमिदं शास्त्रं पावनं मोक्षसाधकम् ॥

* * *

**Colophon:**

इति श्रीप्रश्नसंहितायां शास्त्रावतरणं नाम प्रथमोऽध्यायः ॥

**End:**

भगवन्तं समाराध्य स्वेष्टं प्राप्स्यथ मा चिरम् ।
इति तेभ्य उपादिश्य श्रीपतिं मनसा स्मरन् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आत्मानं ब्रह्मरन्ध्रेण निर्गमय्य तनुं त्यजन् ।
अर्चिरादिगतिं प्राप्य वैकुण्ठं चेदमाप्तवान् ॥

**Colophon:**

इति श्रीश्रीप्रश्नसंहितायां मुद्रालक्षणं नाम द्विपञ्चाशदध्यायः ॥
संहिता च समाप्ता ॥

No. 5320. बहुबिम्बपूजाविधिः.
BAHUBIMBAPŪJĀVIDHIḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 3*a* of the MS described under No. 5239.

Incomplete.

On the conduct of worship in relation to a collection of divine images.

**Beginning:**

अनेकबिम्बसंयोगे पूजाविधिरिहोच्यते ।
न पृथक् पूजनं कार्यं सर्वं तन्त्रेण कारयेत् ॥
इष्टकाम्यार्थसिद्ध्यर्थं यन्मूर्तिं पर्युपासते ।
तन्मूर्तिमन्त्रेण ततो नित्यमाराधयेद्द्विजः ॥

**End:**

चतुर्विंशतिसङ्ख्याकं यत्र तिष्ठति वेश्मनि ।
तद्वैकुण्ठमिति प्राहुर्मुनयस्संशितव्रताः ॥

No. 5321. ब्रह्मसंहिता.
BRAHMASAṀHITĀ.

Pages, 4. Lines, 9 on a page.

Begins on fol. 47*a* of the MS. described under No. 5248.

Complete.

Forms part of the Pāñcarātrāgama. It lays down when and how the birthday of Śrī-Kṛṣṇa should be religiously observed.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

भगवन् सर्वलोकेश सर्वलोकपितामह ।
वक्तुमर्हसि मे देव कृष्णजन्मदिनोत्सवम् ॥
ऋक्षं वारं तिथिं लग्नं योगं करणमेव च ।
म . . समक्षं . . . वासं तथार्चनम् ॥
जयन्तीनिर्णयं देव कथयस्व पितामह ।

ब्रह्मोवाच—

शृणु वत्स प्रवक्ष्यामि कृष्णजन्मदिनोत्सवम् ।
यं कृत्वा सर्वकामांश्च लभते नात्र संशयः ॥

**End:**

बुधवारयुते कृष्णो जज्ञे तस्माद्विशिष्यते ।
तस्माज्जयन्ती विज्ञेया बुधवार . . .
. . . यन्ती शुद्धाख्या भुक्तिमुक्तिफलप्रदा ।
तस्यामेवोपवासस्स्यात्पूजां कुर्याद्विधूदये ॥

**Colophon:**

इति श्रीपाञ्चरात्रे ब्रह्मसंहितायां जयन्तीनिर्णयः ॥

---

No. **5322.** भक्तप्रतिष्ठाविधिः.

BHAKTAPRATIṢṬHĀVIDHIḤ.

Pages, 7. Lines, 6 on a page.

Begins on fol. 3*a* of the MS. described under No. 896.

Complete.

On how to consecrate the images of the saintly devotees of Viṣṇu

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

ब्रह्मोवाच—

विष्णुभक्तप्रतिष्ठां च वद मे भक्तवत्सल ।
सर्वेषां मुक्तिसिद्ध्यर्थं ज्ञानधर्मादिसिद्धये ॥

श्रीभगवानुवाच—

दिव्यैस्सिद्धैस्स्वयंव्यक्तैर्मानुषैश्च विशेषतः ।
अनन्तं गरुडश्चैव लक्ष्मीं सेनेशमुत्तमम् ॥
विष्णुभक्तप्रतिष्ठाश्च कुर्याद्विष्णुप्रतिष्ठावत् ।
सनकादीनृषीन् सम्यक् ब्राह्मणान् क्षत्रियांस्तथा ॥
वैश्यांश्च तद्वच्छूद्रादीनसुरान्राक्षसादिकान् ।
वायुपुत्रं विशेषेण विष्णुभक्तोत्तमोत्तमम् ॥

**End:**

एते वै विष्णुभक्ता वै सर्वदा च युगे युगे ।
तज्ज्ञात्वा विष्णुभक्तान् वै स्थापयेद्धरिमन्दिरे ॥
सर्वपापहरार्थञ्च विष्णुसायुज्यहेतवे ।
तस्य द्वारे तस्य शिष्यान् कल्पयेद्द्वारपालकान् ॥

**Colophon:**

विष्णुभक्तप्रतिष्ठा संपूर्णा ॥

---

## No. 5323. भगवत्प्रपत्तिः.

## BHAGAVATPRAPATTIḤ.

Pages, 5. Lines, 8 on a page.

Begins on fol. 29a of the MS. described under No. 5205.

Complete.

On how to surrender one's self to the grace of God with a view to become fit for salvation.

**Beginning:**

स्वाचार्यमारभ्य भगवत्पर्यन्तान् गुरून् प्रणामादिभिरभ्यर्च्य . . . . . . . . भगवद्दासभूतस्य मम एतद्देहावसान एव भगवतो

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भरस्वीकाररूपोपायान्तरस्थानापत्तिद्वारा निश्शेषसंसारनिवृत्तिपूर्वकं ब्रह्म-नाड्या शरीरान्निर्गत्य . . . . . . . . . . . . . . . अपहतपाप्मत्वादिगुणाष्टकविशिष्टस्वस्वरूपाविर्भावपूर्वकं श्रीमन्नारायणचरणारविन्दयोः स्वरूपप्राप्तसर्वदेशसर्वकालसर्वावस्थोचितसर्वविध-कैङ्कर्यपर्यन्तपरिपूर्णब्रह्मानुभवसिद्ध्यर्थं श्रीमन्नारायणचरणारविन्दयोः अङ्ग-पञ्चकसंपन्नमात्मरक्षाभरसमर्पणं करिष्य इति सङ्कल्प्य . . . . सात्त्विकत्यागं कृत्वा अत्र करणमन्त्रं द्वयमुच्चार्य ।

**End :**

अतस्तत्त्वतो मज्ज्ञानदर्शनप्राप्तिषु निस्संशयस्सुखमास्स्व इति दत्त-वरः प्रहर्षपरवशहृदयः सुखमासीत ॥

---

No. **5324.** भगवत्प्रपत्तिः.

BHAGAVATPRAPATTIḤ.

**Pages**, 4. Lines, 11 on a page.

Begins on fol. 126*b* of the MS. described under No. 1873

Complete.

Same work as the above.

---

No. **5325.** भगवदाराधनम्.

BHAGAVADĀRĀDHANAM.

**Pages**, 16. Lines, 10 on a page.

Begins on fol. 6*a* of the MS. described under No. 206.

Complete.

On how a Śrīvaiṣṇava should conduct the worship of Viṣṇu daily in his house.

**Beginning :**

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

[नपवर्गवीर्य ।

श्रीकृष्ण कृष्ण(वृष्णि)सख वृष्णि(कृष्ण)वृषा(था)वनिध्रुग्राजन्यवंशदहना-
गोविन्द गोपवनिताव्रजभृत्यगीत तीर्थश्रवश्रवणमङ्गळ पाहि भृत्यान् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कौसल्यासुप्रजा राम पूर्वा सन्ध्या प्रवर्तते ।
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम् ॥
अहं मद्रक्षणभरो मद्रक्षणभरं(फलं) तथा ।
न मम श्रीपतदे(रे)वेत्यात्मानं निक्षिपेद्बुधः ॥

* * *

अपक्रामन्तु ये भूता ये भूता भुवि संस्थिताः ।
ये भूता विघ्नकर्तारस्ते गच्छन्त्वाज्ञया हरे(:) ॥

सुप्रक्षाळितपाणिपाद(:) स्वाचान्त(:) चण्डादिद्वारपालेभ्योऽञ्जलिं कृत्वा, प्रणम्य.

**End:**

पर्याप्त्या अनन्तरायाय सर्वस्तोमोऽतिरात्र उत्तममहर्भवति सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेव तेनाप्नोति सर्वं जयति । स्वामिन्! यथास्थानं प्रवेशयामि ।

* * *

नमः प्रजेशप्रमुखपुत्रपौत्रादिशालिने ।
नमः सीतासमेताय रामाय गृहमेधिने ॥
कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥
अपराधसहस्रभाजनं पतितं भीमभवार्णवोदरे ।
अगतिं शरणागतं हरे कृपया केवलमात्मसात्कुरु ॥

---

No. **5326.** भगवदाराधनक्रमः.

BHAGAVADĀRĀDHANAKRAMAḤ.

**Pages,** 33. Lines, 7 on a page.

Begins on fol. 22*a* of the MS. described under No. 5289.

Complete.

Similar to the above.

By Rāmānujācārya

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

परमैकान्ती भूत्वा भगवानेव स्वशेषभूतेन मया स्वीयैरेव कल्याणतमैरौपचारिकसांस्पर्शिकाभ्यवहारिकैर्भोगैरखिलपरिजनपरिच्छदान्वितं स्वात्मानं प्रीतं कारयितुमुपक्रमत इत्यनुसन्धाय तीर्थं गत्वा शुचौ देशे पादौ प्रक्षाळ्याचम्य तीरं संशोध्य शुचौ देशे मूलमन्त्रेण मृदमादाय द्विधाकृत्य शोधिततीरे निधाय ह्येकेन मलप्रक्षाळनं कृत्वा निमज्याचम्य प्राणायामत्रयमासीनो भगवन्तं ध्यायन् कृत्वा न्यासं मृत्स्नामादाय वामपाणितले त्रिधाकृत्य पृथक् पृथक् सम्प्रोक्ष्यामन्त्र्य एकेनास्त्रमन्त्रेण दिग्बन्धनं कुर्यात्.

**End:**

दिव्यविमानकवाटं बद्ध्वा नमो नम इत्युद्घास्य पूजां समापयेत् ॥

उरसा शिरसा दृष्ट्या मनसा श्रवणेन च ।
पद्भ्यां कराभ्यां जङ्घाभ्यां प्रणामोऽष्टाङ्ग ईरितः ॥
मनोबुद्ध्यभिमानेन सह न्यस्य धरातले ।
कूर्मवच्चतुरः पादान् करस्तत्रैव पञ्चमः ॥
प्रदक्षिणसमेतेन ह्येवंरूपेण सर्वदा ।
अष्टाङ्गेन नमस्कृत्य ह्युपविश्याग्रतो विभोः ॥

**Colophon:**

इति श्रीमद्रामानुजार्यविरचितभगवदाराधन समाप्तम् ॥

---

No. **5327.** भगवदाराधनक्रमः.

BHAGAVADĀRĀDHANAKRAMAḤ.

Substance, palm-leaf. Size, $4\frac{5}{8} \times 1\frac{1}{8}$ inches. Pages, 106. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Incomplete.

Similar to the above.

By Gōpāladēśika.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

सुप्रक्षालितपाणिपादः स्वाचान्तः तत्तत्क्षेत्राधीशं श्रीरङ्गनाथादिकं भगवन्तमभ्यर्च्य, पूजागृहाद्बहिर्दूरतोऽवस्थाय चण्डादीन् द्वारपालान् प्रणम्य गन्धादिभिरभ्यर्च्य आत्मप्रवेशनं याचयित्वा तैर्दत्तानुज्ञः द्वारपार्श्वेऽवस्थाय अस्त्रमन्त्राभिमन्त्रितं पुष्पं दुष्टजन्तुपलायनार्थं देवगृहान्तः प्रास्य तत्र दक्षिणं पादं प्रथमं विन्यस्य तदन्तः प्रविश्य भगवन्तमष्टाङ्गप्रणामेन द्विः प्रणम्य ।

**End :**

आम्रेक्षुखण्डताम्बूलचर्वणे सोमपानके ।
विष्ण्वङ्घ्रितोयपाने च नाद्यन्ताचमनं स्मृतम् ॥
विष्णुपादोद्भवं तीर्थं पीत्वा न क्षालयेत् करौ ।
क्षालयेद्यदि मोहेन पञ्चपातकमाप्नुयात् ॥

---

No **5328.** भगवद्विग्रहप्रतिष्ठाविधिः.

BHAGAVADVIGRAHAPRATIṢṬHĀVIDHIḤ.

Pages, 11. Lines, 6 on a page.

Begins on fol. 20*a* of the MS. described under No. 5239.

Complete.

On the consecration of divine images for purposes of worship in families.

**Beginning :**

अथ गृहार्चनप्रतिष्ठाविधिः—

उत्तरायणे शुक्लपक्षे सुमुहूर्ते शुभदिने

प्रतिष्ठादिवसात्पूर्वं पञ्चमे सप्तमेऽह्नि वा ।
त्रिदिने पूर्वरात्रौ वा अङ्कुरार्पणमाचरेत् ॥

सुमुहूर्तोऽस्त्वित्यनुगृह्णन्तु । तथास्त्विति ब्राह्मणैरनुज्ञातः नमस्सदसे उपासताम् । सर्वेभ्यः श्रीवैष्णवेभ्यो नमः । प्रणम्योत्थाय, अशेषे स्वीकृत्य अस्य देवदेवस्य भगवतो नारायणस्य श्रीभूनीळासमेतस्य

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीमन्नारायणस्य प्रतिष्ठां कर्तुं योग्यतासिद्धिमनुगृहाण । दर्भेष्वासीनः प्राणानायम्य, शुक्लाम्बरधरं विष्णुमित्यादिविष्वक्सेनाराधनं कृत्वा, सङ्कल्प्य, अस्यां शुभतिथौ श्रीभगव . त्यर्थमस्य देवदेवस्य भग(व)तो नारायणस्य श्रीभूमिनीळासमेतस्य प्रतिष्ठाकर्माङ्गमङ्कुरार्पणकर्म करिष्ये ।

**End :**

यजमान आचार्ये गन्धपुष्पवस्त्राभरणादि(ना)यथाशक्ति तोषयित्वा, ब्राह्मणान् यथाशक्ति सम्पूज्य, तत आचार्यो भगवदाराधनं कृत्वा, ब्राह्मणान् भोजयेत् ॥

**Colophon :**

इति शौनकोक्तभगवद्विग्रहप्रतिष्ठाविधिः समाप्तः ॥

---

No. **5329.** भगवद्विषयगुरुपरम्परास्तोत्रम्.

BHAGAVADVIṢAYAGURUPARAMPARĀSTŌTRAM.

**Pages**, 5. Lines, 11 on a page.

Begins on fol. 122*a* of the MS. described under No. 1873.

Complete.

Memorial stanzas generally repeated by Vaḍakalai Śrī-Vaiṣṇavas by way of offering respect to their line of Gurus preliminary to the study of Tiruvāymoḻi.

**Beginning :**

त्रय्यन्तदेशिकयतीन्द्र . . . शरणं प्रपद्ये ॥
गोपालदेशिकपदाब्ज . . . शरणं प्रपद्ये ॥
श्रीकृष्ण . . . . . . . . यामः ॥
श्रीतातार्यपदाब्जभृङ्गमनसं वेदान्तरामानुज-
. . . . क्षाधिगतागमान्तहृदयं श्रीरङ्गनाथाद्गुरोः ।
संप्राप्तद्रविडागमान्तमनघं श्रीपादुकासेवक-
श्रीरामानुजयोगिनं गुरुमहं वन्दे कृपाशेवधिम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End :**

रामानुजार्यं वरदं विष्णुचित्तं शठद्विषम् ।
श्रीमल्लक्ष्मणयोगीन्द्रं मालाधरगुरूत्तमम् ॥
यामुनं रामपद्माक्षौ नाथं वकुलभूषणम् ।
सेनेशं कमलां श्रीशं प्रपद्ये(परमं गु)रुम् ॥

---

No. **5330.** भट्टोजिनागनाथोक्तिधिक्कारः.

BHAṬṬŌJINĀGANĀTHŌKTIDHIKKĀRAḤ.

Pages, 117. Lines, 18 on a page.

Begins on fol. 161*a* of the MS. described under No. 4995.

An unfavourable criticism of a certain work by Bhaṭṭōji-nāganātha wherein he criticises the Vaiṣṇava method of putting on the tridental caste-mark on the forehead: by Vēṅkaṭārya *alias* Śrīnivāsa.

**Beginning :**

नित्यं परिस्फुरति निह्नवभागधेयवाचाटमायिमुखमार्गविभागदक्षा ।
युक्तिर्मम प्रतिकलं कलयन् पुरस्तात्प्रत्यर्थिभङ्गकरणाय महानहार्यः(?) ॥

इह खलु श्रियः पतिः परमकारुणिको भगवानाश्रितवात्सल्यैकजलधिः सर्वेषां पुरुषाणामुपादित्सितजिहासितवस्तुविवेचनाभि(य)हर्तुं(तमः) सदसती च विवेक्तुमीशो मानं प्रदीपमिव कारुणिको दह(दा)तीति उक्तप्रकारेण सकलजनाज्ञानान्यथाज्ञानविपरीतज्ञानविधुरीकरणायानादिनिधनाविच्छिन्नसं-प्रदायतया सम्भाव्यमानभ्रमविप्रलम्भादिदोषगन्ध[ा]वेदाख्यं प्रमाणम् अ-खिलचेतनोज्जिजीवि(वयि)षया प्रथममवतार्य तदनन्तरमितिहासपुराणाभ्यां वेदं समुपबृंहयेत् . . . . . पञ्चरात्रोपबृंहितो वेदः भगवन्तं नारायणमेव सकलजगदादिकारणं मुक्तप्राप्त(प्य)श्च तदाराधनरूपाभिसंहित-फलकर्मज्ञानाङ्गकमुपासनं प्रपत्तिं च तत्प्राप्तिसाधनं प्राह ।

**End :**

यत्तु भस्मोद्धूलनतद्धारणादौ श्रुतिस्मृतिपुराणवचनानि सर्ववर्णसाधा-रण्येन सर्वाश्रमसाधारण्येन हंसपरमहंसपरिव्राजकसाधारण्येन चोपन्यस्तानि ;



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तानि सर्वाण्यपि पाशुपतसर्ववर्णस्वाश्रमविषयाणीति न वैदिक[वैष्णव]त्व-सम्भव इति सर्वं समञ्जसम् ॥

**Colophon:**

इति श्रीमद्वाधूलकुलतिलक श्रीसौदर्शिनिमहागुरुकृपालब्धपरावरतत्त्व-बोधेन श्रीमद्वत्सकुलतिलकश्रीशरण्यदेशिकसूनुश्रीनिवासार्यदिव्याज्ञालब्ध-श्रीनिवासापरनामधेयेन तच्चरणारविन्दभागधेयेन वेङ्कटार्येण विरचिते भट्टोजिनागनाथोक्तिधिक्कारे ऊर्ध्वपुण्ड्रधारणवैदिकत्वसमर्थनं नाम द्वितीयः परिच्छेदः ॥

भट्टोजिनागनाथोक्तिधिक्कारो रचितो मया ।
यथामति महाचार्ये(र्य)कृपाप्रोन्निद्रचेतसा ॥

इदं पुस्तकं लोकनाथशास्त्रिणा लिखितम् । ग्रन्थसङ्ख्या पञ्चाशत्त्रि-शताधिकसहस्रम् ॥

---

No. **5331.** भारद्वाजसंहिता.

BHĀRADVĀJASAṀHITĀ.

Substance, palm-leaf. Size, $16\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 86. Lines, 4 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Wants the first four leaves.

Complete.

This is a Saṁhitā of the Pāñcarātrāgama and deals with Prapatti.

**Beginning:**

यां सिद्धिं वैष्णवैर्मन्त्रैराधत्ते वैष्णवो गुरुः ।
सर्ववेदधरोऽप्यन्यो नान्यः कुर्वीत तादृशीम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वैदिकास्तान्त्रिकाश्चैव द्वयमुख्या द्विजन्मनः ।
शूद्रानुलोमजातानां मन्त्रास्स्युः तान्त्रिकाः परे ॥

* * * *

**Colophon:**

इति प्रपत्त्यधिकारः ।

यथा प्रपत्तिर्विहिता भगवच्चरणाब्जयोः ।
तथैव तत्र वृत्तिश्च कार्या गुरुनियोगतः ॥

* * * *

**Colophon:**

इति भारद्वाजसंहितायां न्यासोपदेशे प्रथमोऽध्यायः ॥

**End:**

सुसूक्ष्मत्वादुपायत्वान्महत्वाद्गौरवादपि ।
उपायः परमो धर्मः प्रोक्तः स्थित्यै पुनः पुनः ॥
वृत्तिं सन्तोऽनुभूयेमामनुरूपामिवात्मनः ।
परत्र चानुमोदन्ते परमेण विपश्चिता ॥

**Colophon:**

इति भारद्वाजसंहितायां परिशिष्टे चतुर्थोऽध्यायः ॥
भारद्वाजसंहिता सम्पूर्णा ॥

---

No. **5332.** भारद्वाजसंहिता—सव्याख्या.

BHĀRADVĀJASAṀHITĀ WITH COMMENTARY.

Substance, paper. Size, $13\frac{1}{8} \times 8\frac{1}{8}$ inches. Pages, 155. Lines, 24 on a page. Character, Grantha. Condition, good. Appearance, new.

Breaks off in the 5th Adhyāya and the Pariśiṣṭa contains two Adhyāyas.

The same as the above with the addition of a commentary.

**Beginning:**

श्रयः—

भूयांस्वं(सं)स्वधर्मे स्वल्पापि निन्दितक्रिया हन्ति, कुदृष्टिर्दृष्टिं हन्ति, देवतान्तरसंश्रयश्च भक्तिं हन्ति ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



* * * *

एकस्येति ।

एकस्यापि हि धर्मस्य विनाशे च विरोधिभिः ।
अनन्वयापचारेण नश्यत्यैकान्त्यवृत्तिता ॥

एकस्यापि हिताचारादिष्वेकस्यापि धर्मस्य । विरोधिभिः निन्दित-क्रियाकुदृष्ट्यादि . . . नाशेन तत्रानन्वयापचारेण वृत्त्यन्वया-भावरूपापचारेणापि ऐकान्त्यवृत्तिता नश्येत् । अनन्वयापचारेणेति पाठे धर्मस्य अनन्वयरूपे अशरणरूपे चेत्यर्थः । . . . . . . परमैकान्तिनामिति ।

परमैकान्तिनां धर्मः कृते पूर्णः प्रवर्तते ।
क्षीयमाणः क्रमेणायं कलौ स्थास्यति वा न ह(वा) ॥

* * * *

**Colophon:**

इति श्रीभारद्वाजसंहितायां सन्न्यासोपदेशे प्रथमोऽध्यायः ॥

* * * *

**Colophon:**

इति भरद्वाजसंहितायां न्यासोपदेशे चतुर्थोऽध्यायः ॥

* * * *

स्वल्पेति ।

स्वल्पापि हन्ति भूयांसं स्वधर्मं निन्दितक्रिया ।
दृष्टिं कुदृष्टिर्भक्तिन्तु देवतान्तरसं(श्रयः) ॥

* * * *

**Colophon:**

इति श्रीभरद्वाजसंहितायां परिशिष्टे प्रथमोऽध्यायः ॥

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End :**

अतिष्ठदिति ।

अतिष्ठत्पारमैकान्त्यमु(म)पायानपमार्जयन् ।
अपायवदिहैकान्त्यमशुद्धकरणान्वयात् ॥
उपायं(तु)भवेत्प्राप्यं तद्विष्णोः परमं पदम् ।

अपायान् अपमार्जयन् निराकुर्वन् पारमैकान्त्यमाक्षिते(तिष्ठ)त् । इहास्मिन् लोके पारमैकान्त्यमशुद्धकरणान्वया(त्) . . . . . मतया वाशुद्धकरणान्वयात् । अपायवत् अपाययुक्तं भवति । पारमैकान्त्यं निरपायम् अपायरहितं यदि भवेत् तदा तद्विष्णोः परमं पदम् । प्राप्यम् ॥

**Colophon :**

इति भारद्वाजसंहितायां परिशिष्टे द्वितीयोऽध्यायः ॥

---

No. **5333.** भारद्वाजसंहिता--सव्याख्या.

BHĀRADVĀJASAMHITĀ WITH COMMENTARY.

Substance, palm-leaf. Size, $16\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 240. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Breaks off in the 5th Adhyāya. Contains also two Adhyāyas of the Pariśiṣṭa.

Same work as the above.

---

No. **5334.** भूपरीक्षादिः.

BHŪPARĪKṢĀDIḤ.

Pages, 22. Lines, 7 on a page.

Begins on fol. 28*a* of the MS. described under No. 5249.

Incomplete.

On how to choose a proper plot of ground for building a temple on.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

अथ भूपरीक्षाविधिः ।

आचार्यो यजमानेन रथकारेण सह विधिवत् भूपरीक्षां कृत्वा तद्वास्तुसीमानि नृत्तवाद्यतूर्यमङ्गळपाठपूर्णकुम्भदीपध्वजच्छत्रस्वस्तिवाचकब्राह्मणैस्सह प्रदक्षिणं परिक्रम्य दिक्ष्वष्टासु मध्ये च पायसान्नेन भूतेभ्यः पिशाचेभ्यो राक्षसेभ्यः असुरेभ्यो ग्रहेभ्यो नागेभ्यः अन्येभ्य इति प्रणवादिनमोऽन्तकैर्बलिं दत्वा तदन्वेनं मन्त्रमुदीरयेत् ।

**End:**

दृढबन्धं नयनोन्मीलनं च कारयित्वा रथकारादीन् तोषयेत् ॥

भगवच्छास्त्रतत्त्वज्ञमौपगायनवंशजम् ।
वरदार्यगुरोः पुत्रं रङ्गराजमहं भजे ॥

---

## No. 5335. मन्त्रार्थोपदेशः.

## MANTRĀRTHŌPADĒŚAḤ.

Pages, 8. Lines, 6 on a page.

Begins on fol. 54*a* of the MS. described under No. 2965.

Complete.

On the teaching of the meaning of Vaiṣṇava-Mantras.

**Beginning:**

न्यासे वाप्यर्चने वापि मन्त्र(पर)मेकान्तिसंश्रये ।
अवैष्णवोपदिष्टं चेत्पूर्वं मन्त्रवरं द्वयम् ॥
पुनश्च विधिवत्सम्यग्वैष्णवाद्ग्राहयेन्मनुम् ।

**End:**

तस्मै दास्यं चतुर्थ्या तु मन्त्रे प्रोक्तं हि पार्वति ।
दासभूतमिदं तस्य ब्रह्माद्यं सकलं जगत् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवमर्थं विदित्वा वै पश्चान्मन्त्रं प्रयोजयेत् ।
अविदित्वा तु मन्त्रार्थं संसिद्धिं नाधिगच्छति ॥

**Colophon:**

इति श्रीपाद्मपुराणे उत्तरखण्डे उमामहेश्वरसंवादे मन्त्रार्थोपदेशो नाम त्रिंशोऽध्यायः ॥

---

No. **5336.** **मुमुक्षुप्पडि–सव्याख्या.**

MUMUKṢUPPAḌI WITH COMMENTARY.

Substance, paper. Size, $11\frac{1}{4} \times 8\frac{3}{4}$ inches. Pages, 193. Lines, 18 on a page. Character, Dēvanāgarī. and Tamil. Condition, good. Appearance, new.

Complete.

A Sanskrit rendering by Veṅkaṭācarya of the Mumukṣuppaḍi of Lōkācārya and of Saumyajāmātṛ's commentary thereon.

**Beginning:**

श्रियः पतिस्सन् श्रीवैकुण्ठेऽवस्थितस्सन् नित्यमुक्तैरनुभूतस्सन् निरतिशयानन्दयुक्तस्सन् स्थितः सर्वेश्वरः अनन्तगरुडादय इव स्वानुभवं कृत्वा उज्जीवनार्थं प्राप्तेर्विद्यमानत्वेऽपि तस्माच्च्युतास्सन्तः असन्नेव स भवतीत्युक्तप्रकारेण असत्कल्पास्सन्तः विद्यमानास्संसारिचेतनाः ।

**End:**

तत्त्यागविमोचनप्रकारः तत्त्यागविमोचकं स्वीकृत्य स्थितस्याधिकारिणो निर्भरत्वश्चोक्तो जातः ॥

**Colophon:**

इति श्रीमल्लोकाचार्यविरचितमुमुक्षुप्पडितदुपरिसौम्यजामातृमुनिकृतव्याख्या च सम्पूर्णा ॥

श्रीमुमुक्षुप्पडिव्याख्या[नं] सौम्यजामातृयोगिना ।
सर्वलोकहितार्थाय कृतं(ता) द्राविडभाषया ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदिदं वेङ्कटार्येण श्रीकूर्माद्रिनिवासिना ।
कृतं हि बालबोधार्थं रम्यं गीर्वाणभाषया ॥
१८८१ संवत्सरे श्रावणबहुलगुरुवासरे ॥

---

No. **5337.** यज्ञोपवीतप्रतिष्ठाधारणम्.

YAJÑOPAVĪTAPRATIṢṬHĀDHĀRAṆAM.

Pages, 12. Lines, 5 on a page.

Begins on fol. 23*a* of the MS. described under No. 5236.

Complete.

On how to put on the sacred thread after having religiously sanctified it.

**Beginning:**

प्रसृतो ह वै यज्ञोपवीतिनो . . . . . . . यज्ञस्य प्रसृत्या इति श्रुतेः—

सदोपवीतिना भाव्यं सदा बद्धशिखेन च ।
विशिखोऽनुपवीतश्च यत्करोति न तत्कृतम् ॥

इति भृगुस्मृतेश्चाश्रमिभिः नित्यमुपवीतं धार्यम् ।

**End:**

क्रोधान्मोहाद्बलाद्वापि ब्रह्मसूत्रं छिनत्ति यः ।
नद्यां स्नात्वाथ गायत्रीं जपेदष्टसहस्रकम् ॥
संस्कारैस्संस्कृतः पूर्वैरुत्तरैरपि संस्कृतः ।
नित्यमष्टगुणैर्युक्तो ब्रह्मभूयाय कल्पते ॥

**Colophon:**

इति गृह्यरत्ने एकविंशः खण्डः ॥

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वसन्ते ब्राह्मणं जन्मदिनमारभ्य जातस्य पश्चमाहे जाते कुमारे मासि द्वितीये गोत्रस्य शर्मणो वैदिकैः कर्मभिर्येत्र क्वचित् अग्निमथ(न)-निषेकादीन् संस्कारादीन्व्याख्यास्यामः ॥

गृह्यान्तरोक्तार्थविशेषमापस्तम्बाश्रयं वैदिकसार्वभौमः ।
प्राह स्मृतीर्वीक्ष्य च गृह्यरत्नं विवेकदं तत्कथयन्तु सन्तः ॥

---

## No. 5338. रहस्यत्रयम्.

### RAHASYATRAYAM.

Substance, palm-leaf. Size, 11⅝ × 1 inches. Pages, 10. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 79*a*. The other works herein are Sudarśanamantra 1*a*, Nṛsiṁhāṣṭōttaraśatadivyanāmamantra 8*a*, Kṛṣṇāṣṭōttaraśata 11*a*, Rāmāṣṭōttaraśata 14*a*, Viṣṇupañjara 18*a*, Yāatirājaviṁśati 20*a*, Pañcaviṁśaticakra 23*b*, Aṣṭaślōkī 24*a*, Arthapañcaka (Telugu language) 26*a*, Kṣamāṣōḍaśī 33*a*, Catuśślōkī 36*a*, Tattvatraya (Telugu) 54*a*, Tattvārthadarpaṇa (Telugu) 64*a*, Gadyatraya 89*a*.

Contains two Prakaraṇas Aṣṭākṣara and Dvaya.

An interpretation of the three Rahasyas of Śrī-Vaiṣṇavas.

**Beginning:**

श्रीवत्साङ्कस्य नप्तारं पौत्रं रामविपश्चितः ।
व्यासं वाग्जयिनः पुत्रं सुदर्शनगुरुं भजे ॥

श्रीमदष्टाक्षरो मन्त्रः कठवल्लिष्वाथर्वणोपनिषदि चाधीयमानः श्रूयते । अयं त्रैवर्णिकाधिकारः । प्रणवादिवर्जे श्री(स्त्री)शूद्राधिकारत्वमुक्तं भवति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न स्वरः प्रणवोऽङ्गानि नाप्यन्यविधयस्तथा ।
स्त्रीणां च शूद्रजातीनां मन्त्रमात्रोक्तिरिष्यते ॥

इत्यादिवचनैरवगम्यते ।

**End:**

नारायणशब्दः स्वामित्वपरः, विभूतिविशिष्टस्य भोग्यतापरश्च । तादर्थ्ये चतुर्थी स्वतस्सिद्धकैङ्कर्याविर्भावप्रार्थनार्था । नमश्शब्देन तद्विरोध्यहङ्कारममकाररूपाविद्याकर्मतद्वासनारुचिप्रकृतिसम्बन्धादिप्रतिबन्धजातस्यात्यन्तिकी निवृत्तिप्रार्थना ॥

**Colophon:**

इति द्वयप्रकरणं सम्पूर्णम् ॥

अस्मद्गुरुवरं वन्दे कन्दाळ्लकुलशेखरम् ।
दोड्डयाचार्यमनघं चोडङ्गिव(पु)रवासिनम् ॥

---

No. **5339.** रहस्यत्रयजीवातुः.

RAHASYATRAYAJĪVĀTUḤ.

Substance, palm-leaf. Size, $18\frac{3}{8} \times 1\frac{1}{2}$ inches. Pages, 122. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

An explanatory treatise on the meaning of the three Rahasyas (Aṣṭākṣara, Dvaya and Caramaślōka) : by Nārāyaṇamuni, disciple of Śaṭhāriyōgīndra.

**Beginning:**

प्रपद्ये जगदानन्दकन्दमिन्दीवरप्रभम् ।
इन्दिरामन्दिरं तेजो वन्दनीयमनिन्दितैः ॥

कलयाम्यस्मदाचार्यांस्तदाचार्यांस्तथापरान् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रपद्ये कमलां देवीं कमलेक्षणवल्लभाम् ॥
अस्मदाचार्यवर्येभ्यः श्रुतस्यार्थस्य सादरम् ।
सङ्ग्रहः क्रियतेऽस्माभिर्मननायैव केवलम् ॥

मुमुक्षोश्चेतनस्य रहस्यत्रयार्थो ज्ञातव्य इत्याचार्याः प्रत्यवदन् ।

रहस्यत्रयशब्देन श्रीमदष्टाक्षरो मनुः ।
द्वयार्थे मन्त्ररत्नश्च श्लोकवर्यश्च कथ्यते ॥

तत्र श्रीमदष्टाक्षरो मनुः श्रीमद्बदरिकाश्रमे परमकारुणिकेन ।गवता नारायणेन स्वांशभूताय नराय सर्वजनहितार्थमुपदिष्ट इति पुरा-गेषु स्मरणात् विष्णुगायत्र्यां नारायणाय विद्महे इति प्रथमोपात्तत्वात् ।

**End:**

एवं निरतिशयमत्प्राप्तिप्रतिबन्धकैर्विरहितं कुर्यां शुचं मा कृथा इति अस्मिन् प्रबन्धे नास्माभिरपूर्वार्थ उन्नीतः ; आचार्यप्रबन्धेषु यदुपपादितं, यच्चास्मदाचार्या उपदिदिशुः ; एतत्सर्वं सुग्रहाय सङ्गृह्यास्माभिरुक्तमिति विदाङ्कुर्वन्तु सन्तः ॥

नमश्शठारिमुनये निखिलागमवेदिने ।
नमामि श्रीनिवासं तं श्रीवेङ्कटनिवासिनम् ॥
यत्कारुण्यैकदेशेन तृणमब्जासनायते ।
इत्थमाचार्यवर्येण सम्प्रदायप्रदर्शितान् ।
अर्थान् प्रकाशयामास श्रीमन्नारायणो मुनिः ॥

**Colophon:**

इति परमहंसपरिव्राजकाचार्येण भगवद्भाष्यकारन्यस्तात्मात्मीयभरेण द्राविडवेदान्ताचार्यश्रीपादपद्मरसिकश्रीशठारियोगीन्द्रश्रीपादाम्बुजभृङ्गेण श्रीमन्नारायणमुनिना सङ्गृहीते रहस्यदीपापरनामधेये रहस्यत्रयजीवातौ तृतीयः परिच्छेदः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5340. रहस्यत्रयमीमांसाभाष्यम्.

## RAHASYATRAYAMĪMĀṀSĀBHĀṢYAM.

Substance, palm-leaf. Size, $15\frac{7}{8} \times 1\frac{3}{8}$ inches. Pages, 160. Lines, 9 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Breaks off in the 14th Prakaraṇa of the first Pāda of the first Adhyāya.

A commentary on the Rahasyatraya-mīmāṁsā of Varavaramuni: by Lakṣmaṇācārya *alias* Rāmānujadāsa.

लोकाचार्यकृतां रहस्यविवृतिं मीमांसया शोभितां
श्रीमान् सौम्यवरो मुनिस्सुविशदं वृत्त्यात्मना व्याकरोत् ।
श्रीमत्कौशिकशुद्धत(स)त्त्वगुरुणा लब्धात्मजन्मत्रयो
दासो लक्ष्मणनामको विवृणुते भाष्यात्मना तन्मुदे ॥

* * * *

श्रीमल्लोकगुरूद्धूतं रहस्यत्रयगोचरम् ।
मीमांसाशास्त्रमत्रेदमाद्याधिकरणं मतम् ॥

तत्र रहस्यत्रयमीमांसा विषयः; सा कर्तव्या न वेति संशयः । तदर्थमिदं विचार्यते ।

See under the next number for the end.

---

## No. 5341. रहस्यत्रयमीमांसाभाष्यम्.

## RAHASYATRAYAMĪMĀṀSĀBHĀṢYAM.

Substance, palm-leaf. Size, $17\frac{1}{8} \times 1\frac{1}{2}$ inches. Pages, 72. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, new.

37 leaves are wanting in the beginning of the first Pāda of the first Adhyāya and the second Pāda contains only one leaf.

Same work as the above.

See under the previous number for the beginning.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End :**

सर्वार्थदो द्विधा मन्त्रो न्यायाभ्यां दशमोदितः ।
द्विधा कर्मादिसाद्यं तु त्रिभिरेकादशोदितम् ॥
द्वादशे पञ्चभिर्द्वेधा प्रपत्त्यर्थत्वमीरितम् ।
त्रयोदशे प्रधानार्थः कृत्स्नो बोध्यस्त्रिभिर्मतः ॥
चतुर्दशे त्रिभिर्मन्त्रादर्थोत्कर्षस्समर्थितः ।
द्वादशाधिकरण्येषा मन्त्रवैभवपेटिका ॥

**Colophon :**

श्रीमत्कुशिककुलतिलकस्य श्रीशुद्धसत्त्वश्रीगुरुचरणतनूजरत्नस्य तत्प्रसादलब्धसकलविद्यावैशद्यस्य रामानुजदासस्य कृतौ रहस्यत्रयमीमांसाभाष्ये प्रथमस्याध्यायस्य प्रथमः पादः ॥

* * * *

इष्टत्वेन ज्ञातेष्टसाधनताज्ञानमात्रस्य प्रयोजनपर्यवसायितया क्वापि कदापि कस्यापि प्रमाणपथानारूढत्वात् । अपि च कृत्यनन्तरभविष्यत्स्वरूपप्राप्यत्ववत्तया ज्ञातस्यैवेष्टसाधनताज्ञानं प्रयोजनपर्यवसायीति प्राप्यत्वेनायनपदोपा.

---

## No. 5342. रहस्यत्रयसारगाथार्थवर्णनम्.

RAHASYATRAYASĀRAGĀTHĀRTHAVARṆANAM.

Substance, palm-leaf. Size, $17\frac{5}{8} \times 1\frac{1}{2}$ inches. Pages, 65. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

A commentary in Sanskrit on the Tamil stanzas occurring in the Rahasyatrayasāra : by Śrīnivāsa of Bhāradvājagōtra.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

द्रामिडी(:) कठिना गाथा रहस्यत्रयसारगाः ।
विवृणोति विशेषेण श्रीनिवासो बुधाग्रणीः ॥

अतिगहनवेदान्तभागानां तात्पर्यं दिव्यसूरिकृतप्रबन्धान् सार्थमधीत्य विशदं येन निर्णीतमित्युक्तिव्याजेन वक्ष्यमाणार्थानां सुदृढप्रमाणमूलत्वं महत्परिगृहीतत्वं साम्प्रदायिकत्वं चाह ।

**End :**

"ये ब्राह्मणास्तेऽहमसंशयं नृप तेष्वर्चितेष्वर्चितोऽहं यथावत् ।
तेष्वेव तुष्टेष्वहमेव तुष्टो वैरं च तैर्यस्य ममापि वैरम् ॥"

इत्यादिशास्त्रार्थे प्रतिष्ठितत्वरूपसम्पदलङ्कृतं मे मनः किञ्चिदपि न कुप्यतीत्यर्थः ॥

**Colophon :**

इति श्रीभारद्वाजकुलतिलकस्य श्रीनिवासाचार्यस्य कृतिषु श्रीरहस्यत्रयसारगाथार्थवर्णनं सम्पूर्णम् ॥

---

No. **5343.** रहस्यत्रयसाराधिकारसङ्ग्रहः.

RAHASYATRAYASĀRĀDHIKĀRASAṄGRAHAḤ.

Pages, 21. Lines, 5 on a page.

Begins on fol. 110*a* of the MS. described under No. 3958.

Complete.

An epitome in 70 stanzas of the Rahasyatrayasāra which is a work of 32 chapters by Vēdāntācārya.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

श्रीमान् वेङ्कटनाथार्यः . . सन्निधत्तां सदा हृदि ॥

पापिष्ठः क्षत्रबन्धुश्च पुण्डरीकश्च पुण्यकृत् ।
आचार्यवत्तया मुक्तौ तस्मादाचार्यवान् भवेत् ॥

प्रपदनमये विद्याभेदे प्रतिष्ठितचेतसः
प्रतिपदमिह प्रज्ञादायं दिशन्तु दयाधनाः ।
शठरिपुशुकव्यासप्राचेतसादिनिबन्धन-
श्रमपरिणतश्रद्धाशुद्धाशया मम देशिकाः ॥

एते मह्यमपोढमन्मथशरोन्माथाय नाथादयः
त्रय्यन्तप्रतिनन्दने(नी)यविविधोदन्ताः स्वदन्तामिह ।
श्रद्धातव्यशरण्यदम्पतिदयादिव्यापगाव्यापकाः
स्पर्धापल्लवविप्रलम्भपदवीवैदेशिका देशिकाः ॥

* * * *

कर्मोविद्या च चक्रे प्रतिपुरुषमिहानादिचित्रप्रवाहे
तत्तत्काले विपत्तिर्भवति हि विविधा सर्वसिद्धान्तसिद्धा ।
तल्लब्धस्वावकाशप्रथमगुरुकृपागृह्यमाणः कदाचित्
मुक्तैश्वर्यान्तसम्पन्निधिरपि भविता कश्चिदित्थं विपश्चित् ॥

श्रुतिपथविपरीतं क्ष्वेलकत्वश्रुतौ च प्रकृतिपुरुषभोगप्रापकांशोऽनवद्यः ।
तदिह विबुधगुप्तं यत्तु भीता विचिन्वन्त्युपनिषदमृताब्धेरुत्तमं सारमार्याः ॥

**End:**

आस्तिक्यवान्निशितबुद्धिरनभ्यसूयः सत्सम्प्रदायपरिशुद्धमनास्सदर्थे ।
सङ्केतभीतिरहितस्स तृणेष्वसक्तः सद्वर्तनीमनु विधास्यति शाश्वतीं नः ॥

रहस्यत्रयसारोऽयं वेङ्कटेशविपश्चिता ।
शरण्यदः पतिविदां सम्मतस्समगृह्यत ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कवितार्किकसिंहाय . . वेदान्तगुरवे नमः ॥

**Colophon:**

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य मम नाथस्य वेदान्ताचार्यस्य कृतिषु रहस्यत्रयसारस्सम्पूर्णः ॥

वङ्गीपुरं विजयरामानुजदासेन लिखितम् ॥

---

No. **5344.** रहस्यत्रयसाराधिकारसङ्ग्रहः.

RAHASYATRAYASĀRĀDHIKĀRASAṄGRAHAḤ.

Pages, 13. Lines, 6 on a page.

Begins on fol. 209*a* of the MS. described under No. 2283.

Complete.

Same work as the above.

---

No. **5345.** रहस्यत्रयसाराधिकारसङ्ग्रहः—सव्याख्यः.

RAHASYATRAYASĀRĀDHIKĀRASAṄGRAHAḤ WITH COMMENTARY.

Pages, 55. Lines, 8 on a page.

Begins on fol. 7*a* of the MS. described under No. 30.

Complete.

Same work as the above with the addition of a commentary.

**Beginning:**

यं तर्कयन्ति निगमान्तगुरोः कलेति प्रज्ञाविरक्तिमुखसद्गुणपूर्तिभूम्ना
गोपालदेशिककृपापरिपूर्णपात्रं वेदान्तलक्ष्मणमुनिं शरणं प्रपद्ये ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इह खलु भगवान् कवितार्किकसिंहस्सर्वतन्त्रस्वतन्त्र(:)श्रीमद्वेङ्कट-नाथार्यः वेदान्ताचार्यवर्यः रहस्यत्रयसाराधिकारार्थं सङ्ग्रहेण शिष्यबुद्धि-समाधानं कुर्वन्नादावाचार्यप्रणामरूपमङ्गळव्याजेन स्वरूपयाथात्म्यज्ञानं प्रदापयते ॥

(मू.)

प्रपदनमये विद्याभेदे प्रतिष्ठितचेतसः
प्रतिपदमिह प्रज्ञादायं दिशन्तु दयाधनाः ।
शठरिपुशुकव्यासप्राचेतसादिनिबन्धन-
श्रमपरिणतश्रद्धाशुद्धाशया मम देशिकाः ॥

(व्या.)

विद्याभेदे प्रपदनमये पृथगुपायत्वेन प्रमाणप्रसिद्धे प्रपदन इत्यर्थः । स्वार्थे मयट् । तत्र प्रतिष्ठितचेतसः स्थिरचित्ताः । अनेन महाविश्वासस्सूचितः ॥

End :

उक्तमेवार्थं विविच्य दर्शयति—

(मू.)

आस्तिक्यवान्निशितबुद्धिरनभ्यसूयः
सत्सम्प्रदायपरिशुद्धमनास्सदर्थी ।
सङ्केतभीतिरहितस्स तृणेष्वसक्तः
सद्वर्तनीमनुविधास्यति शाश्वतीं नः ॥

(व्या.)

आस्तिक्यवान् शास्त्रविश्वासशाली । निशितबुद्धिः अश्रुतार्थधारणा-शक्तः । अनभ्यसूयः गुणदोषाविष्करणरहितः । सता श्रुतिस्मृत्यविरोधेन सम्प्रदायेन परिशुद्धमना निस्संशयहृदयः । सदर्थी सद्भ्यः अर्थविशेषं जिज्ञासुः । सङ्केतभीत्या रहितः । तृणेषु निस्सारग्रन्थेषु ।

356

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



असक्तः पुरुषः यः सः । शाश्वतीमविच्छिन्नसम्प्रदायाम् । सद्वर्तनीं सन्मार्गम् । अनुविधास्यति । सर्वं समञ्जसम् ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

---

No. **5346.** रहस्यत्रयसाराधिकारसङ्ग्रहव्याख्या.

RAHASYATRAYASĀRĀDHIKĀRASAṄGRAHA-VYĀKHYĀ.

Pages, 50. Lines, 6 on a page.

Begins on fol. 216*a* of the MS described under No. 2283.

Eight stanzas of the original and the colophon are found given at the end of the commentary.

Same commentary as described under the previous number.

**Beginning :**

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

इह खलु श्रीमान् वेदान्ताचार्यवर्यः रहस्यत्रयाधिकारार्थसङ्ग्रहे शिष्यबुद्धिसमा(धा)नं कुर्वन्नादावाचार्यप्रणामरूपमङ्गळव्याजेन स्वरूपयाथात्म्यज्ञानं प्रार्थयते—प्रपदन[स]मय इति । विद्याभेदे प्रपदन[स]मये पृथगुपायत्वेन प्रमाणप्रसिद्धे प्रपदन इत्यर्थः । स्वार्थे मयट् । तस्मिन्प्रपदने प्रतिष्ठितचेतसः स्थिरचित्ताः । अनेन महाविश्वासस्सूचितः । दयाधनाः कृपामात्रप्रसन्नाः । शिष्यानुवृत्तिनिरपेक्षा इत्यर्थः । शठरिपुशुकव्यासप्राचेतसादीनां निबन्धनेषु प्रबन्धेषु श्रमेण सन्तताभ्यासेन परिणतया कर्मज्ञानयोरङ्गत्वाद्भक्तेश्शक्ताधिकारत्वाच्च अनुपायतया प्रपत्तिरेवानुरूपोपाय इत्येवंरूपया बुद्ध्या परिपक्वया श्रद्धया शुद्धः निस्संशयः आशयो येषां ते तथोक्ता देशिका मम ज्ञानादिगुणरहितस्य ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End :**

निष्प्रत्यूहम् अङ्गवैकल्यादिप्रत्यवाद(य)रहितम् । सत्पाथेयं सतामनन्यशरणागतानां पाथेयं किमपि प्रपद्या(त्त्या)ख्यसाधनम् । विदधे प्रवर्तयामास ॥

व्यासाम्नायपयोधिकौस्तुभनिभं हृद्यं हरेरुत्तमं
श्लोकं केचन लोकवेदपदवीविश्वासितार्थं विदुः ।
एषामुक्तिषु मुक्तिनाथविशिखासोपानपङ्क्तिष्वमी
वैशम्पायनशौनकप्रभृतयः श्रेष्ठाश्शिर्^कम्पिनः ॥

अथ जिगमिषुराद्यं धाम दिव्यं त्रिधाम्नः
श्रुतिविविधपरीक्षाशोधिते क्वापि पात्रे ।
अनघगुणदशायामाहितस्नेहपूरे
प्रदिशति निरपायं सम्प्रदायप्रदीपम् ॥

निरुपधिदयादिव्योदन्वत्तरङ्गनिरङ्कुशै-
र्नियमयति यश्शिष्यान् शिक्षाक्रमैर्गुणसङ्क्रमैः ।
अचर(म)गुरोराज्ञापारम्परीपरवानसौ
न(स)परि(र)मिह तांस्तल्लक्षेण स्वमप्यभिरक्षति ॥

अशिथिलगुरुभक्तिस्तत्प्रदं(शं) सादिशीलः
प्रचुरबहुमतिस्तद्वस्तुवास्त्वादिकेऽपि ।
गुणवति दिशि योक्तुं गोपयन् सम्प्रदायं
कृतविदनघवृत्तिः किं न विन्दे निधानम् ॥

अध्यासीनतुरङ्गवस्त्र(क्त्र)विलसज्जिह्वाग्रसिंहासना
दाचार्यादिह देवतां समधिकामन्यां न मन्यामहे ।
यस्यासौ भजते कदाचिदजहद्भूमा स्वयं भूमिकां
मग्नानां भविनां भवार्णवसमुत्ताराय नारायणः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



करबदरितविश्वः कश्चिदाचार्यदृष्ट्या
मुषितनिखिलमोहो मूलमन्त्रादिभोगः ।
सगुणविषयसिन्धौ सम्प्रदायं प्रयच्छन्
सुचरितशिलहारी सूरिबृन्दाभिवन्द्यः ॥
निर्विष्टं यतिसार्वभौमवचसामावृत्तिभिर्यौवनं
निर्धूतेतरपारतन्त्र्यनिरया नीतास्सुखं वासराः ।
अङ्गीकृत्य सतां प्रसत्तिमसतां गर्वोऽपि निर्वापि(त)-
श्शेषायुष्यविशेषिदम्पतिकृतं दीक्षामुदीक्षामहे ॥
आस्तिक्यवान्निशितबुद्धिरनभ्यसूयस्सत्सम्प्रदायपरिशुद्धमनास्सदर्थी ।
सङ्केतभीतिरहितस्स वृणेप्वसत्करसद्वर्तनीमनुविधास्यति शाश्वतीं नः ॥
इति यतिराजमहानसपरिमि(म)ळपरिवाहवासितां पिबत ।
विबुधपरिषन्निषेव्यां वेदान्तोदयनसम्प्रदायसुधाम् ॥

**Colophon:**

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु श्रीरहस्यत्रयसाराधिकारसङ्ग्रहस्सम्पूर्णः ॥

---

## No. 5347. रहस्यमञ्जरी.
## RAHASYAMAÑJARĪ.

Pages, 17. Lines, 8 on a page.

Begins on fol. 117*a* of the MS. described under No. 2283.

Complete.

This treatise explains away certain inconsistencies in Vedic and Vedantic interpretation of Viśiṣṭādvaitins as pointed out by the followers of the Advaita-Vēdānta.

**Beginning:**

सौम्यजामातृयोगीन्द्ररहस्यामृतवर्षिणी ।
रहस्यमञ्जरी रम्या राजते नितरां भुवि ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्तर्बहिश्चेति श्रुत्या ह्यणोरन्तर्विभोर्बहिः ।
विष्णोः श्रुता या व्याप्तिस्तां श्रुतिरेवाह च स्फुटम् ॥

अणोरणीयान्महतो महीयानिति विस्तरात् ।
समुदायः कथं वा स्यादेकत्रैव विरुद्धयोः ॥

विरुद्धयोस्समावेश एकाधिकरणे यदि ।
भेदाभेदावपि तथा स्यातां ब्रह्मण्यबाधितौ ॥

सर्वाद्वैतार्थकथने को दोष इति चेन्न तत् ।
विरुद्धघटना शक्या विरोधपरिहारवत् ॥

**End:**

श्रुतिस्मृतिगुरूक्तीनां विरुद्धार्थप्रकीर्तनात् ।
पराङ्कुशमुनीन्द्रादिसूत्रभाष्यविरोधतः ॥

सौम्यजामातृयोगीन्द्रसम्प्रदायप्रवर्तकैः ।
सर्वज्ञैस्सर्वविद्भिश्च सर्वशास्त्रार्थपारगैः ॥

काणादतन्त्रवत्पूर्वपक्षत्वेनाप्यनादरात् ।
अस्माभिरपि न स्पृश्यमित्यस्माभिर्विभाव्यते ॥

श्रीकौशिकाधीशवरप्रदायैलब्धात्मसत्त्वेन नतार्तिहन्त्रा ।
गार्ग्येण सम्यग्लिखिता रहस्यमञ्जर्यसौ सन्मधुकृत्सुभोग्या ॥

---

## No. 5348. रहस्यरक्षा.

## RAHASYARAKṢĀ.

**Pages, 96. Lines, 8 on a page.**

Begins on fol. 133*a* of the MS. described under No. 4881.

Incomplete.

A treatise on Śaraṇāgati or absolute self-surrender to God as a means of salvation.

**Beginning:**

प्रख्यातश्रुतविभवान् गुरूनशेषान् प्रश्रित्य प्रणयति वेङ्कटेशसूरिः ।
लक्ष्मीशप्रपदनवैभवप्रतिष्ठां रागान्ध्यप्रशमकरीं रहस्यरक्षाम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लक्ष्मीपतेर्यतिपतेश्च दयैकधाम्नोः योऽसौ पुरा समजनिष्ट जगद्धितार्थम् ।
प्राच्यं प्रकाशयतु वः परमं रहस्यं संवाद एष शरणागतिमन्त्रसारः ॥

अत्र भगवान् भाष्यकारस्सदाचार्यसम्प्रदायागतद्वयप्रवचनेन स्वयमनुष्ठितन्यासाख्यविद्याविशेषं स्वानुबन्धिसञ्जिजीवयिषया यथावत्प्रकाशयन्

सीतामुवाचातियशा राघवश्च महाव्रतम् ।
सीतासमक्षं काकुत्स्थमिदं वचनमब्रवीत् ॥

इत्यादिप्रकारेण श्रीप्रपत्तितदनुग्रहपूर्वकं स्वस्य भगवता सञ्जातं स्वयं स्वप्रयोजनं संवादविशेषं निबध्नाति । प्रतिवचनांशस्तु शरणागतिवशीकृतशरण्याभिप्रायविशेषोन्नयनेन निबध्यत इत्येके । इह संपत्स्यत इत्यन्तं श्रीमच्छब्दाभिप्रेतदर्शनम् ।

See under the next number for the end.

---

## No. 5349. रहस्यरक्षा.

## RAHASYARAKṢĀ.

Substance, palm-leaf. Size, $19\frac{1}{4} \times 1\frac{5}{8}$ inches. Pages, 126. Lines, 11 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Stōtraratnabhāṣya 46*a*.

Complete.

Same work as the above.

See under the previous number for the beginning.

**End:**

नारायणशब्दोऽपि कान्तस्ते पुरुषोत्तमः, शान्तानन्तमहाविभूतीत्यादिभिः सङ्ग्रहेणोक्तः । चरणशब्दोपलक्षितविग्रहशब्दोऽपि मूर्तं ब्रह्मेत्यादिना प्रदर्शितः ।

एवं स्वाक्षिप्तसिद्धांशविशदीकारपूर्वकम् ।
साध्यं प्राप्यमुपायं च स्तोत्रे सन्दर्शयिष्यति ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कविकथकसिंह इत्थं त्रय्यन्ताचार्य इत्यपि ख्यातः ।
व्यवृणुत यामुनविहितां रा(र)मास्तुतिं वेङ्कटेशकविः ॥

इति किल चतुःश्लोकीसारप्रकाशनलक्षणा
पटुतरधियां प्रज्ञासौधे न्यबध्यत सद्गुणैः ॥

विमतकथकव्यावक्रोशीविकत्थनलम्बन-
व्यसनशमनव्यक्तोत्सेधा जयद्रथपट्टिका ॥

**Colophon:**

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु रहस्यरक्षायां चतुश्श्लोक्यधिकारः तृतीयः ॥

कवितार्किकसिंहाय . वेदान्तगुरवे नमः ॥

---

## No. 5350. रहस्यरक्षा.

## RAHASYARAKṢĀ.

Substance, palm-leaf. Size, $12\frac{5}{8} \times 1\frac{5}{8}$ inches. Pages, 210. Lines, 7 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Stōtrādhikāra only.

Same work as the above.

---

## No. 5351. रहस्यरक्षा.

## RAHASYARAKṢĀ.

Substance, palm-leaf. Size, $17 \times 1\frac{1}{2}$ inches. Pages, 38. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 30*b*. The other works herein are Kirātārjunīyavyākhyā 1*a*, Aṣṭaślōkīvyākhyā 12*a*, Śrīguṇaratnakōśavyākhyā 50*a*.

Catuśślōkyadhikāra only complete.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5352. रहस्यरक्षा.

### RAHASYARAKṢĀ.

Substance, palm-leaf. Size, 16⅜ × 1¼ inches. Pages, 150. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, not old.

Second chapter complete; eight leaves in the beginning are lost.

Same work as the above.

---

## No. 5353. रहस्यरक्षा.

### RAHASYARAKṢĀ.

Substance, palm-leaf. Size, 17½ × 1½ inches. Pages, 88. Lines, 9 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Contains the first two Adhikāras.

Same work as the above.

---

## No. 5354. रामानुजसिद्धान्तः.

### RĀMĀNUJASIDDHĀNTAḤ.

Substance, palm-leaf. Size, 12 × 1¼ inches. Pages, 364. Lines, 5 on a page. Character, Grantha. Condition, good. Appearance, old.

Incomplete.

A treatise which establishes, by quoting passages from various authoritative sources, that Nārāyaṇa is the same as the Supreme Brahman of the Vēdānta.

**Beginning:**

श्रियःपतिर्नारायण एव सर्वस्मात्पर इति सर्वेष्वपि श्रुतिस्मृतीतिहासपुराणेषु प्रतिपाद्यते । तैत्तिरीये तावत् "नारायणपरं ब्रह्म तत्त्वं नारायणः परः । नारायणपरो ज्योतिरात्मा नारायणः परः" इत्यादि ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथा "यस्मात्परं नापरमस्ति किञ्चित्" इत्यादि । महोपनिषदि — "नारायणपरं ब्रह्म तत्त्वं नारायणः परः" इत्यादि । ऐतरे(य)ब्राह्मणे — "अग्निर्वै देवानामवमो विष्णुः परमस्तदन्तरेण सर्वा अन्या देवताः" इति । यजुष्यपि — "अग्निरवमो देवतानां विष्णुः परमः" इति ।

**End :**

पादाभ्यङ्गैश्शिरोऽभ्यङ्गैर्द(ा)नमानार्चनादिभिः ।
मृष्टवाक्यविशेषेण पूजनीयो द्विजोत्तमः ॥
अन्नं हि सदृशो लोके सम्यक् श्राद्धसमन्वितम् ।
नरः स्वर्गमवाप्नोति देवैश्चाप्यभिपूज्यते ॥

भीष्मः—

नारदेनैवमुक्तस्तु प्रदाम्यन्नमहं सदा ।
अन्नं प्राणास्त्वमप्यन्नं तस्मा . . . ॥

---

No. **5355.** रामानुजसिद्धान्तनिर्णयसङ्ग्रहः.

RĀMĀNUJASIDDHĀNTANIRṆAYASAṄGRAHAḤ.

Substance, palm-leaf. Size, 8¾ × 1¼ inches. Pages, 48. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new.

Incomplete.

A summary of the doctrines of the Rāmānujasiddhānta.

**Beginning :**

श्रीरामानुजसिद्धान्तस्वरूपस्य विनिर्णयम् ।
सर्वेषां सुखबोधाय सङ्ग्रहेण विदृण्महे ॥
निर्मत्सराः प्रगृह्णन्तु प्रमाणशरणा बुधाः ।
समत्सरास्त्यजन्त्वन्ये शास्त्रेषु विकलाशयाः ॥
श्रीरामानुजसिद्धान्ते श्रीमान्नारायणो हरिः ।
परतत्त्वं तदावासश्श्रीमद्वैकुण्ठमक्षयम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नित्यानन्दानुभूतिस्तु तत्र मुक्तिः प्रकीर्तिता ।
भक्तिप्रपत्ती तस्यास्तु साधने परिकीर्तिते ॥
श्रौतत्वात्तत्र भक्तेस्तु सा तपः परिकीर्तिता ।
स्त्रीशूद्रद्विजबन्धूनामधिकारो न तत्र हि ॥
वेदाधिकाराभावेन वेदमन्त्राधिकारिणाम् ।
त्रैवर्णिकानामेवास्यामधिकारः प्रपञ्चितः ॥

**End:**

अमृतं प्रातरित्युक्तं मध्याह्ने क्षीरसम्भवः ।
अपराह्णे जलं प्रोक्तं सायाह्ने रुधिरं भवेत् ॥
इति स्मृतिसमादिष्टकाल एव हि तच्चरेत् ।
नित्यत्वेनोक्तमन्वादियुगादिषु च वैष्णवः ॥
महाळये विशेषेण प्रेताभ्युदयसाधने ।
श्राद्धं नैव प्रकुर्वीत . . . . . ॥

अधिकृतशास्त्रस्य प्राबल्यात्स्वाधिकारविरोधे सूत्रत्यागोऽपि न दोषाय ।
इति श्रीनिगमान्तार्यदिव्यसूक्तिर्विजृम्भते ॥

---

No. **5356.** लक्ष्मीतन्त्रम्.
LAKṢMĪTANTRAM.

Pages, 357. Lines, 22 on a page.

Begins on fol. 1*a* of the MS. described under No. 4336.

Complete in fifty Adhyāyas.

This forms part of the Pāñcarātrāgama and treats about the goddess Lakṣmī.

**Beginning:**

नमो नित्यानवद्याय जगतस्सर्वहेतवे ।
ज्ञानाय निस्तरङ्गाय लक्ष्मीनारायणात्मने ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सिंहासनारुणाधारमीदृशं सोमभूषितम् ।
अकलङ्केन्दुसूर्याग्नि लक्ष्मीरूपमुपास्महे ॥
वेदवेदाङ्गतत्त्वज्ञं सर्वशास्त्रविशारदम् ।
सर्वसिद्धान्ततत्त्वज्ञं धर्माणां मागता(गेसं)गमम् ॥
जितेन्द्रियं जिताधा(हा)रं रागद्वेषावशीकृतम् ।
चतुर्दशाङ्गयोगस्थं प्रसङ्ख्यानपरायणम् ॥

* * * *

प्रातस्सन्ध्यामुपासीनमृषिं हुतहुताशनम् ।
पतिव्रतानां परमा धर्मपत्नी यशस्विनी ॥

* * * *

विदुषी सर्वधर्मज्ञा नित्यं पतिमनुव्रता ।
पत्युः श्रुतवती तास्ता विविधा धर्मसंहिताः ।
प्रणिपातपुरस्कारमनसूया वचोऽब्रवीत् ॥

अनसूया—

भगवन् सर्वधर्मज्ञ मम नाथ जगत्पते ।
त्वत्त एव श्रुता धर्मास्ते ते बहुविधात्मकाः ॥
ज्ञानानि च विचित्राणि फलरूपादिभेदतः ।
भवद्वचो भगवद्धर्मो विशिष्टो विधृतो मया ॥

* * * *

रहस्यत्वादपृष्टत्वान्न त्वया प्रकटीकृतम् ।
तदहं श्रोतुमिच्छामि लक्ष्मीमाहात्म्यमुत्तमम् ।
यत्स्वभावा हि सा देवी यत्स्वरूपा यदुद्भवा ।
यत्प्रमाणा यदाधारा यदुपाया च यत्फलम् ॥
तदहं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर ।

* * * *

**Colophon:**

इति श्रीपाञ्चरात्रे सारे लक्ष्मीतन्त्रे प्रथमोऽध्यायः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End :**

निर्णीतवेदतन्त्राय मद्भक्ताय विशेषतः ॥
भूयसीं वहते भक्तिं वासुदेवे जनार्दने ।
शुचिव्रताय दक्षाय सदनुष्ठानशीलिने ॥
एतत्ते कथितं सर्वं यत्पृष्टाहमिह त्वया ।
प्रीताहं त्वयि देवेश किं भूयश्श्रोतुमर्हसि ॥

**Colophon :**

इति श्रीपञ्चरात्रसारे लक्ष्मीतन्त्रे श्रीसूक्तप्रकाशो नाम पञ्चाशोऽध्यायः ॥

लक्ष्मीतन्त्रं समाप्तम् ॥

---

No. **5357.** लक्ष्मीशसमाराधनसङ्ग्रहः.

LAKṢMĪŚASAMĀRĀDHANASAṄGRAHAḤ.

Substance, palm-leaf. Size, 17⅝ × 1¼ inches. Pages, 2. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 82*a*. The other work herein is **Virōdhaparihāra** 1*a*.

Incomplete.

A brief method of performing the Ārādhana (worship) of Viṣṇu : by **Vātsya-Varadārya**.

**Beginning :**

भगवत्पादुकाभ्यां नमः । स्वामिन् मन्त्रासनमलङ्कुरुष्व । मन्त्रासने—

याज्ञार्घ्यपाद्याचामस्रगन्धताम्बूलपादुकाः ।

स्नानासने—

पीठीं शाटीं वस्त्रशुद्धतैलं स्नानांशुकान् वृणु ।
सतूर्यं मङ्गलस्नानं कङ्कतप्रोतपादुकाः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

इति नित्योक्तलक्ष्मीशसमाराधनसङ्ग्रहः ।
दयालुनाथं वात्स्येन वरदार्येण निर्मितः ॥

---

## No. 5358. लक्ष्म्युपायत्वदीपः.
## LAKṢMYUPĀYATVADĪPAḤ.

Substance, palm-leaf. Size, $10\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 178. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete.

A treatise investigating whether the goddess Lakṣmī has or has not equal and co-extensive powers with Viṣṇu: by Vēṅkaṭārya, son of Narasiṁhatātārya of Śrīśaila family and pupil of Parakāladēśika.

The book was transcribed by Śrīnivāsarāghavadāsa, son of Vēlāmūr Śrīraṅgācārya of Bhāradvājagōtra, a resident of Pillaipākkam (a village near Śrīperumbūdūr) in the Chingleput district and the transcription was completed on Monday the new moon day of the month of Mēsa in the year Pramādi.

**Beginning:**

. . . . . . . . मिव व्यासज्यवृत्तिकम् ।
ययोरेकं विजयते दिव्यौ तौ दम्पती श्रये ॥
वेदान्तद्वयसारार्थो विदितो यत्प्रसादतः ।
. . . . . . . . दाब्जे शरणं भजे ॥
श्रीश्रीशयोः पदाम्भोजे येन न्यस्तभरोऽस्म्यहम् ।
तस्य तातगुरोः पादपद्मं शरणमाश्रये ॥
. . . . . . . . . न्निखिलार्थप्रकाशकः ।
हृदये मेऽस्तु सततं यस्योदयहतं तमः ।
रामानुजगुरुं नत्वा तद्गुरूनखिलानपि ।
कैङ्क . . . . . . . . . य कल्मषापहम् ॥
लक्ष्म्याः पुरुषकारत्वमात्रं नोपायता भवेत् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति केचित्प्रभाषन्ते तत्पराक्रियतेऽधुना ॥
. . . . . . . . . . . . . . रम् ।

तमेवं विद्वानमृत इह भवति, आत्मा वारे द्रष्टव्यश्श्रोतव्यो मन्तव्यो निदिध्यासितव्यः . . . . . . न भगवन्मात्रनिष्ठम्;

नित्यैवैषा जगन्माता विष्णोः श्रीरनपायिनी ।
यथा सर्वगतो विष्णुस्तथैवेयं द्विजोत्तम ॥

* * * *

लक्ष्मीस्वरूपस्यापि कारणत्वव्यापकत्वनियन्तृत्वादिवचनात् ।

**End:**

अतोऽनन्यपरानेकश्रुतिस्मृत्यनुसारतः ।
पत्नीविशिष्ट एवैकः प्रपत्तव्य इहोदितः ॥ इति ।

तदेव लक्ष्म्याः पुरुषकारत्ववदुपायत्वस्यापि श्रुतिस्मृतिभगवच्छास्त्रसम्प्रदायसिद्धतया पुरुषकारप्रपदनपूर्वकं लक्ष्मीविशिष्टभगवच्चरणारविन्दशरणागत्यैव मोक्षसिद्धिरिति निष्कण्टकोऽयं घण्टापथः ॥

**Colophon:**

श्रीमच्छ्रीशैलतातप्रवरगुरुपदे न्यस्तरक्षाभरस्त-
त्सम्यक्प्राप्तागमान्तद्वय इह परकालाख्यसद्देशिकेन्द्रात् ।
श्रीमच्छ्रीशैलवंशाम्बुधिविधुनरसिंहाग्र्यतातार्यसूनु-
स्तेने श्रीवेङ्कटार्यस्सुजनहिततमं लक्ष्म्युपायत्वदीपम् ॥

पिळ्ळपाकमिति प्रसिद्धे लक्ष्मीनारायणपुरे वसतश्चतुस्तन्त्रपारीणस्य भारद्वाजकुलेन्दोर्वेलामूर् श्रीरङ्गाचार्यविद्वच्छिखामणेस्सूनुना श्रीनिवासराघवदासेन नैजावलोकननिमित्तं लक्ष्म्युपायत्वदीपोऽसौ प्रमादिनामसंवत्सरे मेषमासे अमावास्यायामिन्दुवासरे लिखितोऽभूत् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5359. वङ्गिपुरेश्वरकारिकावलिः.

## VAṄGIPURĒŚVARAKĀRIKĀVALIḤ.

Pages, 52. Lines, 7 on a page.

Begins on fol. 13*a* of the MS. described under No. 5269.

Complete.

An epitome in 115 stanzas of the daily religious duties of a Śrī-Vaiṣṇava.

**Beginning :**

मातरं रङ्गनाथस्य शौरिराजपुरोहितम् ।
गुरुं वरदराजस्य वन्दे वङ्गिपुराधिपम् ॥
श्रियः पतिं जगद्योनिं प्रणम्य पुरुषोत्तमम् ।
कथयामि यथाशक्ति तत्पूजाक्रममञ्जसा ॥
ब्राह्मे मुहूर्ते संप्राप्ते निद्रां त्यक्त्वा प्रसन्नधीः ।
हरिर्हरिर्हरिरिति व्याहरेद्वैष्णवः पुमान् ॥
उत्थाय शयने तस्मिन्नासीनो नियतेन्द्रियः ।
त्रस्तनिर्विण्णहृदयो व्यर्थं वीक्ष्य गतं वयः ॥
तापत्रयेण चाक्रान्तस्तीव्रेणाध्यात्मिकादिना ।
दावजेनाग्निनालीढो भ्राम्यन्निव वने मृगः ॥

**End :**

कृपयैवास्य देवस्य सर्वोऽप्यर्हति सत्क्रियाम् ।
इत्यानुपूर्वी रचिता परमब्रह्मणो हरेः ॥
आराधनविधिस्सम्यक् वैष्णवानां मनःप्रियः ।
पठतां शृण्वतां चैनां विहितां श्रद्धयात्मना ॥
श्रोतुमिच्छावतां चापि श्रुत्वा चाप्यनसूयताम् ।
भगवच्चरणाम्भोजपरिचर्यैकविग्रहा ॥
वर्धतां वैष्णवी लक्ष्मीरक्षया भक्तिवृद्धिदा ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अष्टोत्तरै(र)नुपमैः श्लोकानां पञ्चभिश्शतैः ।
उपचारानुपूर्वीयं रचिता परमात्मनः ॥

**Colophon :**

इति वङ्गिवंशेश्वरकारिकावलिस्संपूर्णा ॥

---

No. 5360. वसिष्ठसंहिता.

VASIṢṬHASAṀHITĀ.

Pages, 130. Lines, 20 on a page.

Begins on fol. 1a of the MS. described under No. 5201.

Adhyāyas 1 to 14.

A Saṁhitā of the Pāñcarātrāgama. The subjects treated of herein are—

| | |
|---|---|
| १. अभिगमनम्. | ८. शूद्रधर्माः. |
| २. उपादानभगवदाराधने. | ९. पञ्चसंस्कारः. |
| ३. अनुयागविधिः. | १०. प्रायश्चित्तविधिः. |
| ४. स्त्रीधर्मकथनम्. | ११. विष्णुप्रतिष्ठाविधिः. |
| ५. श्राद्धविधिः. | १२. गृहार्चनप्रतिष्ठाविधिः. |
| ६. राजधर्माः. | १३. सच्छूद्रविधिः. |
| ७. वैश्यधर्माः. | १४. सच्छूद्राचारक्रिया. |

**Beginning :**

वसिष्ठं जपतां श्रेष्ठमभिगम्य मुनीश्वराः ।
प्रणिपत्य यथान्यायमिदं वचनमब्रुवन् ॥
भगवन् कर्मणा केन नरा मोक्षमवाप्नुयुः ।
कर्म तद्ब्रूहि विप्रेन्द्र श्रोतुमिच्छामहे वयम् ॥

वसिष्ठः—

ब्राह्मणः क्षत्रियो वैश्यश्शूद्रश्चान्तरजास्तथा ।
एते स्वकर्मनिरताः प्राप्नुवन्ति परां गतिम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वकर्म. ब्राह्मणादीनां प्रवक्ष्यामि श्रुतीरितम् ।
यूयं समाहिता भूत्वा शृणुध्वं मुनिपुङ्गवाः ॥
कर्म तत्र प्रवक्ष्यामि ब्राह्मणस्य विधानतः ।
क्षत्रियस्य च वैश्यस्य शूद्रस्यान्तरजाम(जन्म)नः ॥
स्त्रीणामपि च सर्वासां ब्रह्मणोक्तं मया श्रुतम् ।

*  *  *  *

**Colophon:**

इति वासिष्टसंहितायामभिगमनं नाम प्रथमोऽध्यायः ॥

**End:**

सच्छूद्रेषूपसन्ना(षु प्रपन्ना)नां विरक्तानां[वै]परं पदम् ।
प्राप्तानामपरं कर्म नारायणबलिस्स्मृता ॥
विष्णुं संस्तुत्य सन्वेनं कृत्वा तन्त्रेण केवलम् ।
नारायणबलिं कुर्याद्द्वादशेऽहनि तन्त्रतः ॥
भगवत्सान्निधौ वापि गुरोरपि च सन्निधौ ॥
सन्निधावपि भक्तानां कार्यमध्ययनं क्रमात् ॥

**Colophon:**

इति वसिष्ठसंहितायां सच्छूद्रचरमक्रिया नाम चतुर्दशोऽध्यायः ॥

---

## No. 5361. वसिष्ठसंहिता.

## VASIṢṬHASAṀHITĀ.

Pages, 119. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 3815.

Adhyāyas 1 to 12 complete, the 13th incomplete.

Same work as the above.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. 5362. वसिष्ठसंहिता.

VASIṢṬHASAṀHITĀ.

Substance, palm-leaf. Size, 15⅛ × 1⅛ inches. Pages, 13. Lines, 5 on a page. Character, Grantha. Condition, much injured. Appearance, new.

Begins on fol. 22*b*. The other works herein are Ādityahṛdaya 1*a*, Viśvāmitrasaṁhitā 4*a*, Gāyatrīsahasranāma 29*a*, Gāyatryupāsanāvidhi 51*a*.

This manuscript contains that portion of the Vasiṣṭhasaṁhitā which treats about the Gāyatrīmantra.

**Beginning :**

वसिष्ठ उवाच—

गायत्रीमन्त्रसिद्ध्यर्थं षण्मन्त्राणि क्रमात्ततः ।
वक्ष्ये यन्त्रोक्तमन्त्राणि शृणुष्व सुतपोधनः ॥
नित्यकर्मविशुद्ध्यर्थं विष्णुसायुज्यहेतवे ।
सदा वै विप्रवर्याणां सर्वधर्मादिसिद्धये ॥
प्रणवं बीजमन्त्रं स्याद्गायत्र्यास्सर्वदा मुने ।
पिण्डमन्त्रं तुरीयं स्याद्गायत्रीसंज्ञिकं पदम् ॥
नारायणं मूलमन्त्रं संज्ञामन्त्रं भवेत्सदा ।
ओमापोज्योतिरित्येतत्पदमन्त्रमितीरितम् ॥
ओं तत्सवितुरित्युक्तं गायत्री स्यान्महामुने ।
एतदेव हि गायत्री विप्राणाम्मुक्तिदायिनी ॥
वातं वह्निं समायुक्तं महाबलसमन्वितम् ।

* * *

धर्मार्थकाममोक्षार्थी ब्रह्मास्त्रेणैव लभ्यते ।
ब्रह्मदण्डं तथा वक्ष्ये सर्वशस्त्रास्त्रनाशनम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गायत्रीं सम्यगुच्चार्य परोरजसि संयुतम् ।
एतद्धि ब्रह्मदण्डं स्यात् सर्वशस्त्रास्त्रभक्षकम् ॥

* * * *

**Colophon:**

इति श्रीमद्वसिष्ठसंहितायाम् अर्घ्यप्रयोगो नाम पञ्चचत्वारिंशोऽध्यायः ॥

वद मे सर्वधर्मज्ञ वसिष्ठ सुतपोधन ।
मोक्षधर्मार्थसिद्ध्यर्थं गायत्रीयन्त्रमुत्तमम् ॥

वसिष्ठ उवाच—

* * * *

**Colophon:**

इति श्रीमद्वसिष्ठसंहितायां गायत्रीयन्त्रयोगो नाम पञ्चमोऽध्यायः ॥

क्रमेण मन्त्रयन्त्राणि वक्ष्ये शृणु महामते ।

* * * *

ज्ञात्वेत्वं(त्थं)यन्त्रमुद्धार्य गायत्रीं जपमाचरेत् ॥

**Colophon:**

इति श्रीमद्वसिष्ठसंहितायां गायत्रीयन्त्रविधानं संपूर्णम् ॥

---

## No. 5363. विरोधपरिहारः.

## VIRODHAPARIHĀRAḤ.

Pages, 162. Lines, 6 on a page.

Begins on fol 1*a* of the MS. described under No. 5357.

Complete.

A work intended to clear the doubts and difficulties which one may meet with in the Rahasyatrayasāra: by Varadācārya, also called Nainārācārya, son of Vēdāntadēśika.

This manuscript is said to have belonged to a Śrīnivāsācārya of Tiruppāṛkaḍal.

357-A

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

श्रीमल्लक्ष्मणयोगीन्द्रसिद्धान्तविजयध्वजम् ।
विश्वामित्रकुलोद्भूतं वरदार्यमहं भजे ॥

श्रीमद्वेङ्कटनाथार्यनन्दनो(नः)प्रणमाम्यहम् ।
शेषशायिपदाम्भोजशेषत्वज्ञाननिर्मलान् ॥

आविष्कृत(:) श्रुतिगणैरविरोधवृत्त्या
काले कदापि रचयन् रजनीं दिवापि ।

भुक्तं विहङ्गमभुजङ्गमभूपतिभ्यां
पादाम्बुजं दिशतु पाण्डवसारथिर्मे ॥

ऊरीकृत्य तु लक्ष्मणार्यपृतनासन्तानदन्तावळान्
पृथ्वीनिर्जरतल्लजानुपनिषत्सिद्धान्तबद्धाशयान् ।

अन्यानप्यरविन्दलोचनदयाविन्यासधन्या वयं
तूलायापि तृणाय वा न च तुषच्छेदाय मन्यामहे ॥

अहं खलु लक्ष्मणार्यराद्धान्तनिष्णातविष्णुभक्तजननासीरवीरः शुनासीरपुरोहितसदृशमपि परपक्षवादिनमन्यथयन्ननन्यथासिद्धगुरुभक्तिप्रवाहपरिणतपरभक्त्युपलभ्यमानसभ्यानुविधेयवचनो वरदाचार्यनामा पङ्कजनाभपादारविन्दमकरन्दमधुकरायमाणमानसैर्धर्मसम्प्रदायवर्तनीव्यवस्थापनसन्तोषितसर्वाचार्यै(:)श्रीमद्वेदान्ताचार्यैरस्मत्तातपादैरगस्त्यभाषया प्रणीतमध्यात्मविद्भिरवधार्यं रहस्यत्रयसारार्थविरोधपरिहारमशेषदेशवासिनामपि परशेषत्वज्ञ(ा)नरसिकानां सुग्रहणसिद्ध्यै सोपबृंहणनिपुणनिरूपितनिगमसंवादसंस्कृतया संस्कृतभाषया सम्यगनुकथयामि । तथा हि—मुमुक्षूणाम-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वश्यज्ञातव्येष्वर्थेषु प्रतीयमानानां विरोधानामप्रशमने "ज्ञानेन हीनाः पशुभिस्समानाः" इत्यवस्था भवेत् ।

**End:**

अनयैव दिशा सर्वशङ्काशङ्कुनिरासतः ।
निरङ्कुशधियस्तत्त्वं पश्यन्तु हरिकिङ्कराः ॥

एवमुक्तप्रकारेणावश्यवैशद्येष्वर्थेषु केषाञ्छ(ञ्चिच्छ)ङ्काशङ्कूनां निरासे शिष्टानामपि निश्शेषनिरासार्थमाचार्यग्रन्थेषु तेष्वनवरतानुसन्धानपरायणैर्भवितव्यं नारायणपरायणैरिति सर्वमवदातम् ॥

इत्थं हैतुकसम्प्रदायपदवीनिष्णातविद्वद्भट-
ग्रीवाभङ्गमपातनोद्धि वरदाचार्यो विचार्य स्वयम् ।
शङ्कातङ्कविधूननं शतमिदं शान्ताशयप्रीतये
श्रीमल्लक्ष्मणयोगिराजपदवीप्रस्थानजैत्रध्वजः ॥

मुक्तिं शिष्यकरस्थयामि मुरभिद्भक्तिं व्यवस्थापये
तद्भक्तेषु च कारयामि नियतं भक्तं समस्तं जनम् ।
राजन्यानपि रञ्जयामि समये रामानुजार्योक्तिभिः
सर्वारीनपि साहसेन विजयीचीक(जितांस्तांश्च)करीमि क्षितौ ॥

**Colophon:**

इति श्रीनिखिलतार्किकचूडामणिना सर्वतन्त्रस्वतन्त्रेण वेदान्त(ा)-चार्यवेङ्कटनाथपुत्रेण श्रीमता वरदाचार्येण कृतो विरोधपरिहारस्समाप्तः ॥

श्रद्धालुलाळनीये श्रावणमासगतरोहिणीतारे ।
श्रीविष्णुवरदश्री(धी)मान् वेङ्कटनाथार्यसुततया जातः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5364. विरोधपरिहारः.

## VIRŌDHAPARIHĀRAḤ.

Substance, palm-leaf (Śrītāla). Size, 19½ × 1¾ inches. Pages, 58. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1a. The other work herein is Sudarśanapāñcajanyapratiṣṭhāvidhi 30a.

The ends of leaves are worn out.

Complete.

Same work as the above.

---

## No. 5365. विष्णुसंहिता.

## VIṢṆUSAṀHITĀ.

Substance, palm-leaf. Size, 11½ × 1⅛ inches. Pages, 264. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Complete in 30 Paṭalas.

This forms part of the Pāñcarātrāgama and deals with a variety of subjects connected with Vaiṣṇava religion and worship.

**Beginning:**

श्रीशैलशिखरे सिद्धमासीनं तन्त्रपारगम् ।
प्रणम्यात्युज्ज्वलाकारं दृष्टवानौपमन्यवः ॥
(तव रूपं नि)रीक्ष्या(क्षेऽ)र्के जित्वेवासि (व)स्थितं त्विषा ।
नेदृशं जात्वहं रूपं दृष्टवानस्मि कस्यचित् ॥
किं देवानां भवानेको मुनीनामथ वा नृणाम् ।
त्वामहं प्रष्टुमिच्छामि तव विस्मापितस्त्विषा ॥
तेजसोऽत्यद्भुतस्यास्य श्लाघनीयस्समुद्भवः ।

* * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति पृष्टोऽब्रवीत्सिद्धो हरिं ध्यात्वा कृताञ्जलिः ।
हर्षगद्गदया वाचा सरोमाश्चाश्रुविक्रियः ॥
श्रूयतामखिलं वक्ष्ये मायैवैषा हि वैष्णवी ।
बुद्ध्याद्यक्षार्थनानात्वैर्या मोहयति देहिनः ॥
सुमतिर्नाम वैदोऽहमृषेरिध्मवतस्सुतः ।
साङ्गेषु त्रिषु वेदेषु तन्त्रेषु च कृतश्रमः ॥
बाल्येऽहं ब्रह्मचर्येण शैलेऽस्मिन्विमलोदके ।
रैभ्यस्य जपतोऽभ्याशे चिरं शुश्रूषकोऽवसम् ॥

**End** :

तस्मात्सर्वप्रयत्नेन गृहे सततमर्चयेत् ।
स्थापयेद्रोपयेच्चात्र वर्धते श्रीरचञ्चला ॥

**Colophon** :

इति श्रीविष्णुसंहितायां योगपटलस्त्रिंशत्(:) ॥
विष्णुसंहिता समाप्ता ॥

---

No. **5366.** **विष्णुसंहिता.**

VIṢṆUSAṀHITĀ.

Pages, 16. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 5218.
Contains Adhyāyas 11 and 12.
Similar to the above.

**Beginning** :

जाबालिः—

वसिष्ठ तपतां श्रेष्ठ धर्मज्ञ करुणानिधे ।
कथं सद्गतिमायान्ति कलौ पापालये नराः ॥
विलुप्ते तपसि श्रेष्ठधर्मे नष्टे परावरे ।
केनोपायेन लघुना नरास्सद्गतिमाप्नुयुः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वक्तुमर्हसि धर्मज्ञ जगतां हितकाम्यया ।
महर्षे त्वं समर्थोऽसि तत्त्वसारविवेचने ॥

वसिष्ठः—

साधु पृष्टं त्वया तात जाबाले तपतां वर ।
तत्त्वसारमिदं वक्ष्ये कलौ सद्गतिसाधनम् ॥
मन्त्राणां परमो मन्त्रः संसारव्याधिभेषजम् ।
श्रीमदष्टाक्षरो मन्त्रस्सर्वसाधनमुच्यते ॥
ओं नमो नारायणायेत्येष ह्यष्टाक्षरो मनुः ।
ओमित्येकाक्षरं प्रोक्तं नम इत्यक्षरद्वयम् ॥
नारायणायेति पञ्चाक्षराणि कथितानि वै ।
एतन्नारायणस्याष्टाक्षरं पदमितीर्यते ॥
यो वेद सार्थकं ह्येतत्सोऽमृतत्वमुपाश्नुते ।
कदाचित्तत्पदाम्भोजान्न प्रच्यवति कर्हिचित् ॥

* * * *

**Colophon :**

इति शुकपाञ्चरात्रे विष्णुसंहितायां वसिष्ठजाबालिसंवादे कलिसद्गतिविवरणं नाम एकादशोऽध्यायः ॥

**End :**

पारम्पर्ये तु विच्छिन्ने मूलं नष्टं न संशयः ।
प्रयत्नेनापि संरक्ष्यः पारम्पर्यक्रमो बुधैः ॥
एवमाचार्यकलशाभिषेकक्रम ईरितः ।
किमन्यच्छ्रोतुकामोऽसि वदस्व तपतां वर ॥

**Colophon :**

इति शुकपाञ्चरात्रे विष्णुसंहितायां वसिष्ठजाबालिसंवादे आचार्यकलशाभिषेको नाम द्वादशोऽध्यायः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5367. वैखानसागमः.

## VAIKHĀNASĀGAMAḤ.

Substance, paper. Size, 11 × 8⅜ inches. Pages, 343. Lines, 18 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Contains the Adhyāyas 1 to 33 complete, the 34th incomplete.

A treatise containing a set of rules for the building of temples and the conduct of worship, etc., in Viṣṇu temples according to what is called the Vaikhānasa Āgama: by Bhṛgu.

**Beginning:**

ऋषय ऊचुः—

ब्रह्मपुत्र ऋषिश्रेष्ठ त्वमेव ब्रह्मणः प्रियः ।
त्वमेव सर्ववेत्तासि त्वमेव वदतां वरः ॥
वृत्तस्सर्वः श्रुतोऽस्माभिः समूर्ताराधनक्रमात् ।
देवस्य भूपरीक्षादिप्रायश्चित्तावसानिकः ॥
यद्यत्तत्राविशेषोक्तं तत्तद्विस्तरतो वद ।

भृगुरुवाच—

युष्माभिश्चोदितं सर्वं प्रवक्ष्याम्यनुपूर्वशः ॥
विष्णुपूजाविपाकेन जगदेतत्सुखं लभेत् ।
ऐहिकामुष्मिकावाप्तिस्तत एव सुसिध्यति ॥
मानसी होमपूजा च बेरपूजे च(ति)सा त्रिधा ।

* * * *

**Colophon:**

इति वैखानसे भृगुप्रोक्तायां संहितायां क्रियाधिकारे भूपरीक्षाविधिर्नाम प्रथमोऽध्यायः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

ऐशान्ये प्राङ्मुखे कुर्यात् भोगमोक्षार्थसिद्धये ।
अन्यानुक्तविमानानां(नि) शिल्पशास्त्रोक्तवत् कुरु ॥

**Colophon:**

इति मानसारे सामान्यबेरप्रतिष्ठाविधानं नाम त्रयस्त्रिंशोऽध्यायः ॥

* * * *

महाहविस्ततो दद्यात् गुळैरत्र घृतैर्युतम् ।
एकाब्दादि दशाब्दान्तं प्रायश्चित्तं विधीयते ॥
पौराण्येन पुनः कृत्वा पौराण्येन पुनः क्रिया ।
अन्यरूपं न कर्तव्यं कर्ता तत्र विनश्यति ॥
पुष्पाणां श्वेतवर्णादिः सत्त्वराजसतामसाः ।
कृष्णनीलोत्पलादन्यतामसादीनि वर्जयेत् ॥

---

No. **5368.** **वैखानसागमः.**

VAIKHĀNASĀGAMAḤ.

Substance, paper. Size, 13¼ × 8¼ inches. Pages, 286. Lines, 24 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete in 96 Paṭalas.

Similar to the above.

By Marīci.

**Beginning:**

कोटिमन्मथलावण्यं सप्तगन्धर्वसन्निभम् ।
श्रीरुक्मिणीप्राणनाथं वन्दे श्रीकृष्णदैवतम् ॥
श्रुतिस्मृतिनदीपूर्णं शास्त्रकल्लोलसङ्कुलम् ।
विष्णुभक्त्युदकं शुद्धं वन्दे वैखानसार्णवम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भृग्वङ्गिरोमरीच्यत्रि[:] पुलस्त्य(ः): पुलह(:) क्रतुः ।
तथा वसिष्ठो दक्षश्च नव ब्रह्मा प्र(ब्रह्माणो नव)कीर्तिताः ॥

एते विखनसश्शिष्यास्सर्वशास्त्रविशारदाः ।
वैखानसानि मन्त्राणि चतुस्संख्यानि पद्मज ।

* * * *

**Colophon:**

इति वैखानसे मरीचिप्रोक्ते विमानार्चनकल्पे ऋषिप्रश्नोत्तरं नाम प्रथमः पटलः ॥

**End:**

देवं सदा ध्यातुमशक्यत्वात् प्रतिमादिषु पञ्चमूर्तिनामभेदैस्सह समावाह्यार्चयेत् । एतत्समूर्तार्चनं सर्वसिद्धिप्रदत्वात् गृहे देवायतने वा समूर्तार्चनमेव कारयेत्; अन्यथा न परं पदमाप्नोति । तस्मात् श्रुति-चोदितं परं गुह्यमेतत् ज्ञानयोगश्च ज्ञात्वा समाचरेदित्याह भगवान् मरीचिः ॥

**Colophon:**

इति श्रीवैखानसे मरीचिप्रोक्ते विमानार्चनाकल्पे योगशास्त्रप्रशंसा नाम षण्णवतितमः पटलः ॥

---

## No. 5369. वैखानसागमः.

## VAIKHĀNASĀGAMAḤ.

Substance, paper. Size, $8\frac{1}{2} \times 6\frac{3}{4}$ inches. Pages, 135. Lines, 12 on a page. Character, Grantha. Condition, good. Appearance, new.

Nityārcanaprakaraṇa only complete.

Similar to the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

अथ मरीचिप्रोक्तार्चनाविधिप्रारम्भः—

लक्ष्मीवल्लभमाद्यन्तां विघ(ख)नोमुनिमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥

अथ विष्णोर्नित्यार्चनविधिं व्याख्यास्यामः—

नित्यकर्माणि च कृत्वा पद्माक्षतुलसीधा(दा)म धारयन् केशवादिद्वादशनामभिरूर्ध्वपुण्ड्रं द्वादशधा कुर्यात् । सोत्तर्यो(रीयो)ष्णीषाङ्गुलीयकोभयपवित्रं धारयन् प्र तद्विष्णुस्तपतेति देवालयं प्रदक्षिणं प्रणामं च कृत्वा । प्र तद्विष्णुस्तपते वीर्याय । मृगो न भीमः कुचरो गरिष्ठाः ।

**End :**

ततो द्यावापृथिव्योरिति कवाटबन्धनं करोति । अकालार्चनेऽल्पायुर्भवेत्तस्मात् काले समर्चयेत् ।

* * * *

सर्वदा तृप्तिकरं पुनरावृत्तिरहितं शाश्वतं सायुज्यं प्रविशन्तीति विज्ञायते ॥

**Colophon :**

इति सप्तमखण्डस्समाप्तः ॥

इति श्रीवैखानसार्चनकल्पे विस्तारमरीचिप्रोक्त नित्यार्चनप्रकरणं समाप्तम् ॥

उपचारापदेशेन कृतानहरहर्मया ।
अपराधानिमान् सर्वान् क्षमस्व पुरुषोत्तम ॥

* * * *

नर्तकैर्गायकैर्वापि तदा वादित्रवादकैः ।
अपराध(:)कृतं(तो) यत्र क्षमस्व पुरुषोत्तम ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5370. वैष्णवप्रक्रिया.

## VAIṢṆAVAPRAKRIYĀ.

Pages, 2. Lines, 10 on a page.

Begins on fol. 5*a* of the MS. described under No. 2974.

The work is said to have been written in accordance with the teachings in the Pañcarātrarakṣā of Vēdāntadēśika.

Stanzas inculcating the obligatoriness of the performance of all prescribed religious duties on the part of a Prapanna.

**Beginning:**

श्रीमन्नाथमुनिं श्रीमद्यामुनार्यं यतीश्वरम् ।
नत्वा सङ्ग्रहतो वक्ष्ये वैष्णवप्रक्रियामहम् ॥
गृह्यादौ धर्मशास्त्रे यदुदितमभवत्तत्प्रपन्नैश्च कार्यं
नित्यं नैमित्तिकं वाप्यगतिकमधिकारानुरूपं ह्यनन्यैः ।
साक्षादित्याख्यजैमिन्यभिधमुनिगिराम्नीन्द्रसामान्यनाम्नां
कृत्वा साक्षात्परत्वं भगवत इति हि प्रक्रिया वैष्णवी स्यात् ॥

**End:**

सूत्रत्यागो न दोषः स्मृत इति निगमान्तार्यसाद्दिव्यसूक्त्या
वैरुद्ध्यात्स्वाधिकारादनितरशरणैर्वैष्णवैर्वीतरागैः ।
अर्थोऽयं श्रीशपादप्रपदनमहितश्रीभरद्वाजकूल-
स्वीयायां संहितायां जयति हि नितरामेष घण्टापथः स्यात् ॥
श्लोकत्रयेण संक्षिप्ता वैष्णवप्रक्रिया मया ।
श्रीपाञ्चरात्ररक्षादिदेशिकोक्त्यनुसारिणी ॥

---

## No. 5371. वैष्णवोत्सवः.

## VAIṢṆAVŌTSAVAḤ.

Pages, 8. Lines, 9 on a page.

Begins on fol. 47*a* of the MS. described under No. 5236.

Complete.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Enjoins the recitation of Tiruvāymoḷi on Śri-Vaiṣṇavas on the 13th day after a person's death.

**Beginning:**

शुभादौ द्विजवर्यैश्च सर्वसम्पच्छुभावहम् ।
सहस्रशाखाध्ययनं कारयेद्वैष्णवोत्तमः ॥
अशुभान्ते विशेषेण द्राविडी ब्रह्मसंहिता ।
अध्येतव्या द्विजवरैराशौचाघविनाशिनी ॥
वृद्धावादौ क्षये चान्ते द्राविडी ब्रह्मसंहिता ।
अध्येतव्यं द्विजश्रेष्ठैराद्यं गीतसहस्रकम् ॥

**End:**

पूजयित्वा प्रतिगृहं पट्टास्तरणपूर्वकम् ।
प्रवेशयित्वा स्वगृहं सर्वालङ्कारभूषितम् ॥
तेषां शक्त्यैव(वि)त्तादि दत्वा शक्त्यनुरूपतः ।
संपूजयित्वेदं कार्यं पुत्रस्येति सुनिश्चितम् ॥
इति भविष्यत्पुराणे स्मृतिसारसङ्ग्रहाध्याये.

---

No. **5372.** **शङ्खचक्रधारणविधिः.**

ŚAṄKHACAKRADHĀRAṆAVIDHIḤ.

Substance, palm-leaf. Size, 15⅝ × 1¼ inches. **Pages, 73.** **Lines, 5** on a page. Character, Grantha. Condition, injured. Appearance, old.

Incomplete.

A treatise containing authoritative extracts from Vēdas and Upaniṣads to show that the purificatory and initiative ceremony of Samāśrayaṇa is really a religious sacrament.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

इह खलु श्रुतिस्मृतीतिहासपुराणागमाचारसिद्धं तप्तशङ्खचक्रमुद्राधारणं परमवैदिकधर्म इति वेदविदां सम्प्रदायः। तत्र तावत् श्रुतयः यजुर्वेदे तृतीयकाठके—

चरणं पवित्रं विततं पुराणम्। येन पूतस्तरति दुष्कृतानि। तेन पवित्रेण शुद्धेन पूताः। अति पाप्मानमरातिं तरेम। लोकस्य द्वारमर्चिमत्पवित्रम्। ज्योतिष्मद्भ्राजमानं महस्वत्। अमृतस्य धारा बहुधा दोहमानम्। चरणं नो लोके सुधितां दधातु।

यजुर्वेदे आरुणकेतुके, इतरेषु वेदेषु च—

पवित्रं ते विततं ब्रह्मणस्पते। प्रभुर्गात्रणि पर्येषि विश्वतः। अतप्ततनूर्न तदामो अश्नुते। श्रृतास इध्व(द्व)हन्तस्तत्समासतेति।

सामवेदे मैत्रायणीयशाखायां सुदर्शनोपनिषदि—

पवित्रमित्यग्निः। अग्निर्वै सहस्रारः। सहस्रारो नेमिः। नेमिना तप्ततनूर्ब्रह्मणस्सायुज्यं सलोकतामाप्नोतीति।

ऋग्वेदे भास्करसंहितायाम्—

चक्रं बिभर्ति वपुषाभितप्तबिलं देवानाममृतस्य विष्णोः।
स एति नाकं दुरिता निधूय प्रयान्ति यद्यतयो वीतरागाः॥ इति।

बृहदारण्यकभेदे—

निचिक्षेप सुषर्णं भिद्यमानं मध्येबाहुमदधत्सुदर्शनम्। विष्णोरिदं भूरिदं भूरितेजः प्रधर्षाति दिवानक्तं बिभृयुस्तश्च(ञ्च)नास इति।

**End:**

वसन्त्यज्ञानसम्मूढास्तं देशं परिवर्जयेत्।
शिखा यज्ञोपवीतं च चक्रचिह्ने च कुण्डले॥
ऊर्ध्वपुण्ड्रं च दण्डं च पवित्रं च कमण्डलुम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एतानि धारयेद्विप्राः शुक्लदन्ता दृढव्रताः ॥
वैष्णवस्य च विप्रस्य विष्णुभक्तस्य धीमतः ।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥
यस्योदरे (महा)देवि वैष्णवस्य महात्मनः ।
प्राकृतान्नं प्रकुरुते तस्य प्राकृतलक्षणम् ॥
तस्मात्प्राकृतसंसर्गं त्यजेयुर्वैष्णवा नराः ।
प्राकृतान्नं विशालाक्षि विशेषेण विवर्जयेत् ॥
इदं पवित्रं पापघ्नं पुण्यं दुस्स्वप्ननाशनम् ।
पठतां शृण्वतां वापि विष्णुसालोक्यमावहेत् ॥

इति ब्रह्माण्डपुराणे मोक्षधर्मे उमामहेश्वरसंवादे षट्पञ्चाशोऽध्यायः ॥

नारदः—

सुदर्शनस्य माहात्म्यं पितामह महामते ।
वक्तुमर्हसि सर्वज्ञ परं कौतूहलं हि मे ॥

इत्यारभ्य.

---

No. **5373.** **शठकोपद्राविडमाहात्म्यम्.**

ŚAṬHAKŌPADRĀVIḌAMĀHĀTMYAM.

Pages, 21. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 5263.

On the greatness and holy character of the Tiruvāymoḷi of Śaṭhakōpamuni *alias* Nammāḷvār.

**Beginning:**

मार्कण्डेयपुराणे मध्यभागे भगवद्धर्मे षष्ठोऽध्यायः । सनत्कुमारः—

भगवन्भूतभव्येश भगवत्पार्षदेश्वर ।
भक्तेषु वर्तमानेषु शठकोप इति श्रुतः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मुनिश्रेष्ठतया चासौ श्रुतपूर्वो मयाधिकः ।
तस्यानुभावं भगवन्नशेषं वक्तुमर्हसि ॥
वैवस्वतमनोः प्राप्ते अष्टाविंशतिके कलौ ।
वंशे विशां मुनिः कश्चित् भविष्यति हरिप्रियः ॥

* * *

नियोगेन महाविष्णोर्वेदवेदान्तसंहिताः ।
करिष्यति सहस्रेण गाथां द्राविडभाषया ॥
कृपया तत्प्रणीता या ब्रह्मविद्या महत्तरा ।
अध्येतव्या द्विजैर्भूपैर्वैश्यैश्शूद्रैश्च नित्यशः ॥

**End:**

श्रीरङ्गस्थलवेङ्कटाद्रिकरिगिर्यादौ शताष्टोत्तर-
स्थाने ग्रामनिकेतनेषु च सदा सान्निध्यमासेदशे(दुषे) ।
अर्चारूपिणम(र्चना)द्यनुचितं स्वीकुर्वते विग्रहं
पूजां चापि नृणां फलं वितनुते श्रीशाय तस्मै नमः ॥

गद्यत्रयं निगमशेखरदीपसारं वृत्त्यर्थसङ्ग्रहमपि प्रथितं च नित्यम् ।
(गीता)र्थभाष्यमपि देशिकपुम्.

---

No. **5374.** शुद्धयाजिलक्षणम्.

ŚUDDHAYĀJILAKṢAṆAM.

Pages, 19. Lines, 7 on a page.

Begins on fol 1*a* of the MS. described under No. 2980.

Complete.

On the distinguishing characteristics of the Śuddhayājin class of Prapannas. They substitute the word Nārāyaṇa for words denoting the names of other gods in all their ritualistic Mantras.

358

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

जयतु विमलकीर्तिर्वीतभुक्चक्रवर्ती क्षितिधरमणिवर्ती श्रीशघण्टांशमूर्तिः ।
हृदयकमलवर्ती श्रीहयग्रीवमूर्तिः परहितविबुधार्तिस्सर्वतन्त्रस्वतन्त्रः ॥

के तावत् शुद्धयाजिन इति ? ये भगवदसाधारणनारायणशब्दैरेव भगवन्तं यजन्ति, न तु साधारणैरग्नीन्द्रादिशब्दैरपि, ते शुद्धयाजिनः । तथाविधाश्च श्वेतद्वीपवासिन एव, न तु जम्बूद्वीपवासिनोऽपि । एतेषामग्नीन्द्रादिशब्दैरपि भगवद्याजकत्वादिति केचिदपरिशीलितप्रमाणसम्प्रदायास्सङ्गिरन्ते ।

**End:**

यथा वा क्वचिदेकान्तिशब्दः परमैकान्तिपरः, क्वचिदुभयपरश्च प्रकरणादिवशात्; एवं शुद्धयाजिशब्दोऽपि क्वचिद्रहस्याम्नायनिष्ठपरः. क्वचिदनन्ययाजिमात्रपरोऽपि भवितुमर्हतीति सर्वं प्रमाणसम्प्रदायजातं समञ्जसं मदी(यहृ)दये ॥

---

No. **5375.** शुद्धयाजिलक्षणम्.

ŚUDDHAYĀJILAKṢAṆAM.

Pages, 13. Lines, 7 on a page.

Begins on fol. 16*a* of the MS. described under No. 5276.

Complete.

Similar to the above.

**Beginning:**

शुद्धयाजिनः के? मिश्रयाजिनः के? इति विष(श)ये ये तावत् अग्नीन्द्रादिसाधारणमन्त्रेण(ा)सम्मिश्रकेवलभगवन्मन्त्रैरेव स्वविहितकर्माणि कुर्वते, ते शुद्धयाजिनः । ये अग्नीन्द्रादिमन्त्रैरपि कुर्वते, ते मिश्रयाजिन इति । अथवा ये अग्नीन्द्रादिबद्धशरीरकवेषं विनैव साक्षादेव भगवन्तं यजन्ते, ते शुद्धयाजिनः । बद्धशरीरकतयापि ये यजन्ते, ते मिश्रयाजिनः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

कौर्मे—

ध्यायन्ति तत्परं ब्रह्म वासुदेवं सनातनम् । इत्यादिषु विशेषितत्वात् । ये वाकनिष्ठा विविक्तमतयस्ते शुद्धाः शुद्धयाजिनस्ते वासुदेवैकयाजिनश्चेति तत्स्वरूपकथनम् । अत्र वाकनि[षण्णि]ष्ठत्वमेव शुद्धयाजिव्यवहारप्रधानमिति बोध्यम् ॥

---

No. 5376. शूद्रादिपञ्चसंस्कारविधिः.

ŚŪDRĀDIPAÑCASAṀSKĀRAVIDHIḤ.

Pages, 14. Lines, 5 on a page.

Begins on fol. 35*a* of the MS. described under No. 5236.

Complete.

On the rules to be observed in connection with the religious ceremony of Pañcasaṁskāra in relation to Śūdras and women.

**Beginning:**

वासिष्ठसंहितायाम्—

स्त्रीशूद्रादीनां पञ्चसंस्कारविधिः, शौनकः—

भगवन् सर्वधर्मज्ञ चतुर्मुखतनूभव ।
हितमुक्तं त्वया ब्रह्मन् सर्वेषां हितकाम्यया ॥
ब्राह्मणक्षत्रियादीनामशेषपुरुषार्थदः ।
सर्वेषामेव धर्माणामुत्तमो वैष्णवो विधिः ॥

* * * *

न चात्र वैदिका मन्त्रा न च प्रणवसंकथा ।
स्वाहाकारवषट्कारौ न क्वचिच्छूद्रकर्मणि ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नमोऽन्तैर्मूर्तिमन्त्रैश्च हेतिमन्त्रैश्च तादृशैः ।
आवात्त(ह)नादिकां पूजामाचार्यः कुरुते क्रमात् ॥

**End:**

यस्य प्रसादकलया बधिरश्शृणोति पङ्गुः प्रधावति जवेन च वक्ति मूकः ।
अन्धः प्रपश्यति सुतं लभते च वन्ध्या तं देवदेववरदं शरणं गतोऽस्मि ॥

एतच्छ्लोकद्वयेन शरणागतिं कारयेत् । पश्चाद्भगवत्पादाम्बुजतीर्थं दद्यात् । श्रीपादतीर्थं स्वभुक्तशेषं च दद्यात् ॥

**Colophon:**

शूद्रपञ्चसंस्काराविधिस्सम्पूर्णः ॥

---

No. **5377.** शेषसंहिता.

ŚEṢASAṀHITĀ.

Pages, 3. Lines, 9 on a page.

Begins on fol. 68*a* of the MS described under No. 5245.

Contains the 11th Adhyāya only. This Adhyāya is in support of the theory that the Śrāddha ceremony should not be performed on an Ēkādaśī day.

**Beginning:**

श्रीपाञ्चरात्रे शेषसंहितायाम् एकादशीश्राद्धनिषेधः—

शेषः—

एकादश्यां न भुञ्जति भक्ष्यादींश्च न भक्षयेत् ।
फलमूलादिलेह्यादीन् वर्जयेत्सर्वदा बुधः ॥

दशम्येकादशीविद्धा वाह्निविद्धा च रोहिणी ।
नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

त(स्मा)त्सर्वप्रयत्नेन पाश्चरात्रं प्रकल्पयेत् ।
पाश्चरात्रेण मार्गेण सर्वं सिध्यति सर्वदा ॥

**Colophon:**

शेषसंहितायामेकादशोऽध्यायः ॥

---

No. **5378**. श्रिय उपायत्वविचारः.

ŚRIYA UPĀYATVAVICĀRAḤ.

Pages, 50. Lines, 7 on a page.

Begins on fol. 46*a* of the MS. described under No. 4889.
Similar to the one described under No. 5358.

**Beginning:**

श्रीमान्वेङ्कट . . . . . . . . हृदि ॥

श्रियो जगुरुपायत्वमाचार्यास्सप्रमाणकम् ।
तां नमामि तदीयांश्च तद्ग्रन्थान् तां श्रियं हरिम् ॥

श्रीसूक्तं पुरुषसूक्तं च ययोस्तत्त्वैकजीवने ।
उपायोपेयभूतौ तावीश्वरौ दम्पती भजे ॥

श्रीमदाचार्यसूक्तिस्थपूर्वपक्षः परोदितः ।
तदीय एव सिद्धान्तो लिख्यते विदुषां मुदे ॥

आकारत्रयसम्पन्नामरविन्दनिवासिनीम् ।
अशेषजगदीशित्रीं वन्दे वरदवल्लभाम् ॥

**End:**

ततश्च प्रागुक्तरीत्या मातुरपि मोक्षणसङ्कल्पादिव्यापारसद्भावेऽपि कोपनिवृत्तिरूपव्यापाराभावेन मोक्षप्रदाने कृत्स्न.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. 5379. श्रीचूर्णकरणविधिः.
SRĪCŪRṆAKARAṆAVIDHIḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 29*b* of the MS. described under No. 5239.

Complete.

On how and when to make the red powder used by the Śrī-Viṣṇavas for their caste-mark.

**Beginning:**

चूर्णं कतिविधं देव किं द्रव्यं वद मे प्रभो ।
श्रीभगवानुवाच —

* * * *

फाल्गुने मासि संप्राप्ते एकादश्यां समाहितः ।
शुद्धां हरिद्रामादाय शुष्ककीटविवर्जिताम् ॥
सुवर्णां सुदृढां श्लक्ष्णां रक्तां चातिमनोहराम् ।
तत्खण्डशश्च कुर्वीत कृष्णगर्भां परित्यजेत् ॥

**End:**

इति वदति शृणोति वीक्षते वा मुरमथनस्य महोत्सवं रजन्याः ।
स भवति धनधान्यसम्पदाढ्यस्तदुपरि याति च वैष्णवं पदं सः ॥
इति सम्यङ्मया ज्ञातं श्रीचूर्णस्य विधिं परम् ।
खगाधिप परं धर्मं किमन्यच्छ्रोतुमिच्छसि ॥

**Colophon:**

इति श्रीपाश्चरात्रखगेश्वरसंहितायां श्रीचूर्णविधिर्नाम चत्वारिंशोऽध्यायः ॥

---

No. 5380. श्रीचूर्णप्रतिष्ठाप्रयोगः.
ŚRĪCŪRṆAPRATIṢṬHĀPRAYŌGAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 2*a* of the MS. described under No. 896.

Complete.

On the method of purifying the red powder preliminary to its being used by the Śrī-Viṣṇavas for their caste-mark.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

पादौ प्रक्षाल्याचम्य, पवित्रपाणिः प्राणानायम्य, अस्यां तिथौ श्रीचूर्णप्रतिष्ठां करिष्य इति सङ्कल्प्य तुलसीकर्पूरश्रीगन्धकुङ्कुमपुष्पमिश्रं कृत्वा श्रियं देवीमुपह्वये . . तृप्तां तर्पयन्तीमिति श्रीऋचा प्रोक्ष्य ।

**End :**

ओं श्रीं श्रियै नम इति अष्टोत्तरसहस्रं वा अष्टोत्तरशतं वा जपित्वा लक्ष्मीशमाराध्य तदभिषिक्तं श्रीफलस्थितं श्रीचूर्णं धारयेत् ॥

**Colophon :**

इति श्रीचूर्णप्रतिष्ठाविधिः ॥

असंस्कृतां हरिद्रां तु मुखे लिम्पेन्नराधमः ।
तन्मुखं न निरीक्षेत चण्डालमिव न स्पृशेत् ॥

---

## No. 5381. श्रीतत्त्वसिद्धाञ्जनम्.
## ŚRĪTATTVASIDDHĀÑJANAM.

Substance, palm-leaf. Size, 11 × 1½ inches. Pages, 302. Lines, 8 on a page. Character, Grantha. Condition, fair. Appearance, new.

Complete.

Transcribed by Naḍādūr Vēṅkaṭācārya and completed on Wednesday the 5th day of Bahudhānya Mithuna Kṛṣṇapakṣa.

A treatise on the nature and characteristics of the goddess Lakṣmī : by Vēdāntarāmānujamuni.

**Beginning :**

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥
अस्येशानेति निस्सीमसमृद्धिं यामधीमहे ।
ईशो यः पौरुषे सूक्ते उक्तस्तौ दम्पती भजे ॥
उद्घाहुभ्यामुपनिषन्नियन्त्रीं यं च वक्ष्यति ।
जगतां जनकौ शेषी (षि)दम्पती मम तौ गती ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सेनेशाद्यैश्वरीं गौणीं कृत्वाचार्या यदैश्वरीम् ।
स्वोत्कृष्टावधिशून्येति व्याचख्यु(:) श्रीर्जयत्यसौ ॥

यन्निवेदितकारीव जगज्जन्मादिकर्मणः ।
श्रीशः क्रीडति विघ्नौघं सेनेशो निघ्नतादसौ ॥

पराशरमुनिश्रीमत्पराङ्कुशपुरस्सरान् ।
दिव्यदम्पतिसाम्राज्यदेशिकान् पर्युपास्महे ॥

श्रीश्रीशौ मिळिताविव जगद्धेतू विमुक्तिदौ ।
प्रपत्तव्यौ चेति गद्यभाष्यसारादिषु स्थितम् ॥

तत्र नानामतिक्षोभतिमिरौघैरुपप्लुते ।
आलोकसिद्ध्यै श्रीतत्त्वसिद्धाञ्जनमुदश्च्यते ॥

यद्यप्याचार्यचरणैरेव सर्वं निरूपितम् ।
निरस्य सर्वचोद्यानि बह्वीभिरुपपत्तिभिः ॥

तथापि तत्प्रबन्धानामपि तैस्तैः कृतास्तु याः ।
अन्यार्थकल्पनास्तासां वारणार्थमियं कृतिः ॥

केचिच्छ्रियोऽपि ब्रह्मत्वमूचुराचार्यसम्मतम् ।
जगुरन्येऽनभिमतां जगत्कारणतामपि ॥

सृष्ट्यादावनुमन्तृत्वप्रेरकत्वादिमात्रतः ।
जगज्जनकताचार्यैः क्वचिदुक्तेति चोचिरे ॥

चतुश्श्लोकाधिकारान्तप्रोक्तपक्षेषु पञ्चसु ।
अनिर्धारणमेवैके कल्प्य(ल्प)न्त्याचार्यसम्मतम् ॥

श्रीरणुर्वा विभुर्वास्तु जीवतेश्वरतापि वा ।
अस्याः पुरुषकारत्वमात्रेण ज्ञेयतेति च ॥

For Private and Personal Use Only

चतुर्थपक्षमेवान्ये मन्यन्तेऽभिमतं गुरोः ।
अन्ये पञ्चम एवेष्टस्स तुर्यान्नातिभेदवान् ॥

**End:**

एवं देव्याः प्रियोपलाळितत्वमात्रेऽमीषां श्लोकानां तात्पर्यम् । तत्तत्कार्येषु तयोस्सहैव प्रवर्तमानत्वं च स्वयमाचार्यपादैरेव कण्ठरवेण प्रदर्शितम् । यथा श्रीपरमपदसोपाने —

“யஃவாஜ்ஸம்ருயஃ | யஸ்யா வீக்ஷ்ய முகம் | யஃ ... ஹைதுகம் | என்னும்படி இருக்கிற கஷ்டதை என்னும் கவிகுஜரநாதாவின் திருவுள்ளத்தைப்பார்க்க இருவரும் ஏகஹ்ருதயராய்க்கொண்டு கடாக்ஷிக்க வாஃஸெஷி திருவருளும் பங்கயத்தாள் திருவருளும் ...று” इत्यादि ॥

इत्थमाचार्यदिव्योक्तिसंवादैरेव तद्गिराम् ।
दर्शिता(तोऽ)स्वरसा(सोऽ)त्रेति भारो नास्मासु कश्चन ॥
मनस्विनो विमृश्यैतदेवमेवेति साधवः ।
प्रसीदन्तु दयेतां मे दम्पती च जगत्पती ॥ इति ॥

बहुधान्यकृष्णपक्षपञ्चमीबुधवासरे ।
मिथुने व्यलिखल्लक्ष्म्यास्तत्त्वसिद्धाञ्जनं नवम् ॥
नडादूर् वेङ्कटाचार्यस्सम्यक् सन्दृष्टमातृकः ।

---

## No. 5382. श्रीतत्त्वसिद्धाञ्जनम्.

### ŚRĪTATTVASIDDHĀÑJANAM

Substance, palm-leaf. Size, $17\frac{7}{8} \times 1\frac{5}{8}$ inches. Pages, 210. Lines, 5 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Complete.

Same work as the above.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No 5383. श्रीपादतीर्थग्रहणम्.
## ŚRĪPĀDATĪRTHAGRAHAṆAM.

Pages, 4. Lines, 9 on a page.

Begins on fol. 79*a* of the MS. described under No. 5245.

On how to religiously collect water sanctified by contact with the feet of pious and holy men.

**Beginning:**

पराशरः—

षष्टिवर्षसहस्राणि विष्णोराराधनाः परम् ।
सकृद्वैष्णवपूजायाः कलां नार्हन्ति षोडशीम् ॥

शाण्डिल्यः—

गृहे भागवतं प्राप्तमज्ञानाद्योऽवमन्यते ।
नष्टश्रीको भवेत्सद्यः क्षीणायुःपुण्यसञ्चयः ॥

**End:**

वस्त्रं च द्विगुणीकृत्य पाणौ पाणिं च विन्यसेत् ।
तत्र तीर्थं प्रतिष्ठाप्य प्रपिबेद्बिन्दुवर्जनम् ॥
परमाणुसमं तीर्थं यावत्तु पतितं भुवि ।
तावद्वर्षसहस्राणि नरकेषु निमज्जति ॥
अर्चान्तं पूजयेद्भक्त्या स्वर्णवस्त्रादिभूषणैः ।
फलैश्च विविधैर्भक्ष्यैस्ताम्बूलैश्च समाहितः ॥
तत्तीर्थं प्राशयेद्भक्त्या पुत्रदारसुहृज्जनैः ।

---

## No. 5384. श्रीप्रपत्तिः.
## ŚRĪPRAPATTIḤ.

Pages, 5. Lines, 8 on a page.

Begins on fol. 18*a* of the MS. described under No. 5205.

Complete.

On the surrendering of one's self to the grace of the goddess Lakṣmī with a view to obtain salvation.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

स्वाचार्यमारभ्य भगवत्पर्यन्तान् गुरून् प्रणामादिभिरभ्यर्च्य,
गुरवस्तदीयगुरवो दिशन्तु मम साध्वनुग्रहम् ।
युष्मदुपजनितशक्तिमतिरहं श्रियमाश्रयामि गतभीः प्रसीदत ॥

इति गुरुभ्योऽनुज्ञां प्राप्य प्राणानायम्य श्रीगोविन्देत्याद्यस्यां शुभतिथौ . . . . . . . . . . . . . . आत्मरक्षाभरसमर्पणं करिष्य इति सङ्कल्प्य भगवानेव स्वनियाम्य . . . . इदं श्रीप्रपदनाख्यं कर्म भगवान् स्वस्मै स्वप्रीतये स्वयमेव कारयतीति सात्त्विकत्यागं कृत्वा, चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके . . . नश्यतां त्वां वृण इति कारणमन्त्रमुच्चार्य ।

**End:**

अनुष्ठितप्रपदनसञ्जातकरुणामृतरसनिर्भरैः कटाक्षैः शरणागतमवलोकयन्त्या श्रिया एतद्देहावसान एव निश्शेषसंसारनिवृत्तिपूर्वकयथावस्थितमोक्षार्थभगवत्प्रपत्तिस्तव सिध्यतु, अस्तु ते सर्वं संपत्स्यत इति दत्तवरः प्रहर्षपरवशहृदयस्सुखमासीत ॥

---

## No. 5385. श्रीप्रपत्तिः.
## ŚRĪPRAPATTIḤ.

Pages, 4. Lines, 11 on a page.

Begins on fol. 125*a* of the MS. described under No. 1873.

Complete.

Same work as the above.

---

## No. 5386. श्रीभाष्यगुरुपरम्परा.
## ŚRĪBHĀṢYAGURUPARAMPARĀ.

Pages, 15. Lines, 8 on a page.

Begins on fol. 55*a* of the MS. described under No. 5215.

Incomplete.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



A treatise which gives a list of the Gurus who are to be worshipped by the Teṅgalai Śrī-Vaiṣṇavas preliminary to the commencement of the study of the Śri-bhāṣya.

**Beginning:**

श्रीशैलेशदयापात्रं . . रम्यजामातरं मुनिम् ॥
लक्ष्मीनाथसमारम्भां . . वन्दे गुरुपरम्पराम् ॥

यो नित्यमच्युतपदाम्बुजयुग्मरुक्मव्यामोहतस्तदितराणि तृणाय मेने ।
अस्मद्गुरोर्भगवतोऽस्य दयैकसिन्धो रामानुजस्य चरणौ शरणं प्रपद्ये ॥

* * * *

वरदगुरुवेङ्कटेशौ रामानुजवरदविष्णुचित्तार्यान् ।
कुरुकेश्वरभाष्यकृतौ नमामि नाथेन यामुनं व्यासम् ॥

**End:**

चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् ।
तां पद्मनेमीं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां तां वृणे ॥
नमोऽस्मदाचार्यपरम्पराभ्यो नमो नमो भागवतव्रजेभ्यः ।
नमो नमोऽनन्तपुरस्सरेभ्यो नमोऽस्तु वैकुण्ठवधूवराभ्याम् ॥

१. रामानुजार्यः.
२. श्रीवत्सचिह्नमिश्रः (कुरुकेश्वरः.)
३. विष्णुचित्तः.
४. वरदविष्णुः.

* * *

२०. श्रीनिवासः (श्रीनिवासवेङ्कटार्ययोः शिष्यः).
२१. अनन्तार्यः (श्रीनिवासशिष्यः).

---

No **5387.** श्रीभाष्यगुरुपरम्परास्तोत्रम्.

ŚRĪBHĀṢYAGURUPARAMPARĀSTŌTRAM.

Pages, 5. Lines, 11 on a page.

Begins on fol. 120*a* of the MS. described under No. 1873.

Complete

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Similar to the above.

Intended for the Vaḍakalai Śrī-Vaiṣṇavas.

**Beginning :**

त्रय्यन्तदेशिकयतीन्द्रशठारिमूर्तिं वेदान्तलक्ष्मणमुनीन्द्रकृपात्तबोधम् ।
प्रज्ञाविरक्तिकरुणामुखसद्गुणाब्धिं वेदान्तलक्ष्मणमुनिं प्रणतोऽस्मि नित्यम् ॥
गोपालदेशिकपदाब्जमधुव्रतस्य प्रज्ञाविरक्तिकरुणामुखसद्गुणाब्धेः ।
वेदान्तलक्ष्मणमुनेः श्रितभागधेयं पादारविन्दयुगलं शरणं प्रपद्ये ॥
श्रीकृष्णदेशिकपदाम्बुजभृङ्गराजं वेदान्तलक्ष्मणमुनीन्द्रकृपात्तबोधम् ।
त्रय्यन्तदेशिकयतीन्द्रशठारिमूर्तिं गोपालदेशिकशिखामणिमाश्रयामः ॥

**End :**

भाष्यं चेद्यवृणोत्स्वयं यतिपतिर्व्याख्यानवाचां तथा
गाम्भीर्यादनवस्थि . . . . दूरे जनस्तद्गिराम् ।
प्रष्टव्यः कथमीश्वरस्स हि न नः प्रत्यक्षरूपो दृशां
तद्भाष्यं स च भाष्यकृत्स च हरिः सम्यक् प्रसीदन्तु नः ॥

---

No. **5388.** श्रीवचनभूषणमीमांसा.

ŚRĪVACANABHŪṢAṆAMĪMĀMSĀ.

Substance, palm-leaf. Size, $17\frac{1}{4} \times 1\frac{1}{2}$ inches. Pages, 229. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, new.

Incomplete.

This is a Sanskrit commentary on the Śrīvacanabhūṣaṇa, a work on Prapatti by Piḷḷailōkācārya, son of Kṛṣṇapāda. The commentary seems to be by Varadadēśika, son and pupil of Anantadēśika.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

अशेषचिदचिद्वस्तुशेषिणे शेषशायिने ।
निर्मलानन्तकल्याणनिधये विष्णवे नमः ॥

अनन्तदेशिकगुरोस्तनयं तत्त्वविद्वरम् ।
वात्सल्यशीलजलधिं वन्दे वरददेशिकम् ॥

लोकाचार्याय गुरवे कृष्णपादस्य सूनवे ।
संसारभोगिसन्दष्टजीवजीवातवे नमः ॥

साङ्गाखिलेत्यादिवेदार्थமகுகியிலேவது ஸூத்ரகிஷமால பராமா-ணங்களாலே इदं शास्त्रं प्रपत्तिपरिच्छेदवृत्तिपरिच्छेदात्मना परिच्छेद-द्वयात्मकम् । पूर्वस्मिन् परिच्छेदे द्वयस्य पूर्ववाक्यार्थौ विचार्यते; उत्तरे तूत्तरवाक्यार्थः । अत्र वेदार्थमित्यारभ्य முற்பட்டது इत्यन्तं शास्त्र-स्यारम्भणीयत्वसमर्थनात् शास्त्रोपोद्घातः ।

**End:**

संशयस्तु पराङ्कुशादिज्ञानिनां विग्रह(हो)भोग्यो न भवति उत भवतीति । तदर्थम् अनश्नन्न्यो अभिवा(ऽभिचा)कशीति (इति)चेतनकर्मानुगुणं परिणते सर्वत्र प्राकृते ईश्वरस्य भोगं वारयति.

---

## No. 5389. श्रीवैष्णवलक्षणम्.

## ŚRĪVAIṢṆAVALAKṢAṆAM.

**Pages**, 31. Lines, 8 on a page.

Begins on fol. 22*a* of the MS. described under No. 5276.

Complete.

On the distinguishing characteristics of a Śrī-Vaiṣṇava: by Mahāmahōpādhyāya Śrī-Kṛṣṇatātācārya of Tirupputkuḷi.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

वन्दे वन्दारुसन्दोहमन्दारधरणीरुहम् ।
अमन्दानन्दसन्धानदीक्षितं रघुनन्दनम् ॥

स्मृत्वा त्रय्यन्तसूरीन्द्रचरणाम्भोरुहद्वयम् ।
श्रीकृष्णतातस्तनुते वैष्णवत्वनिरूपणम् ॥

वैष्णवशब्दो हि विष्णुशब्दात् तस्येदमित्यण्प्रत्ययेन निष्पन्नः । तदर्थश्च सम्बन्धी तत्र च सम्बन्धो न शेषत्वादिरूपः; तस्य पतिं विश्वस्येत्यादिना सर्वसाधारण्यावगमात् । नापि तज्ज्ञानवत्त्वरूपः; सुषुप्त्यादावसम्भवेन तद्दशायामिदानीं न वैष्णवः, इदानीमत्र वैष्णवत्वं नास्तीत्यादिव्यवहारप्रसङ्गात् । भगवति देवतान्तरादपकृष्टत्वभ्रान्तिमतामपि स्वस्मिन् पित्रादिशेषत्वस्यैव स्वप्रभृतिकतिपयमात्रवृत्तितया भगवच्छेषत्वस्यापि ज्ञानसम्भवेन तत्रातिप्रसङ्गाच्च । किन्तु पारम्यज्ञानप्रयोज्यधर्मवत्त्वरूपः । ज्ञाने च प्रकृत्यर्थस्य विशेष्यतासम्बन्धेनान्वयः । तथा च विष्णुविशेष्यकपारम्यप्रकारकज्ञानप्रयोज्यधर्मवत्त्वं वैष्णवत्वम्—इति सिद्धम् । इत्थञ्च सुषुप्त्यादावपि पारम्यज्ञानप्रयोज्यसंस्कारादिरूपधर्मसम्भवात् भगवति देवतान्तरादपकृष्टभ्रमवतां तदसम्भवाच्च नोक्तदोषावसरः । अत्र च सम्बन्धसामान्य एव शेषे षष्ठ्यादीनां शक्तिः; चैत्रस्य हस्त इतिवत् हस्तस्य चैत्र इत्यादिप्रयोगापत्तिस्तु अनादितात्पर्यविरहात् वारणीयेत्याचक्षते ।

**End :**

प्रपन्नलक्षणे भरन्यासस्य फलविशेषानुक्तावपि एकान्तिपरमैकान्तिनोर्मोक्षैकपरयोः प्रपन्नयोः पृथगुपादानात्प्रयोजनान्तरार्थं प्रयोजनान्तरसहितमोक्षार्थश्च न्यस्तभर एव इह प्रपन्नशब्देन विवक्षितः । तस्यापि बन्धुत्यागसम्भवात् देहौपाधिकबान्धवानित्यस्य न विरोधः । अत्र सर्वत्र एवं-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विधविशेषणानि सम्भवाभिप्रायाणि ; न तु लक्षणघटकानि । अतः क्वचित्तद्वैकल्येऽपि न पार्थक्यम् । अतः प्रत्यवायपरिहारार्थमुत्तरकृत्यानुष्ठायिमोक्षैकपरः प्रपन्न एकान्ती भगवत्प्रीत्यर्थं तदनुष्ठायी स परमैकान्तीति तयोर्भेद इति सर्वं समञ्जसम् ॥

निगमान्तार्यसूक्तीनां प्रमाणमिव मूर्तिमत् ।
आविर्भूतमहं वन्दे वात्स्यं वेदान्तदेशिकम् ॥

**Colophon:**

श्रीवैष्णवलक्षणं सम्पूर्णम् ॥

---

## No. 5390. श्रीवैष्णवलक्षणम्.

## ŚRĪVAIṢṆAVALAKṢAṆAM

Substance, palm-leaf. Size, 16⅜ × 1⅜ inches. Pages, 75. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Complete.

Same work as the above

---

## No. 5391. सकृन्नमस्कारसमर्थनम्.

## SAKṚNNAMASKĀRASAMARTHANAM.

Pages, 4. Lines, 7 on a page.

Begins on fol. 47*a* of the MS. described under No. 4849.

Incomplete.

A treatise in support of the theory that it is quite sufficient to go through the salutation of personal prostration only once at a time.

**Beginning:**

यत्तु—

प्रदक्षिणनमस्कारान् युग्मानेव तु कारयेत् ।

इति वचनमहिम्ना द्विर्नमस्कारः कार्यः, न तु सकृदिति—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदसत्—नमो विष्णवे बृहते करोमि . . . . . .
सकृन(न्न)मस्कारकर्तव्यताप्रतीतेः तद्विरोधे वचनस्य दौर्बल्यात् । अत एव भगवद्भिः महाचार्यैः देवलकादिविषयतया द्विर्नमस्कारनियमो व्याख्यातः ।

**End:**

नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वमेव . . . .
. . . नमोऽस्तु रामाय सलक्ष्मणायेति श्रीरामायणे—इति सकृन्नमस्कारप्रतीतिः—

. . . . . रानिति वचनं सर्वसाधारणं स्यात् ।
पश्चादभोग्यतां याति विष्वक्सेननिवेदनात् ।
इति वचनमपि सर्वसाधारणं स्यादिति परमते दढो.

---

No. **5392.** सच्चरित्ररक्षा.

SACCARITRARAKṢĀ.

Substance, palm-leaf. Size, 18 × 1½ inches. Pages, 87. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Viṣṇusahasranāmanirukti 45*a*.

Incomplete.

For extracts, see under number 2859.

---

No. **5393.** सच्छूद्रसत्कर्मचन्द्रिका.

SACCHŪDRASATKARMACANDRIKĀ.

Pages, 20. Lines, 6 on a page.

Begins on fol. 33*a* of the MS. described under No. 2865.

Incomplete.

On the observance of certain religious ceremonials in relation to a good Śūdra from the time of his conception to his death : by Rāmānujayōgin.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

वरदं द्विरदाद्रीशं प्रणिपत्य श्रियः पतिम् ।
कुर्वे रामानुजो योगी शूद्रसत्कर्मचन्द्रिकाम् ॥
गर्भाद(धा)नं पुंसवनं सीमन्तं जातकर्म च ।
नामकर्मान्तसंस्कारश्चूडोपनयने तथा ॥

विवाहः प्रेतसंस्कारः संस्कारा दशधा स्मृताः । इति ।
कश्यपोत्तरसंहिताप्रतिपादितानि सच्छूद्रकर्माणि दशविधानि शुभे लग्ने,

ऋतुस्नातां गुणवतीं पञ्चसंस्कारसंस्कृताम् ।
स्नातामलङ्कृतां शुद्धां स्वभार्यां बन्धुभिस्सह ॥

* * * *

वैष्णवैश्च संयुतं वेदिकातलमानीय ब्राह्मणाननुज्ञाप्य.

**End:**

विष्णुं ब्रह्माणमावाह्य पञ्चाहुतिपुरस्सरं नमो नारायणेति हुत्वा प्रायश्चित्ताहुतिं हुत्वा विष्णुं ब्रह्माणमुद्वास्य त्रिमासं दीक्षितो भूत्वा ततो दीक्षां समापयेत् ॥

**Colophon:**

इति कश्यपोत्तरसंहितोक्तप्रकारेण सच्छूद्रसत्कर्मचन्द्रिकायां षष्ठः खण्डः ॥

---

No. **5394.** सच्छूद्रसत्कर्मदर्पणः.

SACCHŪDRASATKARMADARPAṆAḤ.

Pages 23. Lines, 6 on a page.

Begins on fol. 19*a* of the MS. described under No. 2865.

The first two Khaṇḍas complete; the third incomplete.

Similar to the above.

By Rāmānujayōgin.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

रामानुजमहायोगी शूद्रवैष्णवजन्मनाम् ।
सत्कर्मदर्पणं चक्रे कश्यपोक्तप्रकारतः ॥

माता वाथ पिता वाथ यो वा को वा मुमूर्षति ।

स्वमुपाध्यायमानीय पादौ प्रक्षाळ्याचम्य, प्राणानायम्य, सुखोत्क्रमणसिद्धये उत्क्रान्तिगोदानं सङ्कल्प्य, पात्रे प्रदाय, प्राणानायम्य, कृच्छ्राणि सङ्कल्प्य, षट्चक्राणि चरेत् ।

मुमूर्षोर्दक्षिणे कर्णे . . . . . . . . ।
आयुः प्राणैस्तु संलीनः प्राणो मनसि वै भवेत् ॥

मनः श्रोत्रे श्रोत्रमात्मन्यात्मा तु परमात्मनि ।
सर्वदास्तु जगन्नाथपादपङ्कजमूलतः ॥

इति कर्णमन्त्रं जप्त्वा नारायणायेति सप्तधा(कृत्वः)सङ्कीर्त्य गते जीवे पुत्रः दक्षिणामुखः भूमौ प्रणम्योत्थाय पांसून् स्कन्धयोश्शिरस्यारोप्य नदीतटाकादौ चतुर्भिस्स्वजनैस्सह स्नात्वा धृतोर्ध्वपुण्ड्रः घटेषु जलमादाय गृहमागत्य नवपादमितां भूमिं गोमयेनोपलिप्य रङ्गवल्ल्याद्यलङ्कृत्य श्रीवैष्णवान् विप्रानाहूय,

पिता मे गतवान् लोकं वैष्णवं नित्यमव्ययम् ।
कुरुध्वं मयि वात्सल्यात् श्रीचूर्णपरिपालनम् ॥

इति सम्प्रार्थ्य ।

* * * *

गन्धाद्यैरभ्यर्च्य सकाण्डे कदलीपत्रे सोपस्कारं शिवं तण्डुलं समर्प्य समावृत्तमेकोद्दिष्टं सङ्कल्प्य एको विष्णुरिति मन्त्रेण—

एकोद्दिष्टेन चानेन प्रेतरूपी जनार्दनः ।
प्रीयतां भगवान्विष्णुः नारायण अनामयः ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति सोपस्कारं तण्डुलं विप्राय दद्यात् । ततः ताम्बूलं दक्षिणां च समर्प्य प्रेत उत्थिष्ठेत्युत्थाप्य आद्वारमनुव्रज्य स्नात्वा ब्राह्मणैः पुण्याहं वाचयित्वा तेन प्रोक्षितः दक्षिणाभिः ब्राह्मणान् परितोषयेत् ॥

**Colophon:**

इति कश्यपोक्तप्रकारेण सच्छूद्रसत्कर्मदर्पणे द्वितीयः खण्डः ॥

नारायणबलिं कृत्वा सापिण्ड्यं कुर्यात् ।

एकोद्दिष्टे कृते षोडशदिने कर्ता स्नात्वा पितुः प्रेतस्य सपिण्डीकरणं कर्तुं तदङ्गभूतान्(नि) षोडश श्राद्धान्(नि) सङ्कल्प्य आमं षोडशधा संस्थाप्य ।

प्रीयतां मे जनार्दनः ।

इति भूमौ न्यस्य सतिलजलमुत्सृजेत् । एको विष्णुरिति मन्त्रमुक्त्वा ब्राह्मणेभ्यो दद्यात् । चतुरो विप्रानाहूय आसनेषूपवेश्य प्रणम्य ।

पितुर्मे प्रेतभूतस्य भविष्यति सपिण्डनम् ।

तत्र प्रसादः कर्तव्यो भवद्भिः कृपया मयि ॥

इति प्रार्थ्य.

**End:**

ततःप्राग्देशे एकदर्भे सतिलं जलमुत्सृज्य वितस्तिमात्रमेकपिण्डं विन्यस्य मूलमन्त्रेण त्रेधा विभज्य पिण्डसंयोजनकाले दशदानं वैतरणीगोदानञ्च कृत्वा.

---

No. **5395. सज्जनवैभवः.**

SAJJANAVAIBHAVAḤ.

Pages, 44. Lines, 7 on a page.

Begins on fol. 58*a* of the MS. described under No. 5202.

Complete.

Brings out the greatness of the followers of the Vaikhānasa school of Vaiṣṇavāgama: by **Vēdāntadēśika.**

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

रामानुजदयापात्रं ज्ञानवैराग्यभूषणम् ।
श्रीमद्वेङ्कटनाथार्यं वन्दे वेदान्तदेशिकम् ॥

सर्वाधीश्वरलक्ष्मीशसपर्यानिरतात्मनाम् ।
सतां वैखानसाख्यानां सम्भवोऽत्र निरूप्यते ॥

इह खलु जगति कमलारमणचरणारविन्दद्वन्द्वपरिचर्यापरायणानां परित्यक्ताविधिशर्वाद्यर्वाचीनदेवतानां . . . . . . . . .

श्रीवैखानसानां प्रकृष्टजन्मादिप्रयुक्तमपरिमितं वैभवं श्रुतिस्मृतीतिहासपुराणादिषु बहुशो जोघुष्यते । तदेतदनभिज्ञजनप्रबोधाय सङ्क्षेपेण सन्दृश्य(न्दर्श्य)ते । तत्र श्रुतिस्तावत् तैत्तिरीयके समाम्नायते—

आपो वा इदमासन् सलिलमेव । . . . . . . . .
ये नखाः । ते वैखानसाः । ये वालाः । ते वालखिल्याः । इत्यादि ।

**End :**

तस्मात्पापभीरुभिर्वैखानसास्समाद्रियन्ते ॥

श्रुतिस्मृतिपुराणोक्तसमीचीनार्थगोचरम् ।
सम्यग्ज्ञानं सतां भूयान्न भूयादितरत्र तु ॥

श्रीमद्वेङ्कटनाथेन श्रेयसे भूयसे सताम् ।
वेदाच(न्त)ार्येण विवृतस्सोऽयं सज्जनवैभवः ॥

**Colophon :**

इति कवितार्किकसिंहस्य . . . . . . कृतिषु सज्जनवैभवस्समाप्तः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5396. सत्कर्मचन्द्रिका.

## SATKARMACANDRIKĀ.

Substance, palm-leaf. Size, $12\frac{5}{8} \times 1\frac{1}{8}$ inches. Pages, 76. Lines, 5 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Sannyāsaviṣayavacanāni 37*a*.

Breaks off in Sannyāsavidhi.

It contains the following Prakaraṇas—Śravaṇadvādaśījayantyādinirūpaṇa, Śuddhaprapannapūrvakṛtyanirūpaṇa, Śuddhaprapanna-uttarakṛtyanirūpaṇa.

A treatise about how a Śrī-Vaiṣṇava Prapanna is to conduct all his religious rites : by Rāmayōgīndra.

**Beginning:**

श्रीवामनजयन्त्यादिष्वहोरात्रमुपोषणम् ।
सम्मिश्रवैष्णवैः कार्यं परेद्युः पारणं ध्रुवम् ॥
विशुद्धवैष्णवश्रेष्ठैश्शुद्धपक्षरतात्मभिः ।
श्रीवामनजयन्त्यादिषूत्सवान्ते च पारणम् ॥
काम्यार्थिनां समस्तासु द्वादशीष्वप्युपोषणम् ।
परेद्युः पारणं तद्वत् श्रवणद्वादशीदिने ॥
उपोषणं परेद्युश्च पारणं परिकीर्तितम् ।

* * * *

तस्मात्प्रपन्नैः श्रीवैष्णवैः निषेकादिश्मशानान्तकृत्येषु अगतिकस्थले सूत्रोक्तमन्त्रैरेव भगवान् श्रीमन्नारायणस्समाराध्यः । सगतिकस्थले तु भगवन्मन्त्रैरेव श्रीमान्नारायणस्समाराध्य इति सिद्धान्तः ॥

**Colophon:**

इति श्रीरामयोगीन्द्रकृता सत्कर्मचन्द्रिका ।
सतां शुद्धप्रपन्नानां द्विजातीनां प्रतुष्टये ॥
इति सत्कर्मचन्द्रिकायां पूर्वभागस्समाप्तः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

यज्ञोपवीती वस्त्रयज्ञोपवीती सन् गोशृङ्गमात्रेण देवतीर्थेन सन्तर्प्य ओं किरीटाय मकुटाधिपतये नम इत्यादि पारिषदान्तं सन्तर्प्याचामेत् ॥

एवमेव प्रपन्नानां शुद्धानां च महात्मनाम् ।
संस्काराद्यखिलं कर्म शास्त्रैस्सम्यङ्निरूपितम् ॥

**Colophon:**

इति सत्कर्मचन्द्रिकायामुत्तरभागः ॥

---

No. **5397.** **सत्कर्मचन्द्रिका.**

SATKARMACANDRIKĀ.

Substance, palm-leaf. Size, $23\frac{5}{8} \times \frac{7}{8}$ inches. Pages, 36. Lines, 4 on a page. Character, Grantha. Condition, good Appearance, new.

Incomplete.

Similar to the above.

By Rāmānujayōgin.

**Beginning:**

श्रीरामानुजसिद्धान्तनिर्धारणकुतूहली ।
श्रीरामानुजयोगीन्द्रश्चक्रे सत्कर्मचन्द्रिकाम् ॥
निषेकादिश्मशानान्ता नित्यनैमित्तिकक्रियाः ।
प्रकारभेदाद्वक्ष्यन्ते प्रमाणैश्च यथाविधि ॥
आर्षप्रमाणैस्सा शुभ्रा देशिकेन्द्रादिसूक्तिभिः ।
मणिप्रवाळैर्ग्रथिता मालेव सुमनोहरा ॥
देवतान्तरसम्बन्धगन्धलेशपराङ्मुखैः ।
प्रपन्नैस्सर्वदा सेव्या भगवद्ध्यानतत्परैः ॥
सर्वं दैविकधर्मेण कर्म कुर्यात्प्रपन्नकः ।
देवर्षिपितृधर्मेण कर्म कुर्यात्तदन्यकः ॥
सर्वकर्मसु लक्ष्मीशं ध्यात्वा सङ्कल्पपूर्वकम् ।
सात्त्विकत्यागपूर्वन्तु मूलमन्त्रसमन्वितैः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सूत्रोक्तमन्त्रैर्लक्ष्मीशमनन्यगतिकस्थले ।
आराधयेत्प्रपन्नश्चेन्नित्यनैमित्तिकादिषु ॥
अथान्यगतिके श्रीशं शुद्धमन्त्रैस्समर्चयेत् ।
तथापि ध्यानसङ्कल्पसात्त्विकत्यागपूर्वकम् ॥
शुद्धदैविकधर्मेण पश्चिमोत्तरदिङ्मुखः ।
प्रपन्नः परमैकान्ती श्रीशमाराधयेत्सदा ॥

**End:**

अमन्त्रकं प्रकुर्वीत शूद्रस्सर्वमशेषतः ।
दग्ध्वा शरीरं विधिवत् वैष्णवस्य महात्मनः ॥
यन्मरणं तदवभृथमिति मत्वा विचक्षणः ।
स्नानार्थं पुण्यसलिलं व्रजेद्भागवतैस्सह ॥
अनुलिप्य घृतं सर्वो गोमयं वा तिलैस्सह ।
दूर्वाग्रैरक्षतैर्लाजैः स्नानं कुर्वीत मङ्गळम् ॥

**Colophon:**

इति सत्कर्मचन्द्रिकायां प्रपन्नवैष्णवब्रह्ममेधविधिनिरूपणम् ॥
अथाप्रपन्नानामुत्तरकृत्यं निरूप्यते—

अप्रपन्नानां गृहस्थादीनां पितृमेधसंस्कारादि सापिण्ड्यञ्च प्रेतकृत्यस्य प्राचुर्यात् स्पष्टमेव ।

अत्र न विवादः । यतीनां पितृमेधसंस्कारादिसापिण्ड्यान्तप्रेतकृत्यस्यापूर्वत्वात्तन्निरूप्यते । यतिधर्मसमुच्चये बोधायनः—

कर्मनिष्ठे तु सन्न्यस्ते पितर्युपरते सुतैः ।
दहनं तस्य कर्तव्यं श्राद्धपिण्डोदकक्रियाः ॥
ब्रह्मचारी यतिश्चेत्स्याच्छ्राद्धं नारायणार्पणम् ।
बलिमेकादशेऽन्येषां दर्शे कुर्यात् सपिण्डताम् ॥ इति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्र ब्रह्मचारी सन्न्यासी चेत् पितृमेधादि षोडशान्तं कृत्वा नारायणबलिं कुर्यात्; तदितरसन्न्यासी.

---

## No. 5398. सन्न्यासविषयवचनानि.
## SANNYĀSAVIṢAYAVACANĀNI.

Pages, 11. Lines, 5 on a page.

Begins on fol. 37*a* of the MS. described under No. 5396.

Incomplete.

On the distinguishing characteristics of the fourfold division of Hindu ascetics: according to the views of Śrī-Vaiṣṇava and other teachers.

**Beginning:**

सन्न्यासी चतुर्विधः—कुटीचकः, बहूदकः, हंसः, परमहंसश्चेति । तत्र कुटीचकलक्षणमाह—शतदूषण्यां यतिसमर्थने निगमान्तदेशिकः । वृद्धपराशरः—

कुटीचकानां पुत्रादिभिः कुटीं कारयित्वा . . . . . . त्रिदण्ट-ल(कमण्डलु)पवित्रकाषायवस्त्रधारिणः ।

**End:**

सन्न्यासिनोऽपि दाहमाचरेत् । तथैव बोधायनः—अथ सन्न्यासिनां दहन . . . . . कण्ठगतप्राणे सन्न्यासे कृते तस्य समीपेऽग्निं प्रज्वाल्य यतेर्दक्षिणहस्तात् उपावरोहेत्यग्निमुपावरोह्य (औपासनाग्निना) पितृमेधविधानेन ब्रह्ममेधविधानेन वा सावित्र्या प्रणवेन (वा) दहेदिति यतेरौपासनाग्निना संस्कारः प्रतिपादितः.

---

## No. 5399. सम्प्रदायचन्द्रिका.
## SAMPRADĀYACANDRIKĀ.

Substance, paper. Size, $8\frac{3}{4} \times 5\frac{1}{2}$ inches. Pages, 175. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete in 7 Prakāśas.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



A treatise regarding the nature of the highest bliss which is conferred on a Prapanna in the state of salvation

This manuscript is said to have been transcribed on the thirteenth day of Vaiśākha-śukla in the year Jaya (1894).

**Beginning:**

श्रीमान् कृष्णः प्रपन्नानां फलदश्शरणं फलम् ।
प्राचामाचार्यवर्याणामिति सिद्धान्तपद्धतिः ॥

ननु शरणपदेनोपायत्वमुच्यते । उपायत्वञ्च भगवतः फलप्रदत्वमेव, अतः फलद इति पदं निरर्थकमिति चेन्न—शरणवरणाधिकारिणं प्रति भगवतः फलप्रदत्वव्यतिरेकेणोपायभावस्य दुर्निरूपत्वात् ।

**End:**

अन्यथा बहुप्रमाणविरोधादित्यलमतिचर्चया । तस्मात्सर्वदुःखनिवृत्तिपूर्वकभगवदनुभवजनितप्रीतिकारितकैङ्कर्यप्राप्तिरेव उत्कृष्टं फलमिति सिद्धम् ॥

**Colophon:**

इति सम्प्रदायचन्द्रिकायां सप्तमप्रकाशः ॥

---

## No. 5400. सम्प्रोक्षणविधिः.

SAMPROKṢAṆAVIDHIḤ.

**Pages**, 12. **Lines**, 5 on a page.

Begins on fol. 68*a* of the MS. described under No. 5236.

Incomplete.

On the performance of the Samprōkṣṇa, which is a purificatory religious ceremony to be conducted if the images of Viṣṇu happen to be touched by those who should not touch them.

**Beginning:**

पराशरसंहितायाम्—

क्षत्रियादिस्पर्शने च विप्रार्चितहरेस्सदा ।
संप्रोक्षणं ततः कृत्वा पश्चाद्विप्रस्तु पूजयेत् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संप्रोक्षणविधानस्य न कालनियमस्ततः ।
निमित्ते समनुप्राप्ते सद्यः कृत्वा समर्चयेत् ॥

**End:**

शङ्खचक्रगदापद्मधारिणं वनमालिनम् ।
श्यामलं शान्त(वपुषं)प्रसन्नमुखपङ्कजम् ॥
दिव्यचन्दनलिप्ताङ्गं चारुहासं शुभेक्षणम् ।
हारकेयूरमकुटकुण्डलैरुपशोभितम् ॥

---

No. **5401.** सर्वसङ्ग्रहः.

SARVASANGRAHAḤ.

Substance, paper. Size, $13\frac{1}{4} \times 8\frac{1}{4}$ inches. Pages, 567. Lines, 18 on a page. Character, Grantha. Condition, good. Appearance, new.

Contains the Adhyāyas 1 to 21.

Complete.

A treatise in support of the theory that the worship of deities in temples should be conducted in accordance with rules laid down in the Pāñcarātrāgama.

**Beginning:**

श्रीमहीभ्यां समेताय केशवाय नमो नमः ।
मायाविनाशिने तुभ्यं संसारार्णवसेतवे ॥
भगवच्छास्त्रतत्त्वज्ञमौपगायनवंशजम् ।
वरदार्यगुरोः पुत्रं रङ्गराजमहं भजे ॥

पाद्मोपयुक्तानि वचनानि विलिख्यन्ते—

कपिञ्जले—

सर्वेषां पञ्चरात्राणां वक्ता नारायणस्स्वयम् ।
तन्मूर्तिभेदाच्छो(श्श्रो)तार ऋषयश्च पितामह ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत एव प्रमाणानि पञ्चरात्राणि काश्यप ।
श्रुतिमूलानि तान्येव विष्णोः प्रीतिकराणि च ॥
अष्टोत्तरशतानाञ्च तन्त्राणां मुनिसत्तम ।

* * *

**Colophon:**

क्रियापादोपयुक्तवचनं नाम प्रथमः ॥

**End:**

षडासनेषु निपुणं षडक्षरपरायणम् ।
इत्थं ध्यात्वार्चकस्सम्यगर्चयेद्धरिसन्निधौ ॥
एवं भगवतश्शिष्यानाचार्यानर्च्य नित्यशः ।
हरेराराधनार्यौ(र्थो)यः पूजयत्यनिशं नरः ॥
गुरूपद्य(रुपादा)र्चनविधिं यः पठेद्विष्णुसन्निधौ ।
सर्वार्थसिद्धिं लभते विष्णुलोके महीयते ॥

**Colophon:**

इति एकविंशोऽध्यायः ॥

---

No. **5402.** सुदर्शनपाञ्चजन्यप्रतिष्ठाविधिः.

SUDARŚANAPĀÑCAJANYAPRATIṢṬHĀVIDHIḤ.

Pages, 3. Lines, 9 on a page.

Begins on fol. 30*a* of the MS. described under No. 5364.

Complete.

On the mode of sanctifying the metallic medals resembling Viṣṇu's conch and discus before they may be used in the Samāśrayaṇa ceremony.

**Beginning:**

पुण्यतिथिवारनक्षत्रयुक्ते दिने परावरतत्त्ववित्सदाचार्यः धात्रीकल्केन लिप्ताङ्गः पुण्यतीर्थे स्नात्वा पू(पौ)र्वाह्निकनित्यकर्म कृत्वा पूर्वेद्युस्ताम्बूलदक्षिणादिभिस्सत्कृतैर्वैष्णवैराशिषो वाचयित्वा तैरनुज्ञातः स्वगृह्योक्तविधिना पुण्याहं वाचयित्वा सुदर्शनपाञ्चजन्यौ प्रतिष्ठापयामीति सङ्कल्प्य प्रतिष्ठाङ्गमङ्कुरार्पणं कुर्यात् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End :**

दक्षिणभुजे सुदर्शनं वामभुजे पाञ्चजन्यञ्च तत्तन्मन्त्रेण धारयित्वा अग्निं देवञ्च शिष्येण सह प्रदक्षिणीकृत्य दिव्यायुधसान्निध्यं प्रार्थयेत् । ततो विधिवदूर्ध्वपुण्ड्राणि धारयित्वा तानि नत्वा दास्यनाम दत्वा मूलमन्त्रादीन् साङ्गान् यथावदुपदिश्य इज्यामन्त्रानुपदिश्य वृत्तिमुपदिशेत् । अनन्तरं तन्त्रशेषं समाप्य ब्रह्मोद्वासनं कृत्वा उपस्थाय पुण्याहं कृत्वा वैष्णवान् भोजयेत् ॥

## No. **5403.** सुदर्शनपाञ्चजन्यादिप्रतिष्ठा.

### SUDARŚANAPĀÑCAJANYĀDIPRATIṢṬHĀ.

Pages, 12. Lines, 6 on a page.

Begins on fol. 40*a* of the MS. described under No. 5239.

Complete.

Same work as the above.

See under the previous number for the beginning.

**End :**

कूर्चदलेन प्रभायां मूलमन्त्रेणावाह्य, प्रोक्ष्य, अब्लिङ्गैः पावमानीभिः कुम्भजलेनैवाभिषिच्य, प्रभा . . . . . त्वा प्रणम्य गन्धपुष्पादिभिरभ्यर्च्य, शुभे मुहूर्ते देवेन योजयेत् । यथाशक्ति आचार्याय दक्षिणां दद्यात् ब्राह्मणा(न्) . . . तथा ॥

सुदर्शनपाञ्चजन्यभक्तघण्टापद्माक्षमालानाम्.

## No. **5404.** सुदर्शनपाञ्चजन्यादिप्रतिष्ठा.

### SUDARŚANAPĀÑCAJANYĀDIPRATIṢṬHĀ.

Pages, 12. Lines, 11 on a page.

Begins on fol. 141*a* of the MS. described under No. 1873.

Complete.

Similar to the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

पुण्यातिथिवारयुक्तदिवसे पुण्ये नक्षत्रे आचार्यः प्रातर्नित्यकर्म समाप्य, ताम्बूलदक्षिणां गृहीत्वा नमस्सदसे . भ्यो नमः । इत्यक्षतैर्वैष्णवानभ्यर्च्य, प्रणम्य, अशेषे हे परिषत्! सुदर्शनपाञ्चजन(न्य)प्रतिष्ठां कर्तुं योग्यता-सिद्धिमनुगृहाणेत्यनुज्ञाप्य, दर्भेष्वासीनो दर्भान्धारयमाणः, प्राणानायम्य संकल्प्य, विष्वक्सेनाराधनं कृत्वा पुनः प्राणानायम्य, सुदर्शनपाञ्च-जन्यौ प्रतिष्ठापयामीति संकल्प्य, पुण्याहं वाचयित्वा, प्रतिष्ठाकर्माङ्ग-मङ्कुरार्पणकर्म करिष्ये ।

**End:**

श्रीमन्नारायण स्वामिन् गृहाण प्रियया सह ।
धरण्या च हृषीकेश चूर्णं दिव्यं मया कृतम ॥
श्रीवत्सं कौस्तुभं देवं धारितं सततं विभो ।
तद्वच्चूर्णं मया दत्तं गृहाण पुरुषोत्तम ॥

इति भगवन्तं प्रार्थ्य, आचार्यं संपूज्य वैष्णवान् भोजयेत् । देवगात्रे श्रीचूर्णं तद्दिनं स्थापयेत् । प्रभाते भगवन्तं संपूज्य पात्रा-न्तरे चूर्णं गृहीत्वा आचार्यमुख्येभ्यः किंचित्किंचित्प्रदापयेत् ॥

**Colophon:**

इति श्रीचूर्णप्रतिष्ठानुक्रमणिका ॥

---

## No. 5405. सुदर्शनहोमः.
## SUDARŚANAHŌMAḤ.

Pages, 8. Lines, 11 on a page.

Begins on fol. 148*a* of the MS. described under No. 1873.

Complete.

Enjoins the offering of a certain propitiatory offering to the sacred fire prior to the ceremony of Samāśrayaṇa, that is, of initiation as a Śrī-Vaiṣṇava.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

अ . . . . . . वक्ष्यामि

प्रातस्स्नात्वा शुभदिने शिष्येण सह देशिकः ।
नित्यकर्म समाप्याथ गृहमागत्य तुष्टधीः ॥
चतुरश्रं समालिप्य गोमयेन सविस्तरम् ।
रङ्गवल्ल्याद्यलङ्कृत्य दर्भान् समिध एव च ॥
दर्वीमाज्यञ्च पात्राणि पञ्चगव्यानि तण्डुलान् ।
नालिकेरद्वयञ्चैव सताम्बूलं सदक्षिणम् ॥
सू(त्रं)हरिद्राचूर्णञ्च चन्दनं पुष्पमेव च ।
गुलं फलञ्च तीर्थञ्च सम्भारानेवमादिकान् ॥
संभृत्य पाणी पादौ च प्रक्षाल्याचम्य वाग्यतः ।
श्रीवैष्णवेभ्यस्संप्राप्यानुज्ञां याच्ञापुरस्सरम् ॥
अक्षतैस्सम्यगभ्यर्च्य दत्वा ताम्बूलदक्षिणाम् ।
आसने सम्यगासीनः पवित्रं धारयेत्करे ।
प्राणानायम्य विधिना गोत्रशर्मपुरस्सरम् ॥

* *

संकल्प्य संस्करिष्यामीत्येवं प्रतिसरं ततः ।
तदङ्गत्वेन सङ्कल्प्य मूलमन्त्रेण देशिकः ॥

**End :**

ततो भगवदाराधनक्रमञ्चोपदिशेत् । आचार्यः शिष्यस्य हितोपदेशं कुर्यात् । अग्न्युप . . . यात् । ततः श्रीवैष्णवेभ्यो गन्धताम्बूलदक्षिणादानपूर्वकमाशिषो वाचयेत् । श्रीमात्पञ्चसंस्कारे . . . . . . . क्तविधानेनाग्निं प्रतिष्ठाप्य न ब्रह्मा न परिधिः नेध्मप्रक्षेपश्च कार्यः ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अग्नये चैव सोमाय पुनराप्या . . . . ।
हुत्वा व्याहृतिभिश्चैव वैष्णवीकरणान्ततः ॥
वह्नेर्जातादिसिद्ध्यर्थं विष्णुगायत्र्या हुनेत् ।
ततस्सकृन्मूलमन्त्रश्रीभूनीलाख्य . . तम् ॥
हुत्वा पञ्चायुधैर्मन्त्रैः तापादींश्च समाचरेत् ।
पूर्ववत्सर्वमन्यत् च तन्त्रशेषं समाचरेत् ॥

**Colophon:**

इति पाराशरसंहितोक्तरीत्या . . . . . . त् ॥

---

No. **5406.** सुदर्शनहोमप्रयोगः.

SUDARŚANAHŌMAPRAYŌGAḤ.

Pages, 35. Lines, 8 on a page.

Begins on fol. 1*b* of the MS. described under No. 5295.

Complete.

On how to offer the offering to the sacred fire in connection with the ceremony of Samāśrayaṇa or initiation as Śrī-Vaiṣṇava.

**Beginning:**

अथाचार्यश्शुभदिने प्रातश्शिष्यैस्सह स्नात्वा नित्यकर्म समाप्य भगवन्तं प्रणम्य दर्भेष्वासीनो दर्भान्धारयमाणः पवित्रपाणिः प्राणानायम्य . . . . . . . . . . . . . . . .
आज्ञानुज्ञाकैङ्कर्ययोग्यतासिद्ध्यर्थं तापादिपञ्चसंस्कारैस्संस्करिष्यामि . . . . . . . . . . शिष्यशुद्ध्यर्थं पञ्चगव्यद्रव्यशुद्ध्यर्थं शुद्धिपुण्याहवाचनं करिष्य इति सङ्कल्प्य, तण्डुले कूर्चनालिकेरादिसहितमुदकुम्भं निधाय.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

स्त्रीमात्रपञ्चसंस्कारे स्वगृह्योक्तविधिनाग्निं प्रतिष्ठाप्य न ब्रह्मा न परिधिः नेध्मप्रक्षेपणम्; अग्नये सोमाय, अग्नये व्याहृतिभिश्च हुत्वा वैष्णवीकरणान्ते वह्नेर्जातकर्मादिसिद्ध्यर्थं मूलमन्त्रेण विष्णुगायत्र्या सकृत् मूलश्रीभूमिनीलामन्त्रैश्च सकृत् पञ्चायुधमन्त्रैश्च सकृद्धुत्वा तापादीन् समाचरेत् । अन्यत्सर्वं पुरुषवत्तन्त्रशेषं समापयेत् ॥

---

## No. 5407. सुदर्शनहोमप्रयोगः.
## SUDARŚANAHŌMAPRAYŌGAḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 13*b* of the MS. described under No. 5239.

Complete.

Same work as the above.

---

## No. 5408. सुदर्शनहोमप्रयोगः.
## SUDARŚANAHŌMAPRAYŌGAḤ.

Pages, 12. Lines, 6 on a page.

Begins on fol. 13*a* of the MS. described under No. 896.

Complete.

Similar to the above.

**Beginning:**

गोत्रं यज्ञशर्माणं कुमारं सुदर्शनपाञ्चजन्यधारणोर्ध्वपुण्ड्रधारणनामकरणमन्त्रोपदेशयागकरणैः संस्करिष्यामीति सङ्कल्प्य तदङ्गं प्रतिसरबन्धकर्म करिष्य इति संकल्प्य स्नातं शिष्यं मूलमन्त्रेण संप्रोक्ष्य तण्डुलभाण्डे ताम्बूलहरिद्राचूर्णरक्षाद्रव्यसहिते चतुर्गुणं सूत्रं विन्यस्य ।

**End:**

चतुर्दश्यष्टमीपर्वभौमवाराश्च वर्जिताः ।
चरस्थिरोभया श्रेष्ठा निन्द्या मध्याः क्रमात्स्मृताः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दीक्षाकाले गृहास्सर्वे रन्ध्रस्थाने विनाशदाः ।
जन्मत्रयं सुक्रमश्च(कर्मश्च) सौम्यवारश्च शोभनाः ॥
मन्त्रारम्भे सदा वर्ज्यं पितृमासचतुष्टयम् ।
अतोऽन्ये . . . शुभा मासि केचित्प्रचक्षते ॥

---

## No. 5409. स्त्रीशूद्रपञ्चसंस्कारविधिः.

## STRĪŚŪDRAPAÑCASAṀSKĀRAVIDHIḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 55*a* of the MS. described under No. 5239.

Complete.

Gives the rules for the performance of the five Śrī-Vaiṣṇava Saṁskāras in relation to Śūdras and women.

**Beginning:**

(स्त्रीशूद्रपञ्च)संस्कारविधिं वक्ष्ये द्विजोत्तम ।
स्त्रीशूद्राणां तथान्येषां पञ्चरात्रविधानतः ॥
श्रवणर्क्षे तु रोहिण्यां द्वादश्यां वा शुभे दिने ।
नद्यां स्नात्वा यथान्यायं पादौ प्रक्षाल्य वाग्यतः ॥
आचम्य प्रयतो भूत्वा प्राणायामं समाचरेत् ।

* * * *

तिथिवारादिकान् स्मृत्वा सुसङ्कल्प्य यथाविधि ।
पञ्चसंस्कारविधिना संस्करिष्ये यथाविधि ॥

**End:**

एवं यः कुरुते विद्वान् पञ्चसंस्कारकर्म च ॥
सशिष्यस्सर्वपापानि तीर्त्वा याति हरेः पदम् ।
इति प्रोक्तं मया विप्र पराशर महामते ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इति शौनकसंहितायां शौनकपराशरसंवादे स्त्रीशूद्रपञ्चसंस्कारकस(थ)ने पञ्चत्रिंशोऽध्यायः ॥

---

No. **5410.** हरिमाहात्म्यदर्पणः.

HARIMĀHĀTMYADARPAṆAḤ.

Substance, palm-leaf. Size, 18⅛ × 1⅛ inches. Pages, 591. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete.

A work on the greatness of Viṣṇu: by Basavabhūpāla.

**Beginning:**

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
यस्य द्विरदवक्त्राद्याः . . विष्वक्सेनन्तमाश्रये ॥
स्मृते सकलकल्याणभाजनं यत्र जायते ।
पुरुषन्तमजं नित्यं व्रजामि शरणं हरिम् ॥
भद्रं पक्ष्मळयन्तु ता रघुपतेरङ्गप्रभास्फूर्तयो
घर्मोदञ्चितनीलनीरदततिश्रीगर्वसर्वंकषाः ।
या देव्या वदनाम्बुजे मधुकरस्तोमन्ति फालस्थले
कस्तूरीतिलकन्ति नीलनळिनोत्तंसन्ति कर्णद्वये ॥
अस्ति श्रीरङ्गभूपालतनयो विनयोज्वलः ।
बसवक्षितिपालाख्यः सद्धर्मनिरतः शुचिः ॥
बिभाति भुवनोद्याने फुल्ला यत्कीर्तिमञ्जरी ।
दिग्वधूश्रवणोत्तंसलक्ष्मीमादधती सदा ॥
श्रीरङ्गं नयनं त्रिभागसरणिर्यस्याननं पुष्करं
यत्कान्तिर्मधुरा यदीयवचनं सत्यव्रतं भासते ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यच्चित्ताब्जमभूदनन्तशयनं यश्चाविमुक्तः श्रिया
सोऽयं श्रीबसवक्षितीश्वरमणिर्जागर्ति विद्वन्मुदे ॥

तेन श्रीरामपादाब्जभक्तिनिर्मलचेतसा ।
सदा विबुधसेवात्तगूढशास्त्रार्थबुद्धिना ॥

इतिहासपुराणेषु समस्तमुनिसम्मताः ।
वाचः सङ्गृह्य लिख्यन्ते सारा हरिकथाश्रयाः ॥

अस्मिन्नच्छतमे नित्यं हरिमाहात्म्यदर्पणे ।
आत्मस्वभावमखिलं सदा पश्यन्तु सूरयः ॥

यद्यपि श्रुतयस्सन्ति हरिमाहात्म्यबोधने ।
शक्तास्तथापि सर्वासां तासां द्रष्टुमशक्तितः ॥

असर्वाधिकृतत्वेन दुर्विज्ञानस्वभावतः ।
इतिहासपुराणादिसापेक्षत्वाच्च निर्णये ॥

इतिहासपुराणेषु विशेषेणादरो मम ।
तत्र रामायणे तावत् ये श्लोका विष्णुतत्पराः ॥

प्रथमं तत्र लिख्यन्ते ततो भारतसंश्रयाः ।
ततश्च वैष्णवाद्येषु पुराणेष्वखिलेष्वपि ॥

ततः पञ्चदशे सर्गे बालकाण्डे विलिख्यते ।
ततः प्राक्रामदिष्टिं तां पुत्रीयां पुत्रकारणात् ॥

जुहावाग्नौ च तेजस्वी मन्त्रदृष्टेन कर्मणा ।
ततो देवास्सगन्धर्वाः सिद्धाश्च परमर्षयः ॥

भागप्रतिग्रहार्थं वै समवेता यथाविधि ।
तास्समेत्य यथान्यायं तस्मिन् सदसि देवताः ॥

अब्रुवन् लोककर्तारं ब्रह्माणं वचनं महत् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

संसारचक्रे परिवर्तमानः समस्तदुःखामयभीतिमार्गे ।
उपास्य भक्त्या हरिमीशितारं ययौ स मुक्तिं भगवत्प्रसादात् ॥

भृगुः—

इत्थं सर्वपुराणानां सारभूतो जगत्पतिः ।
अचिन्त्यमहिमा ब्रह्मन् सर्वेषां वाञ्छितप्रदः ॥

तस्मात्सर्वेश्वरस्सेव्यो विष्णुरेव जगत्पतिः ।
सत्यं सत्यं ब्रवीम्येतत् रहस्यमवधारय ॥

**Colophon:**

इति श्रीबसवभूपालसङ्गृहीते हरिमाहात्म्यदर्पणे इतिहासोत्तमस्थसर्वशास्त्रसारनिर्णयो नाम अष्टोत्तरशततमोऽध्यायः ॥

नित्यं यस्य महीसुरोपकृतये चित्तं विशुद्धं सदा
नानाधर्मविचारसाधनकलादत्तादरं वर्तते ।
प्रज्ञा यस्य च जानकीपरिबृढश्रीमत्पदाम्भोरुह-
प्रीत्युत्कर्षमहार्णवौघपतिता त्वापन्नरक्षाकृते ॥

क्षीराब्धेर्नववीचिका शिवगिरेरुत्तुङ्गशृङ्गावली
फेनाळिर्निरपायिनी द्युसरितश्शम्भोर्विभूतिश्शुभा ।
शेषस्याङ्गततिश्शिरस्समुचिता दिग्दन्तिपालामर-
श्रेणी यस्य विजृम्भितेति वितता कीर्तिर्जगद्भूषणम् ॥

दृष्ट्वा यस्य करं निरन्तरलसद्दानाम्बुधाराप्लुतं
विद्वांसो नृपकुञ्जरत्वमुचितं मत्वा मुदं लेभिरे ।
श्रुत्वा यस्य च भूमिदानमतुलं व्रीडाभरार्तो भृशं
लीनः क्वापि बलिर्विरोचनसुतो नाद्यापि संलक्ष्यते ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भीष्मोऽरातिषु पुण्डरीकरुचिभिर्द(भृद्गृ)ष्टौ यशस्यर्जुनः
प्रह्लादो बुधमानसेषु मुरभिद्भक्तिप्रकर्षे ध्रुवः ।
अक्रूरस्सकलेषु जन्तुषु वचोमाधुर्यलक्ष्म्यां शुको
व्यासो वक्षसि भासते भुजयुगे रुक्माङ्गदो यस्सदा ॥
तेन श्रीधरपादाब्जभक्तिदुग्धाम्बुराशिना ।
बसवक्षितिपालेन जङ्गमक्ष्मापसूनुना ॥
निर्मितो निर्मलो नित्यं हरिमाहात्म्यदर्पणः ।
अस्तु श्रीरङ्गराजाय तत्त्वरूपप्रकाशकः ॥

८१ ब्रह्मरुद्रोत्पत्तिः.
१९६ विष्णुना रुद्रादीनां पूज्यत्वम्. विष्णौ सर्वदेवोत्पत्तिः.
२०१ मोहशास्त्रोत्पत्तिप्रकरणम्.
२०३ स्वाराधनप्रार्थितस्थानम्.
२०४ वैकुण्ठवर्णनम्.
२०५ दिव्यलोकवर्णनम्.
२०७ व्यूहभेदवर्णनम्.
२३८ हरिशङ्करादिपरताविवादः.
२४१ भक्तिप्रपत्ती.
२४४ अर्थं विनापि मन्त्रस्य प्रभावः.

---

No. **5411.** हरिदिनतिलकव्याख्या.
HARIDINATILAKAVYĀKHYĀ.

Substance, palm-leaf. Size, 15⅝ × 1⅜ inches. Pages, 49. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

A commentary on Vēdānta-dēśika's Haridinatilaka, which deals with the Ēkādaśī fast.

For extract, see under No. 3153.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## (b) DVAITA VAIṢṆAVISM.

### No. 5412. तन्त्रसारः.

### TANTRASĀRAḤ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 13b of the MS. described under No. 2770.

Incomplete.

On the conduct of the daily worship of Viṣṇu as carried out by the followers of the Dvaita-Vēdānta.

**Beginning:**

पूज्यश्च भगवान्नित्यं चक्राब्जादिकमण्डले ।
अचले हृदये वापि जले वा केवलस्थले ॥
अष्टाक्षरेण संपूज्य प्रथमां देवतां पराम् ।
मध्ये सर्वगुरूंश्चैव दक्षिणे सर्वदेवताः ॥
पुनस्सव्ये सर्वगुरून् आग्नेयादिषु च क्रमात् ।
गरुडं वासुदेवञ्च दुर्गाञ्चैव सरस्वतीम् ॥

**End:**

श्रीहरिस्सर्वदेवानां परमः पूर्णशक्तिमान् ।
स्वतन्त्रोऽन्ये तद्वशा हि सर्वे तस्य जगद्गुरोः ॥
ब्रह्मादयश्च तद्भक्त्या भागिनो भोगमोक्षयोः ।
तस्माद्ध्येयश्च पूज्यश्च वन्द्यो ध्ये(ज्ञे)यस्सदा हरिः ॥

**Colophon:**

इति श्रीतन्त्रसारप्रथमोऽध्यायः ॥

### No. 5413. तन्त्रसारसङ्ग्रहः.

### TANTRASĀRASAṄGRAHAḤ.

Pages, 10. Lines, 5 on a page.

Begins on fol. 17a of the MS. described under No. 2770.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



The first Adhyāya only complete.

Wants beginning.

Same work as the above.

---

No. **5414.** मध्वाचार्यगुरुपरम्परा.

MADHVĀCĀRYAGURUPARAṀPARĀ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 37*a* of the MS. described under No. 2785.

Incomplete.

Contains a brief account of the life of Madhvācārya, and gives the line of Gurus of the Dvaita-school of Vēdānta.

**Beginning:**

श्रीमध्वः कल्पवृक्षश्च जयाचार्यास्तु धेनवः ।
चिन्तामणिस्तु व्यासार्यो मुनित्रयमुदाहृतम् ॥
अभ्रमं भङ्गरहितमजडं विमलं सदा ।
आनन्दतीर्थमतुलं भजे तापत्रयापहम् ॥
मिथ्यासिद्धान्तदुर्ध्वान्तविध्वंसनविचक्षणः ।
जयतीर्थाख्यतरणिर्भासतां मे हृदम्बरे ॥

**End:**

देवैर्विज्ञापितो विष्णुर्वायुर्मे ज्ञापयिष्यति ।
उद्धरस्व महाबाहो मम धर्मान् सनातनान् ॥
इत्याहूतो भगवता कलौ वायुर्भविष्यति ।
मध्वनामा यतिरसौ सच्छास्त्राणि करिष्यति ॥
निरसिष्यति पाषण्डान् दुश्शास्त्राणि महामतिः ।
स्थापयिष्यति सन्मार्गान् सच्छास्त्रं व्याकरिष्यति ॥
श्रोष्यन्ति मुनयस्सर्वे शुकाद्या देवरूपिणः ।

**Colophon:**

इति कूर्मपुराणस्थश्रीमुष्णमाहात्म्ये भगवद्वचनम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## RELIGION : ŚAIVAISM.

---

### No. 5415. अक्षरवर्णदेवतानिर्णयः—कर्णाटकटीकासहितः.

### AKṢARAVARṆADĒVATĀNIRṆAYAḤ WITH KANARESE COMMENTARY.

Substance, palm-leaf. Size, 18⅝ × 1⅝ inches. Pages, 15. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 53*a*. The other works herein are Vēdādisūcikā 1*a*, Āgamapurāṇanukramaṇikā 4*a*, Vīraśaivasiddhānta 17*a*, Pañcaviṁśatilīlāvigrahavivaraṇa 46*a*, Śivapūjādiviṣaya 61*a*.

Complete.

In this work each of the letters of the Sanskrit alphabet is shown to denote a deity.

**Beginning:**

शिवतत्त्वपरे सूक्ष्मे बिन्दुरूपं तु जायते ।
बिन्दोर्नादस्समुत्पन्नो नादान्ते शक्तिजायते(रुद्रता) ॥
शक्तेस्तु जायते शब्दश्शब्दो जा(ब्दाज्जा)येत वाग्भवम् ।
वाग्भवाच्च कला जाता कलाभ्यो विकलस्तथा ॥

**End:**

लकारं चात्मतत्त्वं स्याद्रक्ताभं सर्वसिद्धिदम् ।
विद्यातत्त्वं क्षकारं स्यात् क्षीराभं चासुखप्रदम् ॥
इत्येत आदिदेवाश्च फलं वर्णक्रमेण तु ।
अकारादिक्षकारान्तास्समासात्परिकीर्तिताः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. **5416.** अन्त्येष्टिविधिप्रकरणम्.

ANTYĒṢṬIVIDHIPRAKARAṆAM.

Pages, 59. Lines, 21 on a page.

Begins on fol. 119*a* of the MS. described under No. 5101.

Complete.

On how to perform the funeral ceremonies of a Vīra-śaiva.

**Beginning:**

अथ समयाद्येकविंशतिदीक्षात्मकवेधा . . . मनुक्रियाख्यदीक्षात्रया-फललिङ्गिनां भक्ताद्यैक्यान्तषट्टि(ट्स्थ)लात्मिकानां षट्त्रिंशत्तत्त्वमयषट्-त्रिंशदुपचारलिङ्गार्चकानां लिङ्गत्रयार्पितकायभोगिनां शिवतत्त्वादितत्त्वत्रया-परपर्यायतत्त्वमस्यादिमहावाक्यार्थशिवैक्यगतानां च वीरशैवानामन्त्येष्टि-विधिं व्याख्यास्यामः—

तत्रादौ कर्ता निरूप्यते । मकुटागमे—

आचार्यो वाथ शिष्यो वा पुत्रो वा सोदरोऽपि वा ।
भक्तो वा बान्धवश्चैव मित्रो वा शिवतत्परः ॥

एषां मध्ये यः कश्चन कर्ता स्नात्वाचम्य, शुभ्रवस्त्राणि धृत्वा, विभूतिरुद्राक्षाणि धृत्वा माहेश्वरानाहूय ।

**End:**

मीढुष्टमेत्यक्षतां, मीढुष्टम शिवतम शिवो नस्सुमना भव . . विभ्रदागहि—पुण्डरीकस्रजं प्रयच्छति । अथार्चनं कुर्यात् वीरशैवक्रमं कुर्यात् भवेत् ॥

* * * *

करस्थले गते लिङ्गं हृदिस्थं हृदि निक्षिपेत् ।
मनसः प्राणभावं च ज्ञानज्योतिः प्रकाशितम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5417. अभिषेकविधिः.

## ABHIṢĒKAVIDHIḤ.

Substance, palm-leaf. Size, 13¼ × 1⅜ inches. Pages, 4. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 179*a*. The other works herein are Vāmakēśvaratantraṭippaṇa 1*a*, Vāmakēśvaratantra 55*a*, Mahāgaṇapatimantra 75*a*, Vināyakastavarāja 80*a*, Vināyakakavaca 81*b*, Vināyakasahasranāman 84*a*, Jyōtiṣmatīkalpa 96*a*, Rudantīkalpa 98*a*, Maṇḍūkabrahmakalpa 100*a*, Nidhipradīpikā 101*a*, Rēṇukātantra 117*a*, Bhuvanēśvarīkacchaputa 118*a*, Gōpālakalpa 122*a*, Piṇḍagōpālamantra 138, Piṇḍagōpālayantra 140*b*, Gōpālasandhyāvidhi 141*a*, Sudarśanamahāmantra 145*a*, Vaiśvānaramantra 150, Vaiśvānaramānasapūjāprakāra 151*a*, Vimalāgama 153*a*, Praṇavapañcākṣarīyantra 174*a*, Ardhanārīśvarastōtra 177*b*, Pṛtyaṅgirāsūkta 181*a*, Aparājitastōtra 186*a*, Indrākṣīstōtra 190*a*.

Complete.

A portion of Skandayāmala.

On the sprinkling of a disciple with hallowed water so as to initiate him into Śaivism and make him fit for the performance of religious rites.

**Beginning:**

अतः परं प्रवक्ष्यामि अभिषेकविधिक्रमम् ।
पापव्याधिजरामृत्युदारिद्र्यविषमोचनम् ॥
मन्त्रग्रहणयोग्यार्थं शिष्यसंरक्षणाय च ।
भूतलं सुतलं कृत्वा गोमयेनानुलेपयेत् ॥
ब्राह्मणान् भोजयेत्तत्र पुण्यस्त्रीर्भोजयेत्ततः ।

**End:**

ध्यानमूलं गुरोर्मूर्तिः पूजामूलं गुरोः पदम् ।
मन्त्रमूलं गुरोर्वाक्यं मोक्षमूलं गुरोः कृपा ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न गुरोरधिकं न गुरोरधिकं न गुरोरधिकं(न गुरोरधिकम्) ।
विदितं विदितं विदितं विदितं शिवशासनतः शिवशासनतः ॥

**Colophon:**

इति स्कन्दयामिळे अभिषेकपटलः ॥

---

No. **5418.** अष्टावरणमणिदर्पणसङ्ग्रहः—कर्णाटकटीकासहितः.

ASṬĀVARAṆAMAṆIDARPAṆASAṄGRAHAḤ WITH KANARESE COMMENTARY.

Substance, palm-leaf. Size, 8¼ × 1⅜ inches. Pages, 248. Lines, 6 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Prakaraṇas 1 to 9.

A work on Śaivāgama which classifies things into certain religiously appropriate groups: by Vīradēvadēśika, son of Vīraṇārādhya.

The transcription of this manuscript is said to have been completed by Śāntavīra, son of Cīnavīra, on Saturday the 2nd of the Aśvija month in the year Pramādīca.

**Beginning:**

श्रीमद्भागीरथीशं भरणरसधरं भक्तहृत्पद्मवासं
सोमोत्तंसं तुषाराचलपतितनुजावामभागप्रतिष्ठम् ।
सामस्तोत्रावकर्णं सकलवरणियं देवतासार्वभौमं
प्रेमग्रैयव(वेयके)न्द्रं हरिणपुरवरं शान्तमल्लेशलिङ्गम् ॥
पुरा महेशहृदयभस्मरेणुसमुद्भवः ।
शिवसारूप्यतां प्राप्तो रेणुकोऽभूद्गणेश्वरः ॥

* * *

रहस्यम्—

साधनं शिवमन्त्राद्यं साध्यं शिवसमागतौ ।
षडर्थं सङ्ग्रहस्यायं गानात्सर्वस्वमुच्यते ॥
अष्टावरणनाम्ना च सङ्ग्रहात्तदनुत्तमम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

आसेविते(तं)महाविष्णुयोगिनां हृदयालये ।
महेश्वरं महादेवं पुरुषं कृष्णपिङ्गलम् ॥

**Colophon:**

शिवयोगशिवाद्वैतसत्पथप्रतिष्ठापनाचार्यवर्यवरेण सिद्धेश्वरवंशोद्भूतशिवयोगिसार्वभौमश्रीवीरणाराध्यवेदतनूभववीरदेवदेशिकसकलवीरशैवभक्तमहेश्वरप्रीत्यर्थं चतुर्विधपुरुषार्थं विरचितं श्रुतिस्मृतिपुराणागमवीरशैवशास्त्रोदित . . . . . अष्टावरणमणिदर्पणसङ्ग(हे) नव(मं)प्रकरणम् ॥

---

No. **5419.** आगमग्रन्थसङ्ख्या.

ĀGAMAGRANTHASAṄKHYĀ.

Substance, paper. Size, 11 × $8\frac{5}{8}$ inches. Pages, 3. Lines, 18 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Begins on fol. 325*b*. The other works herein are Kriyākramadyōtikā 1*a*, Śrīcakravidhi 306*a*, Śrīcakralakṣaṇa (Tamil) 322*b*.

Complete.

Gives the number of Granthas contained in certain treatises on Śaivāgama.

**Beginning:**

कामिकं तु परार्धं स्यात् योगजं लक्षमुच्यते ।
चिन्त्यं लक्षमिति प्रोक्तं कारणं कोटिरुच्यते ॥
अजितं त्वयुतं प्रोक्तं दीप्तं नियुतमुच्यते ।
सूक्ष्मं तु पद्मसङ्ख्यं च सहस्रं शङ्खमिष्यते ॥

**End:**

विरिञ्चविमलोद्भवं चन्द्रज्ञानं च बिम्बकम् ।
पूजयेत्तु कृतं चैव मानुषं लिङ्गमुच्यते ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यच्छास्त्रेण यथा बेरं तच्छास्त्रे(ण)तथा गु(कु)रु ।
कृतं चेदन्यशास्त्रं वा राजराष्ट्रं विनश्यति ॥
शैवे मुक्तिगताश्च भानुगणना विप्रश्शिवब्राह्मणः
चत्वारेभि(रोऽपि हि) षड् द्विजातिगणना षट्पञ्च सीमाधिपाः ।
वैश्याः पञ्च त्रयोदशाश्च गणना शूद्रस्तदेकादशः
नानाजातिद्विजातिषट्च गणना त्रिषष्टिभक्तो भवेत् ॥

---

## No. 5420. आगमपुराणनामानुक्रमणिका.

## ĀGAMAPURĀṆANĀMĀNUKRAMAṆIKĀ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 35*a* of the MS. described under No. 217.

Complete.

Gives a list of certain treatises on Śaivāgama and of certain Purāṇas.

**Beginning:**

कामिकं योगजं चिन्त्यं कारणं त्वजितं तथा ।
दीप्तं सूक्ष्मं सहस्रं च अंशुमान् शु(सु)प्रभेदकम् ॥
विजयं चैव विश्वासं स्वायम्भुवमथानिलम् ।
वीरं च भैरवं चैव मकुटं विमलं तथा ॥
चन्द्रज्ञानं(च)बिम्बं च प्रोद्गीतं ललितं तथा ।

**End:**

ब्राह्मं पाद्मं विधेः पूष्णो ब्रह्मकैवर्तमेव च ।
आग्नेयमनिलं प्रोक्तं पुराणानि विभागशः ॥
ग्रन्थमेव चतुर्लक्षं पुराणं मुनिपुङ्गवाः ।
शैवं लक्षत्रयं प्रोक्तमन्येषां लक्षमेव च ॥
अष्टादश पुराणानि दशभिः प्रोच्यते बुधैः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5421. आगमपुराणानुक्रमणिका—कर्णाटकटीकासहिता.

## AGAMAPURĀṆĀNUKRAMAṆIKĀ WITH KANARESE COMMENTARY.

Pages, 26. Lines, 7 on a page.

Begins on fol. 4*a* of the MS. described under No. 5415. Incomplete.

Similar to the above. Contains a commentary in Kanarese

**Beginning :**

परातत्पारकं चैव परमागमशिवागमे ।
(सुप्र)भेदं वप्रकाशागमं . . . . . ॥
परातन्त्रावधारं च शिवाक्याचारवागमम् ।
शिवताख्या प्रकाशं च इत्यनादि नवागमम्(?) ॥

**End :**

वैष्णवं च विशेषज्ञैर्वैखानसमतं तथा ॥
मासोपवासी विज्ञेयो रौहिणेयस्तथैव च ।
एतच्चतुष्टयं सम्यक् पाञ्चरात्रमितीरितम् ॥

## No. 5422. आगमवचनानि.

## ĀGAMAVACANĀNI.

Substance, palm-leaf. Size, 16 × 1¼ inches. Pages, 3. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 45*a*. The other works herein are Vīrabhadrāṣṭaka 1*a*, Gaṇēśāṣṭaka 3*a*, Āgamasāra 4*a*, Viṣṇvaṣṭaka 14*b*, Nandikēśvarāṣṭaka 15*b*, Śivāṣṭaka 16*a*, Ardhanārīśvarāṣṭaka 17*a*, Liṅgāṣṭaka 17*b*, Brahmāṣṭaka 18*b*, Basavapañcaratna 19*a*, Mārkaṇḍēyastuti 20*a*, Mahādēvāṣṭaka 20*b*, Rudrakavaca 21*a*, Vyāsāṣṭaka 23*b*, Śivakavaca 25*a*, Śivāṣṭōttaraśātanāmāvalī 28*a*, Indrākṣīstōtra 30*a*, Śarabhasālvamantra 31*a*, Vīrabhadrakavaca 32*a*, Prāsādapañcākṣarīmantra 33*a*, Nīlakaṇṭhastōtra 34*a*, Bhīmēśvarāṣṭaka

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(Telugu) 36*a*, Ṣaṭcakranirṇaya 37*b*, Śivāṣṭaka 38*b*, Mahādēvāṣṭaka 39*b*, Mārkaṇḍēyastuti (Telugu) 40*a*, Śivastōtra 41*b*, Āndhrapadya 42*b*, Śivakavaca 43*a* Vyāsāṣṭaka 44*a*, Śivastuti 47*a*, Bhuvanēśvarīstōtra 50*a*, Vīrabhadrāṣṭaka 51*a*, Ānnapūraṇāṣṭaka 52*a*, Prāsādapañcākṣarīmantra 54*a*.

Incomplete.

Gives extracts from Śaivāgama works to support the superiority of Śiva to Viṣṇu and the other gods.

**Beginning:**

वसुरुद्रार्करूपेभ्यो मध्ये पिण्डं तु पुत्रकः ।
वेदोक्तं रुद्रनिर्माल्यं किं पुनर्मानुषादया(यः) ॥
रुद्रपिण्डोद्भवा विप्राः शिवस्सर्वेश्वरो विभुः ।
मोहेनैव न जानाति तातं वेश्य(ा)सुतो यथा ॥
आतित्यं(थ्यं))वानुपिण्डं च वर्जयेच्छुद्धवैदिके ।

**End:**

ब्रह्मविष्णुसुरेशाद्याः पशवः परिकीर्तिताः ।
तेषां पतित्वाद्देवेशः (सर्वैः) पशुपतिस्स्मृतः ॥
सर्वकारणमीशानं साम्बसत्त्वादिलक्षणम् ।
न विष्णुर्न विरिञ्चश्च न रुद्रो नापरः पुमान् ॥

---

## No. 5423. आगमवचनानि.

## ĀGAMAVACANĀNI.

Substance, palm-leaf. Size, $15\frac{3}{8} \times 1\frac{3}{8}$ inches. Pages, 90. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Wants beginning and end.

On the worship of Siva with a view to attain salvation.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

. . . . . . . . श्रूषणम् ।

वक्षस्स्थमेन(च)कं चैव लक्ष्मीं दिव्यस्वरूपकम् ॥

आलिङ्गनेन हस्तं च अभयं दक्षिणे करे ।

(पीताम्ब)रोपवीतं च स्वर्णरत्नकिरीटकम् ॥

लक्ष्मीनारायणं चैव ध्यात्वा मन्त्रेण पूजयेत् ।

पीतं पीनं चतुर्बाहुं ब्रह्माणं चतुराननम् ॥

हंसयानं च बिभ्राणं दण्डाक्षस्रक्कमण्डलुम् ।

* * * *

अभिषेकमघोरं च तत्पुरुषं च निवेदनम् ।

वामदेवमलङ्कारमुपचारं तु सद्यकम् ॥

ईशान्येनार्चनं प्रोक्तं लिङ्गे सर्वार्थसाधके ।

* * * *

डोलोत्सवमिदं प्रोक्तं सर्वकर्मफलप्रदम् ।

एवं ज्ञानेन संपूज्य शिवसायुज्यमाप्नुयात् ॥

**Colophon:**

इत्युत्तरकारणे प्रतिष्ठातन्त्रे क्रियापादे आर्द्राव्रतपटलः ॥

**End:**

सद्योद्घाटनतः पश्चान्नित्यकर्म समाचरेत् ।

पूर्ववन्नित्यपूजां च कारयेच्छिवपूजनम् ॥

एवं वै शङ्क.

---

## No. 5424. आगमसारः.

## ĀGAMASĀRAḤ.

Pages, 29. Lines, 22 on a page.

Begins on fol. 4*a* of the MS. described under No. 5211.

Incomplete.

Gives the important teachings of the Śaivāgama regarding the consecration of the Śiva-liṅga.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

ओमथातश्शिवलिङ्गविग्रहप्रतिष्ठापनं वैदिकं व्याख्यास्यामः—

पाश्चरात्रं पञ्चशैवं केवलं तान्त्रिकं परमहंसं चेति पञ्चधा विभज्य, पञ्चरात्रो ब्राह्मणस्तस्य कर्म पाश्चरात्रम् । क्रियालिङ्गविग्रहेषु मुद्राबन्धप्रसिद्धं श्रुतिमन्त्रवर्जं दर्शनसेवादि सर्वेषां ब्राह्मणानां पञ्चशैवो ब्राह्मणश्च पञ्चशैवं कर्म तेन जीवति तथा स्वयम्भूते क्रियाभूतेषु स्वयम्भूतं नार्मदं स्वयंव्यक्तं च यन्त्रं मुद्राक्रियामन्त्रमागमप्रसिद्धं तत्कर्मसिद्धं पञ्चशैवमित्याहुः । दर्शनसेवाप्रसादेषु सर्वेऽपि मन्यन्ते । तत्र निवेदितं न ग्राह्यमेतच्च शिवनिर्माल्यम् ।

**End:**

ततश्शुभवचनानि गुडजीरकाक्षतानि पयोमधुघृतामिश्रितानि नवरत्नयुतानि दम्पत्योश्शुभानि मङ्गलकन्यकाकण्ठे मङ्गलसूत्रं शिवो बध्नाद्ध्रुवम् । सप्तर्षीन् स्मरेत् ॥

---

No. **5425.** आगमसारः.

ĀGAMASĀRAḤ.

Pages, 14. Lines, 5 on a page.

Begins on fol. 4*a* of the MS. described under No. 5422.

Incomplete.

Similar to the above.

Deals with the acceptability of Śiva-nirmālya and gives an account of certain Śiva-liṅgas.

**Beginning:**

शिवरहस्ये—

नित्यं वैदिकशैवेन सेव्यते लिङ्गसेवितम् ।
तत्त्वार्थाकारशैवेन सेव्यते चरसेवितम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गुरुजङ्गमलिङ्गानां निर्माल्यं भोजनाधि(दि)तत्(कम्) ।
न दैवानां भवेद्देवि प्रसादं त्रयमुत्तमम् ॥
प्राणप्रसादमव्यक्तं व्यक्तं लिङ्गप्रसादकम् ।
लिङ्गजङ्गमसंयुक्तं प्रसादं चेत्यखण्डितम् ॥

**End:**

कूर्मेश्वरस्य लिङ्गं च द्वारावत्या सुपूजितः ।
सूत्रकोटिसहस्रेभ्य एकविप्रः प्रभुञ्जते ॥
विप्रकोटिसहस्रेभ्य एकलिङ्गः प्रभुञ्जते ।
लिङ्गकोटिसहस्रेभ्य एकजङ्गमभुञ्जते ॥

---

## No. 5426. आगमसारशतकत्रयम्.

## ĀGAMASĀRAŚATAKATRAYAM.

Pages, 38. Lines, 21 on a page.

Begins on fol. 101*a* of the MS. described under No. 5101.

Complete.

A work in 300 stanzas on the doctrines of the Vīra-śaivas.

**Beginning:**

यस्य शम्भोश्च निश्वासा वेदास्साङ्गास्ससूत्रकाः ।
का स्तुतिः प्रमुदे तस्य भक्त्याहं मुखरोऽभवम् ॥
त्रिपादार्धं चतुष्पादं महातन्त्रं जगत्पतिः ।
सूत्रेणैकेन सङ्गृह्य प्राह विस्तरशः पुनः ॥
अधस्स्रोतोद्भवा धर्मा ऊर्ध्वस्रोतोद्भवः परः ।
कामिकादिप्रभेदेन स भिन्नोऽनेकधा द्विजाः ॥

*



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वीशब्देनोच्यते विद्या शिवजीवैक्यबोधिका ।
तस्यां रमन्ते ये शैवा वीरशैवास्तु ते मताः ॥

स्थीयते लीयते यत्र मुक्तसंसारपद्धतिः ।
तदेव स्थलमित्युक्तं स्थलतत्त्वविशारदैः ॥

अतोऽङ्गलिङ्गभेदेन शतमेकोत्तरं स्थलम् ।
वेदागमैर्विरचितं शृणु वत्सैकमानसः ॥

**Colophon:**

इत्यनुक्रमणिकास्थलं समाप्तम् ॥

**End:**

अशेषमोहनाशाय शाब्दबोधो न हि क्षमः ।
निवर्तते न तिमिरं कदाचिद्दीपवार्तया ॥

लक्ष्यानुभवहीनस्य लक्षणैः किं प्रयोजनम् ।
कर्पूरनाममात्रेण किं वस्तु सुरभीभवेत् ॥

इति पूर्वभागे अङ्गस्थलानि सप्तपञ्चाशत् । अङ्गस्थलानि समाप्तानि।
इत्युत्तरखण्डं समाप्तम् ॥

उक्तार्थमुपसंहरति मङ्गलम्—

महेश्वरं सर्वजगद्विभासकं महेश्वरादिप्रथितौजसामपि ।
अगोचरं भक्तिपुरस्सरं सदा नमामि संसारमहाविषौषधम् ॥

* * * *

स्तुति(नति)निवहस्य नैव गोचरं भवभयजलधेस्सदैव तारकम् ।
अहमहमिति सर्वदोदितप्रभं निखिलजगद्धितं नमामि शङ्करम् ॥

**Colophon:**

आगमसारशतकत्रयं समाप्तम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5427. आगमाः.
## ĀGAMĀḤ.

Pages, 15. Lines, 7 on a page.

Begins on fol. 94*a* of the MS. described under No. 2854.

Incomplete.

This manuscript contains only that portion of Śaivāgama which deals with what is called the opening of the eyes of the image of Śiva.

**Beginning:**

शान्त्यतीतकळान्यासः—

मूर्धादिक्रमेण शिरसि ओं ह्वां ह्वौं शान्त्यतीतकळायै नमः । ललाटे ओं ह्वां ह्वैं शान्तिकळायै नमः, नसि ओं ह्वां ह्वं विद्याकळायै नमः ।

**End:**

शुक्रमासि . रश्मिभिरिति मन्त्रेण दक्षिणनेत्रे आज्येन दक्षिणनेत्रं प्रक्षाळ्य, मधुवातेति मन्त्रेण मधुना वामनेत्रं प्रक्षाळ्य, गन्धपुष्पधूपदीपादिकं कृत्वा.

**Colophon:**

इति नेत्रोन्मीलनविधिः ॥

---

## No. 5428. आवरणपूजा.
## ĀVARAṆAPŪJĀ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 38*a* of the MS. described under No. 2854.

Incomplete.

On the worship of the minor deities surrounding the central deity in a temple of Śiva.

**Beginning:**

अथावरणपूजा—

सद्योजातादिपूर्वादिप्रथमावरणम् । सर्वज्ञशक्तिधाम्ने नमः, नित्यतृप्ति-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शक्तिधाम्ने नमः, स्वतन्त्रशक्तिधाम्ने नमः, नित्यमलुप्तशक्तिधाम्ने नमः, अनन्तशक्तिधाम्ने नम इति द्वितीयावरणम् ।

**End:**

स्वामिन् सर्वजगन्नाथ यावत्पूजावसानकम् ।
तावत्त्वं प्रीतिभावेन लिङ्गेऽस्मिन् सन्निधिं कुरु ॥
ओं नमश्शिवाय सद्योजातं प्रपद्यामि आसनं समर्पयामि ।

---

## No. 5429. आशीर्वादः.

## ĀŚĪRVĀDAḤ.

Substance, palm-leaf. Size, $15\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 11. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Dhvajārōhaṇabhērītāḍanaviṣaya 7*a*, Brahmāditālavidhāna 19*a*.

This manuscript is said to have belonged to a Subbarāya.

Contains a series of passages invoking blessings on the temple of Ēkāmranātha at Conjeevaram.

**Beginning:**

अस्य देवालयस्य मण्टपगोपुरप्रासादादयः पञ्च प्राकाराश्च स्वर्णरत्नमयं भूयातु(सुरि)ति भवन्तो महान्तोऽनुगृह्णन्तु । अस्य देवालयस्य पादबन्धपद्मबन्धपद्माश्रीयपद्मपुष्करप्रतिबन्धप्रतिश्रवप्रतिसुन्दरप्रथमफलक-मूलप्रासादस्य . . . . . . . . . . . . . . .
नवरत्नादिस्वर्णमकुटमयं भूयादिति भवन्तो महान्तोऽनुगृह्णन्तु ।

**End:**

अस्य देवालयस्य कल्पगणेशसुब्रह्मण्यकामाक्षीदेवीसमेतश्री एकाम्रनाथपादारविन्दयोरचञ्चला भक्तिसिद्धिर्भूयादिति भवन्तो महान्तोऽनुगृह्णन्तु ।

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सद्यस्सुवृष्ट्या सर्वे तटाकाः सद्यस्सम्पूर्णा भूयादि(सुरि)ति भवन्तो महान्तोऽनुगृह्णन्तु । सर्वे जनास्सुखिनो भवन्तु । समस्तसन्मङ्गलानि भवन्तु ॥

---

## No. 5430. ईश्वरपूजाविधानम्.
## ĪŚVARAPŪJĀVIDHĀNAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 27*a* of the MS. described under No. 2902.

Incomplete.

On the details regarding the performance of Śiva-pūjā.

**Beginning:**

गुरुभ्य ओम् । परमगुरुभ्य ओम् ।

आराधितो मनुष्यैस्तु सिद्धैर्देवासुरादिभिः ।

आराधयामि भक्त्या त्वां मां गृहाण महेश्वर ॥

विमु(नियु)क्तसेवकर्मारम्भे प्राणायामे विनियोगः । प्रा(णा)यामत्रयं कृत्वा.

**End:**

गुं गुरुं गणपतिं दुर्गां क्षेत्रपालं सरस्वतीम् ।

प्रणवे परमात्मानं मूर्ध्नि यस्योरुगे(?) हृदि ॥

इति भूशुद्धिम्.

---

## No. 5431. कामिकागमः.
## KĀMIKĀGAMAH.

Substance, paper. Size, 13½ × 8 inches. Pages, 730. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

Contains Paṭalas 1 to 116 and 136.

Deals with the worship of Śiva and with the performance of the various religious festivals in Śaiva temples.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

वन्दे महागणपतिं मदनारिसूनुवामोरुसंस्थवनिताभुजवेष्टिताङ्गम् ।
वल्लीशपूर्वजमभीष्टदमाश्रितानां वाणीपतिप्रमुखदेवगणार्चिताङ्घ्रिम् ॥

* * * *

भृगुश्चात्रिभरद्वाजवसिष्ठाद्या महर्षयः ॥
जिज्ञासवः परं ज्ञानं शिवशक्त्युन्मुखीकृताः ।
प्रणम्य चरणौ तस्य प्राहुरीशमुमापतिम् ॥

ऋषयः—

* * * *

वयं नियुक्ता देवेश त्वयेज्यायां शिवस्य तु ॥
तदर्थं सारभूतं तु शास्त्रं शिवमुखोद्गतम् ।
वक्तुमर्हसि देवेश भक्तानामनुकम्पया ॥
इत्येवमृषिभिः पृष्टो भगवान् वृषभध्वजः ।
प्राह गम्भीरया वाचा स्फुरच्चन्द्रार्धशेखरः ॥

ईश्वर उवाच—

साधु पृष्टं हि युष्माभिः शृणुध्वं संश्रितव्रताः ।
कामिकाख्यमहातन्त्रादुद्धृतं शास्त्रमुत्तमम् ॥
अवतीर्णमिदं मेरौ प्रणवाद्यवतारकैः ।
क्रियाचर्यासमोपेतं योगज्ञानान्वितं परम् ॥
इत्येवमुक्ता ऋषयः प्रणेमुर्दण्डवत् क्षितौ ।
तेषां ज्ञानं शिवो दत्वा प्राह तन्त्रमनुत्तमम् ॥

**End:**

वर्जयेद्वा नयेद्रेरयात्रामात्रमथापि वा ।
मासोत्सवद्वयप्राप्तावेवमेव समाचरेत् ॥
मासोत्सव इह प्रोक्तो(क्त) एकाहोत्सववद्द्विजः ।
कुर्यादेकमनेकं वा मास्येकस्मिन् तदुत्सवम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5432. कामिकागमः—उत्तरभागः.

## KĀMIKĀGAMAḤ: THE CONCLUDING PART.

Pages, 47. Lines, 22 on a page.

Begins on fol. 129*b* of the MS. described under No. 3027.

From Jīrṇōddhāra to Aṣṭabandhana.

The latter portion of the work described under the previous number.

**Beginning:**

अनुक्रमविधिं वक्ष्ये सर्वेषां च सनातनम् ।
प्रासादे पतिहीने वा वक्रे जीर्णे न(च)दिग्भ्रमे ॥

* * * *

जीर्णाद्यं पूजितं हन्ति निहन्ति तदपूजितम् ।
तस्मात्समुद्धरेज्जीर्णं यथाशास्त्रं सुखाय च ॥

**End:**

पादौ प्रक्षाळ्याचम्य कृतसकलीकरणो भस्म सन्धार्य रात्रिशेषं जागरैर्व्यपोह्य ततः प्रभाते मूर्तिपैस्सह देशिक उक्तवत्कुम्भाभिषेकं कारयेत् ॥

**Colophon:**

इत्युत्तरकामिकाख्ये महातन्त्रे अष्टबन्धनविधिपटलः ॥

---

## No. 5433. कुमारतन्त्रम्.

## KUMĀRATANTRAM.

Substance, paper. Size, $10\frac{3}{8} \times 8\frac{3}{4}$ inches. Pages, 467. Lines, 16 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

On the worship of Subrahmaṇya, and on the conduct of religious festivals in connection with that worship.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

कैलासे शिखरे रम्ये नानारत्नविचित्रिते ।
सिद्धगन्धर्वसङ्गीते विचित्रकुसुमोज्ज्वले ॥

* * * *

देवं त्रिलोचनं नत्वा प्राञ्जलिः कौशिको मुनिः ।
प्रसीद देवदेवेश प्रसीद वृषभध्वज ॥

* * * *

कारणाख्यं महातन्त्रं शतकोटिप्रविस्तरम् ।
ब्रह्मणे यत् पुरा प्रोक्तं त्वया सर्वविशारद ॥
तस्मिन् तन्त्रे समाख्यातं कौमारं तन्त्रमीश्वर[म्] ।

* * *

मन्त्रोद्धारविधिं पूर्वं शौचाचमनकं तथा ।
स्नानानुष्ठानमार्गश्च सुब्रह्मण्यार्चनाविधिम् ॥
नैवेद्यश्चाग्निकार्यश्च नित्योत्सवविधिं तथा ।
कुण्डानां लक्षणश्चैव मण्डलस्य च लक्षणम् ॥

**End:**

सर्वातोद्यसमायुक्तं पूर्वे वा चोत्तरेऽपि वा ।
वर्तिद्रव्यं परित्यक्त्वा पुनः पात्राणि सङ्ग्रहेत् ॥
सारं रक्षेत्तदा देव दीनं प्रति दिशं प्रति ।
एवं यः कुरुते मर्त्यो राजा विजयमाप्नुयात् ॥

**Colophon:**

इति कुमारतन्त्रे कौशिकप्रश्ने महासंहितायां सायंरक्षाविधिपटलः ॥

कल्हारसरसीं दृष्ट्वा कार्त्तिकेयं नयन्ति ये ।
तेषां पापानि नश्यन्ति क्षिप्रमेव न संशयः ॥

कुमारतन्त्रं सम्पूर्णम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5434. क्रियाक्रमद्योतिका.

## KRIYĀKRAMADYŌTIKĀ.

Pages, 186. Lines, 22 on a page.

Begins on fol. 1*a* of the MS. described under No. 3027.

Incomplete.

On the consecration of the image of Subrahmaṇya : by Aghōraśivācārya.

**Beginning :**

अथ वक्ष्ये विशेषेण लिङ्गस्थापनमुत्तमम् ।
अष्टादशविधानेन प्रतिष्ठाविधिरुच्यते ॥
मृत्सङ्ग्रहणमारभ्य द्वितीयं चाङ्कुरार्पणम् ।
रत्नन्यासं तृतीयं तु नयनोन्मीलनं चतुः ॥

**End :**

ततः प्रदक्षिणीकृत्य प्रणम्य स्वगृहं व्रजेत् ॥
गुरुर्वस्त्रादिसंयुक्तं गृह्णीयाद्यागमण्टपम् ।
सर्वोपकरणं शिल्पी तथा स्नपनमण्टपम् ॥

**Colophon :**

इति श्रीमदघोरशिवाचार्यविरचितायां क्रियाक्रमद्योतिकायां सुब्रह्मण्यप्रतिष्ठाविधिस्समाप्तः ॥

---

## No. 5435. क्रियाक्रमद्योतिका.

## KRIYĀKRAMADYŌTIKĀ.

Pages, 611. Lines, 18 on a page.

Begins on fol. 1*a* of the MS. described under No. 5419.

On the conduct of certain religious rites in Śaiva temples: by Aghōraśivācārya *alias* Paramēśvara.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

जिज्ञासापदमीशानं जगतो योनिमव्ययम् ।
सच्चिदानन्दमद्वैतं सर्वेश्वरमहं भजे ॥
पूर्णस्यावाहनं कुत्र सर्वाधारस्य चासनम् ।
स्वच्छस्य पाद्यमर्घ्यं च शुद्धस्याचमनं कुतः ॥

* * * *

वेदवाचामवेद्यस्य कथं स्तोत्रं विधीयते ।
इदमेव परा पूजा विष्णोः सद्यस्स्वरूपिणः ॥
व्योमव्यापिने व्योमरूपाय सर्वव्यापिने शिवाय ।

* * * *

ओं नमश्शिवाय ओं नमो नमः ।
मध्ये नवपदं वेदिं देविके मङ्गलायुधे ।
मानुषे च पदे कुण्डं पैशाचे तोरणं न्यसेत् ॥

* * * *

**Colophon :**

इति परमेश्वरापरनामधेयश्रीमदघोरशिवाचार्यविरचितायां क्रियाक्रमद्योतिकायां पवित्रकर्मविधिस्समाप्तः ॥

**End :**

प्रथमनृत्तध्यानम्—

विकीर्णं च जटाभारं जटामकुटसंयुतम्।
जटामण्डलयुक्तं वा शेषं प्रथमनृत्तवत् ॥
चतुर्थ[मे]तदिदं सर्वं प्राणिनां च हितावहम् ।
कर्णान्तमुद्धृतं सव्यं वामपादं तु कुञ्चितम् ॥

* * * *

एवं षडष्टमाख्यातं राजराष्ट्रं सुखावहम् ।
तदेवं दक्षिणे पार्श्वे जटाग्रे जाह्नवी भवेत् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5436. क्रियाक्रमद्योतिका.

## KRIYĀKRAMADYŌTIKĀ.

Substance, palm-leaf. Size, 16¾ × 1¼ inches. Pages, 80. Lines, 5 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Incomplete.

Similar to the above.

By Jñānaśivācārya.

**Beginning:**

सुनक्षत्रे तिथौ वारे सुयोगे सुमुहूर्तके ।
तत्पूर्वे अङ्कुरं कृत्वा पञ्चसप्तनवाहके ॥
अङ्कुरादिप्रतिष्ठान्तमादिशैवेन कारयेत् ।
सर्वमङ्गलकार्यादौ कर्तव्यं मङ्गलाङ्कुरम् ॥

* * *

**Colophon:**

परमेश्वरापरनामधेय[य]श्रीज्ञानशिवाचार्यविरचितायां क्रियाक्रमद्योतिकायामङ्कुरार्पणविधिस्समाप्तः ॥

**End:**

ततो नैवेद्यधूपदीपाचमनार्घ्यं दत्वा तोषयित्वा पश्चात्सामान्यार्घ्यपात्रे हस्ते गृहीत्वा.

---

## No. 5437. क्रियाक्रमद्योतिका.

## KRIYĀKRAMADYŌTIKĀ.

Substance, palm-leaf. Size, 11¼ × 1⅛ inches. Pages, 28. Lines, 5 on a page. Character, Grantha. Condition, good. Appearance, new.

Incomplete.

Similar to the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

वन्दे विश्वाधिकं शान्तमनादिनिधनं शिवम् ।
निष्कलं निष्क्रियं किं च शक्तिं ज्ञानक्रियात्मिकाम् ॥

गुरून् परापरान् नत्वा गुरुवंशक्रमागतान् ।
क्रियाक्रमद्योतिकेयं नित्या(नां)क्रियते स्फुटम् ॥

प्रातस्समयात्पूर्वं पञ्चनाडिकाविच्छेदे समुत्थाय, शुचिर्वाप्यशुचिर्वाथ सम्भवशौचयुक्तो हृत्पद्मे द्वादशान्ते वा गुरूपादिष्टप्रकारेण शिवं ध्यात्वा ।

**End:**

शुद्धाविद्यातत्त्वान्तव्याप्तिकं पूजास्थानं प्रविश्य पूजोपकरणाद्युपाहृत्य पूर्वास्यो भास्करमर्चयेत् ।

---

No. **5438.** क्रियासारः.

KRIYĀSĀRAḤ.

Substance, palm-leaf (Śrītāla). Size, 19⅝ × 2 inches. Pages, 152. Lines, 8 on a page. Character, Nandināgarī. Condition, good. Appearance, old.

Upadēśas 4 complete.

Contains the substance of several Śaivāgamas: by Nīlakaṇṭha-dīkṣita. It is called Nigamāgamasārasaṅgrahaḥ.

**Beginning:**

आद्यन्तमङ्गलमजातसमानभावमाद्यन्तविश्वमजरामयमात्मवेदम् ।
पञ्चाननं प्रबलपञ्चविनोदशीलं सम्भावये मनसि शङ्करमम्बिकेशम् ॥

कैलासे वसते कलानिधिकलां सानन्दमुत्तंसते
सव्योन्मीलितशैलराजतनयापुम्भावमिश्रायते ।
कस्तूरीकलितार्धकल्पितकनत्कर्पूरलेपोल्लस-
द्देहायामितकिङ्करैर्विलसते तस्मै नमश्शम्भवे ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रुद्राक्षस्रगलङ्कृतानतितरां शुभ्रैरदभ्रैश्शुभै-
र्दिव्याङ्गान् भसितैरमन्दहसितैर्मान्यान् परानन्दतः ।
तान्वन्दे शिवकिङ्कराञ्छिवकृपालब्धाणिमाद्यष्टकान्
प्रत्यूहाद्रिविभेदने पटुतरान् दम्भोळिकल्पानहम् ॥

वन्दे मल्लयदेवदेशिकवरं तातं शिवाराधना-
बद्धोत्साहमनादिवीरविलसच्छैवागमोक्तक्रमैः ।
प्रातर्मध्यदिनेऽथ सायमुचितैर्नालं दिवा शर्वरी
यत्स्वाभाविकभक्तियोगलहरीविस्तारणायाखिला ॥

तां वन्दे चेन्नमाम्बामहरहरुदितैर्भक्तिभावैरुदारैः
पातिव्रत्यं शिवार्चापरिचरणविधौ साधु सम्पादयन्तीम् ।
मैत्रीमासादयन्तीं परशिवपदयोः पश्यतां पावयित्रीं
धात्रीशीलानुकर्त्रीं परकृतसहने सादरं मत्सवित्रीम् ॥

देवः कैलासनाथः कलितशशिकलश्शर्वरीपश्चिमांशे
कारुण्याम्भोनिधिर्माम[शि]शिषदमलै(लिनै)स्सूक्तिबृन्दैरमन्दैः ।
सर्वेषामागमानां वचनसमुदयैस्सङ्गृहीतैः प्रबन्धं
कुर्यास्त्वं वत्स बुद्धिः प्रसरति विमला ते क्रियासारनाम्ना ॥

इत्याज्ञप्तस्तु तेन स्वरसविकसितां बुद्धिमासाद्य सूक्ष्मां
भूयस्यै प्रीतये ऽहं जगति सुमनसां सत्क्रियासारमेनम् ।
कुर्वे सर्वागमानां परशिववचसां सङ्ग्रहं नीलकण्ठः
स्मारंस्मारं स्मरारेर्मनुमनुकलयन् स्वप्नलब्धोपदेशम् ॥

लिङ्गाङ्गी मनुजो भवेद्यदि पुनर्नाङ्गी यदैवाङ्गभाक्
नारङ्गीपदसङ्गिपाणिकमलोऽनङ्गीकृतानङ्गदृक् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अङ्गासङ्गिभुजङ्गभूषणवरो गङ्गातरङ्गावली-
राजद्रम्यकुरङ्गलिङ्गशकलोत्तंसोत्तमाङ्गो भवेत् ॥

नीलकण्ठमुखाम्भोधेर्निगमागमवर्त्मना ।
निर्गतं शैवराद्धान्तं नीलकण्ठस्तनोत्यसौ ॥

पूर्वाचार्यैरखिलनिगमैरागमैरुक्तमार्गाः
क्षुण्णास्तीक्ष्णैः प्रबलमतिभिर्लब्धतत्त्वावबोधैः ।
सङ्क्षिप्योक्तैरकृतकवचोगुम्फनैर्जङ्गमानां
भूयो भूयादमलमनसां भूयसी भक्तिवृद्धिः ॥

* * *

निगमानामागमानां परमाप्तोपदेशतः ।
प्रामाण्यमविशेषेण ज्ञातव्यं तत्त्वदर्शिभिः ॥

बहुभिर्युक्तिभिः स्पष्टं विरोधः परिहार्यते ।
ग्रन्थविस्तरभीत्याहं प्रकृतार्थमुपक्रमे ॥

प्रबन्धस्य क्रमस्त्वेवमुपोद्घातादनन्तरम् ।
द्वात्रिंशदुपदेशास्तु भवन्ति कथिता इमे ॥

उपदेशे प्राथमिके व्याससूत्रानुरोधतः ।
सर्वज्ञे सर्वशक्तौ च निमित्ते जगतस्तथा ॥

उपादाने च वेदान्तवाक्यानां सम्यगन्वयः ।
सर्ववेदान्तवाक्यानामुपदेशो द्वितीयके ॥

**End:**

पञ्चाक्षरोऽयं मन्त्रश्च शान्त्यर्थे विनियुज्यते ।
तदर्थः प्राप्यते तस्मात्कारिकार्थविचारणात् ॥

कारिकार्थं समध्याप्य यः प्रचारयति स्वयम् ।
अहं तस्य पदद्वन्द्वं शिरसा धृतवान् पुनः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अशैवे न प्रदेया स्यात्कारिका शिवभावदा ।
श्रुत्वा दद्याच्छ्रावयित्रे वेदोक्तामेव दक्षिणाम् ॥
गृहस्थाय धनं धान्यं सस्यपूर्णां वसुन्धराम् ।
सालङ्कारां विरक्तेभ्यो दद्यात्तदनुशासनात् ॥
तदङ्गं भोजयेद्विद्वान् सहस्रं शतमेव वा ।
ज्ञानिनश्शाम्भवानन्ते सायुज्यं याति शम्भुना ॥

**Colophon:**

इति श्रीमद्विशिष्टाद्वैतसिद्धान्तरहस्यैकोत्तरशतस्थलाभिज्ञनीलकण्ठ - कृते निगमागमसारसङ्ग्रहे क्रियासारे चतुर्थोपदेशः ॥

---

No. **5439.** गङ्गाधरविचारः—सव्याख्यः.

GAṄGĀDHARAVICĀRAḤ WITH COMMENTARY.

Pages, 15. Lines, 4 on a page.

Begins on fol. 8*a* of the MS. described under No. 18.

Incomplete.

The first and the last folios are half lost.

An investigation of the meaning of the word Gaṅgādhara. The author of the text is Vaidyanāthācārya; the name of the author of the commentary is not known.

**Beginning:**

(ध्यात्वा वैद्येशपादाब्जे) भक्तियुक्तेन चेतसा ।
गङ्गाधरत्वमीशस्य (शब्दशक्त्या विचार्यते) ॥

* * * *

. . . . . . . . चिन्मयीं धृतवान् हरः ।
तेन गङ्गाधरः प्रोक्तश्चिन्मूर्तिरमलश्शिवः ॥

**Colophon:**

इति श्रीवैद्यनाथाचार्यवर्यविरचिते गङ्गाधरविचारे सूत्रसागरं समाप्तम् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नमस्कृत्वा महादेवं विश्वेशं विश्वपूजितम् ।
गङ्गाधरविचारस्य वृत्तिरस्माभिरुच्यते ॥

अथ तत्र तावदाचार्यश्चिकीर्षितस्य ग्रन्थस्य निष्प्रत्यूहपरिपूरणं कामयन् शिष्टाचारपरिप्राप्तेष्टदेवतानमस्काररूपं मङ्गलमाचरन् प्रकरणं प्रतिजानीते--ध्यात्वेति । चेतसा अन्तःकरणेन म(न)सेत्यर्थः । किंविशिष्टेन भक्तियुक्तेन शिवध्यानैकानिष्ठस्य सवा(र्व)लक्षणवत्या भक्त्या सहितेन ।

शिवध्यानैकनिष्ठस्य शुश्रूषा श्रद्धया सह ।
शिवभक्तिरिति प्रोक्ता शिवभक्तिपरायणैः ॥ इत्युक्तत्वात् ।

**End:**

महदादिविशेषाङ्गं विकल्पस्य शचीपतेः ।
मुनीनामपि देवानां यः पुष्टिं कुरुते सदा ॥

बन्धनात् वृ(न्त)तो यत्पक्कमुर्वारुकं स्वयं मुच्यते तद्वदित्यर्थः ।

* * *

तथा चित्रं याय(ज)नीयं पूजनीयम्.

---

## No. 5440. गौरीमण्डपपूजाविधिः.

## GAURĪMAṆḌAPAPŪJĀVIDHIḤ.

Pages, 136. Lines, 22 on a page.

Begins on fol. 154*a* of the MS. described under No. 3027. Deals with the consecration of the image of Pārvatī in temples. Complete.

**Beginning:**

गौर्यास्संस्थापने चैव सर्वं तस्यास्तु मन्त्रकैः ।
कारयेत्तु क्रमेणैव मण्टपस्य तु मध्यमे ॥
नवाग्रचायतने कुर्यात् योन्याकारं दिशासु च ।
वृत्तानि वा तथा कुर्यात् प्रधानं योनिकुण्डकम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

शिवाद्दशाङ्गतोऽङ्गानामाहुतिं ब्रह्मणामपि ।
ततो घोराणुना होमं पञ्चविंशतिसङ्ख्यया ॥
प्रायश्चित्तार्थमाज्यद्य(स्य)पूर्णां कुर्याद्विधानतः ।
संहिताहोममेवं स्यात् मूर्तिहोमं विधीयते ॥

**Colophon:**

इति श्रीगौरीमण्डपपूजाविधिः ॥

---

No. **5441.** चरलिङ्गप्रतिष्ठाविधिः.

CARALIṄGAPRATIṢṬHĀVIDHIḤ.

Pages, 21. Lines, 7 on a page.

Begins on fol. 66*a* of the MS. described under No. 2854.

Complete.

On the mode of consecrating the Liṅga for domestic worship.

**Beginning:**

अथातस्संप्रवक्ष्यामि प्रतिष्ठाविधिरुच्यते ।
बाणरत्नमयं लिङ्गं स्थापनं च शुभावहम् ॥
अप्रतिष्ठितलिङ्गस्य अलङ्कारं न पूजनम् ।
कारयेद्यदि मोहेन सर्वदोषमवाप्नुयात् ॥

**End:**

राजोपचारदेवोपचारान् कृत्वा स्तोत्रवन्दनादिकं कृत्वा यागोपकरण-द्रव्यैर्यथोक्तदक्षिणां च आचार्यैस्सन्तोष्य ऋत्विगितरजनान् द्रव्यमूलेन सन्तोष्य भूरिदानं कृत्वा ।

**Colophon:**

इति सुप्रभेदे तृतीयपादे प्रतिष्ठातन्त्रे चरलिङ्गप्रतिष्ठाविधिर्नाम एकोनपञ्चाशत्पटलः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5442. चरलिङ्गप्रतिष्ठाविधिः.

## CARALIṄGAPRATIṢṬHĀVIDHIḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 32*a* of the MS. described under No. 2854.

Complete.

Similar to the above.

**Beginning :**

देवप्रतिष्ठाविधिरुच्यते—

श्रावणे कार्त्तिके द्वन्द्वे माघे फाल्गुनसंज्ञके ।
वैशाखादिद्वये चैव प्रतिष्ठा फलदायिनी ॥
रुद्रादिपञ्चके मैत्रे रोहिण्यादिद्वये तथा ।
उत्तरात्रितये चैव वैष्णवीत्रितयेऽपि च ॥
प्रतिष्ठा सर्वदेवानां सुशुद्धा मनुनोदिता ।

* *

पूर्वेद्युः प्रातः स्नानसन्ध्यादिकं कर्म शीघ्रमेव निर्वर्त्य, ब्राह्मणैस्सह पुण्याहवाचनं कृत्वा, अस्मिन् कर्मणि त्वमाचार्यो भवेति सदाचारसंपन्नमागमैश्शुद्धकुलीनमेकं ब्राह्मणमाचार्यत्वेन वरयेत् ।

**End :**

ब्राह्मणेभ्यो यथाशक्ति दक्षिणां दत्वा आचार्याय विशेषतः, ब्राह्मणैस्सह भोजयेत् ॥

एवं यः कुरुते पूजां प्रतिष्ठितमतन्द्रितः ।
हरिं शिवं वा भोगांश्च भुक्त्वान्ते मुक्तिमाप्नुयात् ॥
शिवविष्णोः प्रतिष्ठाया एवमेव विधिः स्मृतः ।
तत्तत्प्रधानकैर्मन्त्रैः कुर्याच्छेषं समन्तयोः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5443. जपलक्षणम्.

## JAPALAKṢAṆAM.

Pages, 5. Lines, 20 on a page.

Begins on fol. 80*a* of the MS. described under No. 118.

Complete.

On the silent contemplation of Śiva.

**Beginning:**

अज्ञान . . . . . गुरवे नमः ॥

अनुज्ञां देहि मे देव नित्यनैमित्तिकादिषु ।

अप्राळयविद्याच्छिद्रं(?)ज्ञानाज्ञानकृतं प्रभो ॥

* * *

अस्मत्परापरगुरुपादुकाभ्यां नमः ।

शिवो महेश्वरश्चैव रुद्रो विष्णुः पितामहः ।

संसारवेद्यस्सर्वज्ञः परमात्मेति सार्थकम् ॥

* * *

प्राणायाममन्त्रस्य वामदेव ऋषिः, पङ्क्तिश्छन्दः, श्रीसाम्बसदाशिवो देवता । प्राणायामे विनियोगः ।

**End:**

ध्यानम्—

वामाङ्कन्यस्तवामेतरकरकमलायास्तथा वामबाहु-

न्यस्तारक्तोत्पलायास्स्तनविधृतलसद्वामबाहुः प्रियायाः ।

स्वल्पाकल्पाभिरामो धृतपरशुमृगाभीष्टदः काञ्चनाभो-

ध्येयः पद्मासनस्थस्मरललिततनुस्सम्पदे पार्वतीशः ॥

---

## No. 5444. जपलक्षणम्.

## JAPALAKṢAṆAM.

Pages, 5. Lines, 6 on a page.

Begins on fol. 86*b* of the MS. described under No. 119.

Complete.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5445. जपलक्षणम्.
## JAPALAKṢAṆAM.

Substance, palm-leaf. Size, 16⅜ × 1¼ inches. Pages, 4. Lines, 5 on a page. Character, Telugu Condition, slightly injured. Appearance, old.

Begins on fol. 12*a*. The other works herein are Vajrakavaca 1*a*, Dattātrēyadvādaśākṣarīmantra 6*a*, Śrīcakrapūjā 14*a*, Kalyāṇastava 31*a*, Stavarāja 33*a*, Vanadurgāstōtra 39*a*, Ratnābhiṣēkamantra 46*a*, Sambhōgamahādurgāmantra 47*b*, Dattātrēyasahasranāman 51*a*, Lakṣmīpūjāvidhāna 60*a*.

Incomplete.

Similar to the above.

By Dattātrēya.

**Beginning:**

मातृकाक्षरमालया मूलमन्त्रं जपेत् । तदुक्तम्—

अकारादि क्षकारान्तामक्षमालां विदुर्बुधाः ।
तया सदा जपेदिच्छन् मन्त्रसिद्धिं मनोजयम् ॥
पञ्चाशता प्रगुणिता यथा कुण्डलिनी भवेत् ।
तथा पञ्चाशद्वर्णात्मा व्यापिनी सा विवर्तते ॥

**End:**

नित्या त्रिगुणिता साथ पूजा चैव बहिस्तथेति ।

एवमन्तर्यागं कृत्वा ततः चक्षुरुन्मील्य मातृकावर्णमालया रुद्राक्षमालया वा नित्यं जपं कुर्यादिति ॥

---

## No. 5446. दधीचिसंहिता.
## DADHĪCISAṀHITĀ.

Pages, 128. Lines, 22 on a page.

Begins on fol. 36*a* of the MS. described under No. 3907.

Adhyāyas 2 to 30 complete.

On Śaivāgama, ascribed to Dadhīci.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

शैवानामपि सर्वेषां ये च स्थावरयाजिनः ।
तेऽपि पञ्चविधाः प्रोक्तास्तृणवृक्षलतादिषु ॥
पाषाणभूरुहद्वन्द्वे प्रोक्ताः पञ्चविधाः परे ।
ये चातः परमीशानि लोके स्युश्चरयाजिनः ॥

**End :**

चिराभ्यस्ततपस्तप्ततनवे मम वल्लभे ॥
तैरप्येतन्महद्गुप्तं महापाशुपताभिधम् ।
गोपितं सम्प्रदायेन मयैतत्ते निवेदितम् ॥
कुरुष्वैतन्महद्गुह्यं गोपितं योनिवत्तव ।
अतः परमहं किं ते वक्ष्ये त्वं वद सुन्दरि ॥

**Colophon :**

इति श्रीदधीचिसंहितायां मन्त्रकवचसङ्ख्यास्वरूपानिरूपणं नाम त्रिंशोऽध्यायः ॥

---

No. **5447.** दीक्षाप्रकरणम्.

DĪKṢĀPRAKARAṆAM.

**Pages**, 10. Lines, 18 on a page.

Begins on fol. 65*b* of the MS. described under No. 426.

Complete.

On certain initiatory ceremonies intended for the priests in Śaiva temples. Authorities are quoted to show that the food offered to Śiva may be accepted by the worshippers.

**Beginning :**

अत्रापि कूर्मपुराणे—

यश्श्राद्धकाले हरभक्तशेषं ददाति भक्त्या पितृदेवतानाम् ।
तेनैव पिण्डैश्च तिलैर्विमिश्रैराकल्पकोट्या पितरश्च तृप्ताः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति विनियुक्तविनियोगादिति निरस्तम् । ननु परमेश्वरप्रसादस्य चण्डद्रव्यं(व्यत्वं)चेन्न—वासिष्ठलैङ्गे—

बाणलिङ्गे चरे लोहे रत्नलिङ्गे स्वयं भुवि ।
प्रतिमासु च सर्वासु न चण्डाधिकृतो भवेत् ॥

**End:**

साक्षात्प्रसादभोगेन भक्तो यल्लभते य(शः) ।
तद्वक्तुं न हि मे शक्तिर्न गिरो प(न शुचिर्म)तिः ॥

**Colophon:**

ईशानसंहितायामुमामहेश्वरसंवादे दीक्षाप्रकरणे शिवनिर्माल्यस्वीकारविधिस्समाप्तः ॥

---

No 5448. देवीकालोत्तरम्.

DĒVĪKĀLŌTTARAM.

Substance, paper. Size, 8⅛ × 6½ inches. Pages, 10. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 96*a*. The other works herein are Sakalāgamasārasaṅgraha 1*a*, Siddhāntasūtravṛtti 101*a*.

Only the 65th Paṭala complete.

Deals with the Naiṣṭhika-Śaivas.

**Beginning:**

देव्युवाच—

. . . . . क्तथं मुक्तिमार्गस्य दर्शनम् ।
देवेश ज्ञानमाचारं कृपया कथयस्व मे ॥

ईश्वरः—

निर्ममे करुणोपेतः सर्वभूताभयप्रदः ।
भजेत्कालोत्तरं देवि मुमुक्षुर्योगतत्परः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स ब्रह्मा स शिवो विष्णु . . . . स षडाननः ।

*   *   *   *

येनोपायेन बध्येत वायुभिश्चलनं मनः ।

चित्ते चलति संसारो निश्चले मोक्ष एव तु ॥

**End :**

यज्ज्ञानाचरणं पृष्टं तत्सर्वं कथितं मया ।

कालज्ञानं वरारोहे किमन्यत्परिपृच्छति ॥

**Colophon :**

इति देवीकालोत्तरे चतुर्विंशतिसहस्रज्ञानकाण्डे नैष्ठिकानां ज्ञानाचारविचारे पञ्चषष्टि(तमः)पटलः ॥

दवीकालोत्तरं समाप्तम् ॥

---

No. **5449.** ध्वजस्थापनसङ्कल्पः.

DHVAJASTHĀPANASAṄKALPAḤ.

Substance, palm-leaf. Size, $15\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 2. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 28*a*. The other work herein is Śivapratiṣṭhātantra 1*a*.

Incomplete.

On the preliminary ceremony for fixing the flag-staff in temples.

**Beginning :**

अस्मिन् ग्रामे कृतवसतिब्राह्मणानां वेदवेदाङ्गादिसमस्तविद्यासमेतसंयताग्निहोत्रयागक्रियासत्क्रियायोगफलसिद्ध्यर्थम् . . . . . . . शिवधर्मपरायणानां शिवपूजाफलसिद्ध्यर्थम् ।

**End :**

अभ्युदयार्थं च महाजनैस्सह पुण्याहवाचनं करिष्ये । मया कृतेन श्रीमद्देवदेवजगत्कुटुम्बिनो महेश्वरस्य स्वरूपशिवस्य प्रतिष्ठोत्सवकर्म

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सिद्ध्यर्थं यजमानाभिवृद्ध्यर्थं ध्वजस्तम्भस्थापनं करिष्य इति सङ्कल्प्य-(ल्पः) ॥

## No. 5450. ध्वजारोहणभेरीताडनविषयः.

## DHVAJĀRŌHAṆABHĒRĪTĀḌANAVIṢAYAḤ.

Pages, 22. Lines, 7 on a page.

Begins on fol. 7*a* of the MS. described under No. 5429.

Complete.

On the sounding of drums after the temple flags are hoisted.

This manuscript is said to have been copied by Subbarāya, son of Agastīśvara-Gurukkaḷ of Vīraṇāmanallūr, on Tuesday the 23rd of Āvaṇi in the year Plava.

**Beginning:**

हेमभूधरशरासनात्मजं हेमरत्नविलसत्किरीटिनम् ।
हेमगर्भपुरनायकं सदा हेमविघ्नपतिमानतोस्तमी(स्म्य)हम् ॥

* * * *

स्वकटतटगलितासितदानपानोन्मत्तमधुकरकुलकोलाहलगीताकर्णनानिश्चलकर्णतालो गणपतिरविघ्नं करोतु ।

भेरी मध्ये दक्षिणे वामभामे शम्भुर्विष्णुः पद्मजः तत्र देवाः ।
कीला सव्ये(?) मातरश्शर्मे नागाः प्रत्येयुर्मे चन्द्रसूर्यौ च देवौ ॥

व्योमक्षितिस्वर्गतलस्थितानां हिताय पातालनिवासिनाञ्च ।
प्रशान्तिहेतोस्सुरविद्विषाञ्च भेरीमहं सम्प्रति ताडयामि ॥

**End:**

अभयहस्तासिंहबन्धः जटामकुटमण्डितनागाभरणभूषितकिङ्किणिमालया (वा)माङ्घ्रिम् उग्रसिंहासनवामके द्वारपालान् करोतु ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5451. पञ्चविंशतिलीलाविग्रहविवरणम्—कर्णाटकटीकासहितम्.
## PAÑCAVIṀŚATILĪLĀVIGRAHAVIVARAṆAM WITH KANARESE COMMENTARY.

Pages, 14. Lines, 7 on a page.

Begins on fol. 56*a* of the MS. described under No. 5415.

Complete.

Enumerates 25 varieties of images representing Śiva.

**Beginning:**

स(श)र्वश्शिवो महेशानो नीलकण्ठो वृषध्वजः ।
ईशानश्शङ्करो भीमः पिनाकी चन्द्रशेखरः ॥
कपर्दी च विरूपाक्षो वामदेवो मृडस्तथा ।
भूनेशश्शूलिसर्वज्ञः स्थाणुर्वै पार्वतीप्रियः ॥
महाकालो महादीर्घो महाताण्डवरूपकः ।
गङ्गाधरो गणेशश्च जगद्धंसी इति स्मृतः ॥

**End:**

दक्षिणामूर्तिरूपं तु चतुर्विंशदिति स्मृतम् ।
लिङ्गोद्भवस्य रूपं च पञ्चविंशत्प्रकीर्तिताः ॥

---

## No. 5452. पञ्चाक्षरीकल्पः.
## PAÑCĀKṢARĪKALPAḤ.

Substance, palm-leaf. Size, 13¾ × 1⅝ inches. Pages, 46. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete in 13 Adhyāyas.

Begins on fol. 78*a*. The other works herein are Sāmavēdagānalakṣaṇa 1*a*, Subhagōdayadarpaṇa 12*a*, Śivakavaca 75*a*, Tripurasundarīstōtra 101*a*, Vaśyavārāhīstōtra 102*a*, Śūlinīdurgāmantra 103*a*, Dēvīmāhātmyarahasyavidhi 104*a*, Navarātrīvratakalpa 125*a*, Śabdasaṅgraha 146*a*, Yantrapūjākrama 149*a*, Dīkṣākrama 151*a*.

A treatise on the Pañcākṣara—Namaśśivāya.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5453. परमेश्वरपूजा.

## PARAMĒŚVARAPŪJĀ.

Substance, palm-leaf. Size, $16\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 10. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Ṣaṭcakra-prakāra (Telugu) 6*a*, Makuṭāgama 9*a*.

Complete.

On the worship of Śiva.

**Beginning:**

हस्तीन्द्राननमिन्दुचूडमरुणच्छायं त्रिनेत्रं स(ह)ठा-
दाश्लिष्टं प्रियया सपद्मकरया स्वाङ्कस्थया सन्ततम् ।

बीजापूरगदाधनुर्विशिखयुक्चक्राब्जपाशोत्पल-
व्रीह्यग्रस्वविषाणरत्नकलशं हस्तैर्वहन्तं भजे ॥

तत्पीठमध्ये बालापार्वतीरा(पर)मेश्वराभ्यां नमः—ध्यायेत् ।

वन्दे हरं वरदशूलकपालहस्तं साभीतिमद्रिसुतयोज्ज्वलदेहकान्तिम् ।
वामोरुपीठगतया निजवामहस्तन्यस्तारुणोत्पलयुजा परिरब्धदेहम् ॥

बालापार्वतीरा(पर)मेश्वरं ध्यायामि नमः ।

भगनेत्रभृतव्यक्तसहस्राक्षस्सहस्रपात् ।
अपवर्गप्रदानन्ततारकः परमेश्वरः ॥

**End:**

(हं क्षं द्व्यक्षरसंयुतं द्विदलकं रत्नाभमाज्ञापरं)
तस्मादूर्ध्वमधोमुखं विलसितं पत्रं सहस्राक्षरम् ।

एतद्यो हृदये प्रपश्यति सदा नैर्गुण्यमन्त्रं स्थितं
नादं निश्चलमादिमध्यसहितं श्रुत्वा स मुक्तो भवेत् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5454. पादतीर्थमाहात्म्यम्.

## PĀDATĪRTHAMĀHĀTMYAM.

**Page, 1.** Lines, 7 on a page.

Begins on fol. 24*a* of the MS. described under No. 764.

Complete.

On the holiness of the water that has been used in washing the feet of the Jaṅgama-gurus of the Liṅgāyatas.

**Beginning:**

स्वपादतीर्थभूतं च स्वलिङ्गस्य समर्पणम् ।
स्वहस्ते स्य च(न्यस्य)देवानां दत्तं भक्त्या सुभावितम् ॥

जङ्गमं च द्विपादं च प्रक्षाल्यं चरपादुकम् ।
एकपादं न कर्तव्यं द्विपादं तूत्तमं तथा ॥

**End:**

तोयं चरणमिश्रं च चरणं मन्त्रमिश्रया(कम्) ।
मन्त्रस्तु भस्म[तु]मिश्रश्च भस्म पादं च मिश्रकम् ॥

हस्तस्पर्शं महाश्रेष्ठं भक्षाणां पाकशुद्धये ।
हस्तस्पर्शयविश्वासं(विहीनं चेत्) पाकं गोमांसभक्षये(व)त् ॥

---

## No. 5455. पार्थिवलिङ्गपूजाविधिः.

## PĀRTHIVALIṄGAPŪJĀVIDHIḤ

Pages, 5. Lines, 5 on a page.

Begins on fol. 13*a* of the MS. described under No. 140.

Complete.

On how to worship the Liṅgas made of earth.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

पार्थिवलिङ्गपूजाविधिरुच्यते । तस्यायं क्रमः—

सर्वाङ्गं भस्मनोद्धूलय्य, प्रत्यङ्गं रुद्राक्षाणि धृत्वा सदाशिवं मनसा स्मरन् उदीचीं गत्वा, भूमिर्भूम्नेति भूमिं सम्प्रार्थ्य, शुचौ देशे बद्धा. ञ्जलया मृदमादाय, . . . . . . . . . . .

रुद्रसूक्तं जपन् यथोक्तलिङ्गं विधाय, वामपाणौ वेदिकायां ताम्रपात्रे वा साक्षतलिङ्गं संस्थाप्य ।

**End:**

आवाहनं न जानामि न जानामि विसर्जनम् ।
पूजां चैव न जानामि क्षमस्व परमेश्वर ॥

इति स्तुत्वा जलं दृष्ट्वा जले वा स्थले वा विसृजेत् ॥

**Colophon:**

एवं पार्थिवलिङ्गपूजाविधानं संपूर्णम् ॥

---

No. **5456.** पार्थिवलिङ्गपूजाविधिः.

PĀRTHIVALIṄGAPŪJĀVIDHIḤ

Pages, 21. Lines, 7 on a page.

Begins on fol. 26*a* of the MS. described under No. 18.

Complete.

Authoritative quotations bearing upon the worship of Liṅgas made of earth.

**Beginning:**

सूतः—

शृणुध्वमृषयस्सर्वे लिङ्गव्रतमनुत्तमम् ।
कदाचित् . . . . मं हरं ययौ ॥
तत्रासीनं महादेवं पार्वतीरमणं प्रभुम् ।
* * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रुद्राक्षमालाभरणो भक्त्या परमया युतः ।
भक्तिभावसमायुक्तो लिङ्गपूजां समाचरेत् ॥
लिङ्गानामयुतं कृत्वा महाज्वरभयं हरेत् ।
सहस्रमेकं लिङ्गानां रोगादीनां भयं हरेत् ॥

**End:**

संज्ञापनं व्रतं कृत्वा प्राप्नुयात् परमं फलम् ।
शिवलोकं पुनः प्राप्य तस्मै भूत्यो(तिः) भवेद्ध्रुवम् ॥

**Colophon:**

इति लिङ्गवासिष्ठप्रोक्तपार्थिवलिङ्गपूजाविधानं सम्पूर्णम् ॥

---

No. **5457.** पार्थिवलिङ्गपूजाविधिः.
PĀRTHIVALIṄGAPŪJĀVIDHIḤ.

**Pages**, 2. Lines, 6 on a page.

Begins on fol. 39*a* of the MS. described under No. 115.

Complete.

Same work as the above.

---

No. **5458.** पार्थिवेश्वरचिन्तामणिपूजाविधिः.
PĀRTHIVĒŚVARACINTĀMAṆIPŪJĀVIDHIḤ.

**Pages**, 3. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 2902.

Complete

Similar to the above.

**Beginning:**

शुक्लाम्बरधरं . . . . सर्वविघ्नोपशान्तये ॥

* * * *

कर्पूरगौरं करुणावतारं संसारपारं भुजगेन्द्रहारम् ।
सदाप्रसन्नं हृदयारविन्दे भवं भवानीसहितं भजामि ॥
वन्दे महेशं सुरसिद्धसेवितं कल्पद्रुमैः पूजितपादपल्लवम् ।
विद्याप्रदं भक्तजनैकसेवितं ध्यायेत्सदा कामदुघं प्रसन्नम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

अनेनैव मन्त्रेण नित्यमेकादशाहुतीर्जुहुयात् ॥
एवमर्चयतः पुंसः पार्थिवं लिङ्गमुत्तमम् ।
माससमात्रेण सिद्धिः स्यान्नात्र कार्या विचारणा ॥

**Colophon:**

इति रुद्रयामळे पार्थिवपूजाविधिः ॥

---

No. **5459.** पौष्करागमः.

PAUṢKARĀGAMAḤ.

Substance, paper. Size, $12\frac{3}{4} \times 8\frac{1}{2}$ inches. Pages, 83. Lines, 23 on a page. Character, Telugu. Condition, not good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Sarvajñānōttara 43*a*, Mātaṅgaparamēśvara 105*a*.

Paṭalas 1 to 8 complete.

A Śaivāgama work.

**Beginning:**

ऋषय ऊचुः—

भगवन् देवदेवेश ब्रह्मविष्ण्विन्द्रनायक ।
आपिङ्गलजटाचूडारोपितार्धेन्दुशेखर ॥

* * * *

क्रियाचर्ये प्रसादेन तवास्माभिः श्रुते पुरा ।
अधुना ज्ञानपादं तु श्रोतुमिच्छा गरीयसी ॥

* * * *

ईश्वरः—

ज्ञायन्ते येन पत्याद्याः पदार्थाष्षड्द्विजोत्तमाः ।
तज्ज्ञानपादमित्युक्तं साधनं देशिकात्मनाम् ॥

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इति पौष्करे ज्ञानपादे पतिपदार्थनिर्णयः प्रथमः पटलः ॥

**End:**

प्रत्येयप्रत्ययाख्यास्तु सम्बन्धोऽन्तरपूर्वकम् ॥
योजकस्स्मर्यते यत्र ततो बुद्ध्यै(व)योजितः ।
न योजको भवेच्छब्दः पुरुषस्तत्र योजकः ॥
यो वर्णकेन चित्ख्यातस्तस्मिन्नर्थो न वाचकः ।
तावदर्थं न गृह्णाति परसङ्केतवर्जितः ॥
सङ्केतास्तत्र मन्त्राणां तेनैव परिकीर्तिताः ।
बहवस्तेन संसिद्धाः शास्त्रे वै कामिकादिके ॥

**Colophon:**

इति पौष्करे ज्ञानपादे अष्टमः पटलः ॥

पौष्करज्ञानपादमूलं समाप्तम् ॥

---

## No. 5460. पौष्करागमः.

## PAUṢKARĀGAMAḤ.

Substance, palm-leaf (Śrītāla). Size, 22 × 2¾ inches. Pages, 30. Lines, 9 on a page. Character, Kanarese. Condition, good. Appearance, old.

Begins on fol. 43*a*. The other work herein is Vātūlatantra 1*a*.
Paṭalas 1 to 8 complete
Same work as the above.

---

## No. 5461. ब्रह्मादितालविधानम्.

## BRAHMĀDITĀLAVIDHĀNAM.

Pages, 20. Lines, 7 on a page.

Begins on fol. 19*a* of the MS. described under No. 5429.
Complete.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Deals with the sounding of drums for the purpose of inviting the Dēvas to be present during the great religious festivals in Śiva temples.

**Beginning:**

श्रीमत्सुरासुरमुनीश्वरसिद्धविद्याधरयक्षराक्षसगरुडगन्धर्वकिन्नरकिंपुरुष-सिद्धविद्याधरभूतवेतालादिभिः . . . . . . शङ्करसेनाधिपति-चण्डेश्वरस्य समादेशात् मृदङ्गवीणावेणुभ(प)णम(व)तालकाहलभेरीमद्दल-मुरवझल्लरीशङ्खकाहलपटहाद्यैरहमिह भेरीसङ्घोषणं करोमि ।

**End:**

सद्योजातं वाममघोरं तत्पुरुषमीशानं वेदान्तमीशानं वर्णपञ्चकारी-तालं निर्झरीतालं नृत्तं भ्रमरीरागं शङ्कराभरणं वाद्यं कुम्भवाद्यमिति शङ्करं (र)करोमि ईशानं विज्ञाप्य ।

---

No. **5462.** भूतशुद्धिः.

BHŪTAŚUDDHIḤ.

Substance, palm-leaf. Size, $11\frac{5}{8} \times 1\frac{1}{8}$ inches. Pages, 6. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Pañcagavyavidhi 4*a*, Śivapūjāvidhi 6*a*

Complete.

On self-purification preliminary to the performance of Pūjā.

**Beginning:**

पादादिजानुपर्यन्तं पीताभं चतुरश्रकम् ।
अष्टदिग्वज्रचिह्नं च लंबीजं गुणपञ्चकम् ॥

ओं ह्लाम् ५ निवृत्तिकलात्मने पृथिवीतत्त्वाधिपतये सद्योजाताय ब्रह्मणे हृदयाय नमः—इति पृथिवीतत्त्वं शोधयामि ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

इति प्राणमन्त्रेण हृदये प्राणशक्तिं सम्भाव्य स्वदेहं दिव्यदेहं विभावयेत् ॥

हृदयकमलमध्ये दीपवद्वेदसारं प्रणवमयमनर्घ्यं योगिभिर्ध्यानगम्यम् ।
हरिगुरुशिवयोगं सर्वभूतस्थमेकं सकृदपि मनसा यद्ध्यायते यस्स मुक्तः ॥

---

## No. 5463. भूतशुद्धिः.
## BHŪTAŚUDDHIḤ.

Pages, 3. Lines, 9 on a page.

Begins on fol. 182*b* of the MS. described under No. 124.

Complete.

Same work as the above.

---

## No. 5464. मकुटागमः.
## MAKUṬĀGAMAḤ.

Pages, 37. Lines, 5 on a page.

Begins on fol. 9*a* of the MS. described under No. 5453.

Incomplete.

A Śaivāgama work.

**Beginning:**

देवपूजाजपाद्यैश्च सह सन्ध्यादिवन्दने ।
ब्रह्मण्यः कर्मरूपेतः अन्नपानादि भोजयेत् ॥
श्रुतशास्त्रागमः केलिवनलीला[स]सुखैस्संह ।
विनोदिनाट्यसंलास्यगीतवाद्यविनोदवान् ॥

**End:**

त्रयं च मातृसम्बद्धं रक्तं मांसं च मेदसा ॥
त्रयं च पितृसम्बद्धमस्थि चर्म च शुक्लगम् ।
चैतन्यवायुरग्निश्च त्रयसम्बन्ध ईश्वरात् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. **5465.** महान्यासः.

MAHĀNYĀSAḤ.

**Pages,** 13. Lines, 20 on a page.

Begins on fol. 65*b* of the MS. described under No. 3907.

Complete.

For extracts, see under number 3751.

On certain details connected with the performance of **Rudrajapa** and Hōma.

---

No. **5466.** महान्यासः.

MAHĀNYĀSAḤ.

**Pages,** 60. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 5207.

Incomplete.

Same work as the above.

---

No. **5467.** महान्यासः.

MAHĀNYĀSAḤ.

**Pages,** 8. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 124

Incomplete.

Same work as the above.

---

No. **5468.** मातङ्गपारमेश्वरम्.

MĀTAṄGAPĀRAMĒŚVARAM.

**Pages,** 92. Lines, 21 on a page.

Begins on fol. 10 *a* of the MS described under No. 5459

Breaks off in the 18th Paṭala

A Śaivāgama work.

**Beginning:**

गजाननाय महसे प्रत्यूहतिमिरच्छिदे ।
अपारकरुणापूरतरङ्गितदृशे नमः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हिमवत्यचले रम्ये सिद्धचारणसेविते ।
नानाश्चर्यगुणोपेतं शिखरं चारुनिर्मलम् ॥

* * * *

ऽयम्बकस्याग्रतो भूत्वा प्रहृष्टेनान्तरात्मना ।
मुनिर्वादितवान् वेणुं भक्त्या परमया भृशम् ॥
ततस्स भगवान् नाथः पार्वत्या सहितो हरः ॥
स्वं वपुर्दर्शयामास मतङ्गाय तपस्विने ॥

* * * *

दृष्टे त्वयि जगन्नाथ लोकानुग्रहकारणात् ।
विविधार्थप्रदं श्रीमत् वस्तुरत्नसुचर्चितम् ॥
ज्ञानमज्ञानहर्तारं सुखं बोध्यमनाकुलम् ।
विपुलार्थमसन्दिग्धं समासोक्त्या ब्रवीहि मे ॥

* * * *

भाषितं लक्षमात्रेण तदेवाहं तवाधुना ।
उपसंहृत्य सङ्क्षेपाद्वक्ष्ये वै पारमेश्वरम् ॥

* * * *

**Colophon:**

इति मातङ्गे पारमेश्वरे महातन्त्रे विद्यापादे उपोद्घातः प्रथमः पटलः ॥

**End:**

बुद्ध्या गौणी प्रवृत्ता त्रिगुणगणमयोद्धारभारं वहन्ती
वीर्येणात्युल्बणैषा जगदिदमखिलं भावयत्यात्मकृत्या ।
सेयं साक्षेपयुक्त्या विवृतगुणगणाकीर्णसंपद्धिकाल(रः)
कारो(लो)नाम्ना परोऽयं स्वविभवविभवानुक्रमेणैव वाच्यः ॥

**Colophon:**

इति मतङ्गपारमेश्वरे विद्यापादे बुद्धितत्त्वपटलस्सप्तदशः ॥
अहङ्कारपटलः ।

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ये गन्तव्यं हि तृतीयं स्यादुत्स्रष्टव्यमतः परम् ।
तथानन्दयितव्यं स्यात्पश्चमेयं क्रियामये ॥
यासौ ज्ञानक्रिया शाक्ता भोक्तुस्सोन्मीलिता सती. ।
लक्ष्यते मुनिशार्दूल वृत्तैरेभिस्सकेस्सनैः(?) ॥

---

No. 5469. मृगेन्द्रागमः—(उत्तरभागः).

MṚGĒNDRĀGAMAḤ : (LATTER PART).

Substance, palm-leaf. Size, $12\frac{7}{8} \times 2\frac{1}{8}$ inches. Pages, 28. Lines, 11 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Incomplete.

An Āgama treatise on Śaivism.

**Beginning :**

. . . . . . तस्याश्विविषया भवेत् ।
इति बाह्ये स्थिते सर्वमाकलनचक्षुषा ॥
हेयान् पदार्थान् संत्यज्य शिवतत्त्वं समभ्यसेत् ।
शिवगर्भान् समातिष्ठन् प्राणायामादिकानपि ॥

* * *

**Colophon :**

इति श्रीमृगेन्द्रोत्तरे योगविधिपटलः ॥
अथातो देशिकादीनां सामान्याचारसङ्ग्रहः ।
पर(वि)श्वासवस(तः) प्राप्तः समासेनोपदिश्यते ॥

**End :**

तदे—

ज्ञानश्चैतत्परं पुण्यं यदि पृष्टं जगत्त्रये ।
श्रोतुं मृगेन्द्ररूपत्वात् मृगेन्द्रमिति सूरिभिः ॥
तदेतदुपसंहृत्य त्रैलोक्यगुरुणोदितम् ।
ऋषिभ्योना(ऽन)न्तरोक्तेभ्यः सूत्रैस्तैरेव वोमया ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निशम्य हारीतवचस्तदद्भुतं तपोधना नैमिशिका वनौकसः ।
ववन्दिरे पापहरं हरं मुदा प्रणम्य सद्गीर्भिरमोघसिद्धिदम् ॥

---

## No. 5470. मृगेन्द्रागमवृत्तिः.
## MṚGĒNDRĀGAMAVṚTTIḤ

Substance, palm-leaf. Size, $15\frac{7}{8} \times 1\frac{1}{8}$ inches. Pages, 480. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Vidyāpāda, Kriyāpāda and Yōgapāda complete; Caryāpāda incomplete.

A commentary on the Mṛgēndrāgama: by Bhaṭṭanārāyaṇakaṇṭha, son of Bhaṭṭavidyākaṇṭha.

**Beginning:**

चन्द्रार्धचूडचरणाब्जयुगं प्रणम्य वागीश्वरीं गणपतिं क्रमशो गुरूंश्च ।
लेशाद्यथामति गमयुनन्दू(सतां हृदये निगू)ढं श्रीमन्मृगेन्द्रमथहानमहं(पद-
[वृत्तिमहं करोमि) ॥

श्रीमत्स्वबोधविभवप्रथनाय तावत् गर्जन्त्यलं न किल यत्र कृतोपयोगि ।
अन्ये पुनः पटुधियो न विवेचयन्ति स्पष्टार्थमेतदिति तत्तदुपेक्षमाणाः ॥
संक्षेपतः प्रकृतवस्तुपरिस्फुटं ये व्या(चक्षते पद)पदार्थसमन्वयेन ।
प्रायः कुशाग्रमतिभिस्त इहाद्रियन्ते व्याख्याकृतो विफलविस्तरभीरुभिश्च ॥

साक्षाच्छ्रीकण्ठनाथादिमबुधसुजनानुग्रहा . . . नान्
ज्ञात्वा श्रीरामकण्ठाच्छिवनुतकमलोन्मीलनप्रौढभास्वान् ।
श्रीविद्याकण्ठभट्टस्तदिदमुपदिशन्नादिदेशैकदा मां
स्पष्टार्थामत्र लक्ष्मीं (विरचय) विवृतिं वत्स (सर्वस्य) योग्याम् ॥
उपर्युपर्येव कृतानि कैश्चिन्मता . . . हि निबन्धनानि ।
नोद्भिन्नमुद्रं त्विदमव्ययाय तस्माद्गुरुर्मामिदमन्वशात्सः ॥
तेनाहमस्यां विवृतौ प्रवृत्तो नोल्लङ्घनीया हि गुरोरनुज्ञा ।
यदृच्छया कोऽतिगभीरशब्दं मृगेन्द्रमाक्षेप्तुमिमं व्यवस्येत् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किमपि यदिह नोक्तं यच्च किञ्चिद्दुरुक्तं
कथितमपि मया यत्स्फुटं नावभाति ।
दिनकृत इव दोषापह्नवैकप्रवृत्ताः
तदपि विबुधमुख्याः स्पष्टयन्तु(न्तः) क्षमन्ताम् ॥

अतः परं प्रवर्तन्तां वृत्तयोऽप्युत्तरोत्तराः ।
प्राग्ज्वालितात्प्रता(दी)पाद्धि सुकरा दिन(दीप)सन्ततिः ॥

अथानादिमलोपेत इत्यादिकं तन्त्रं यत्पुनः परमेशं नमस्कृत्ये(त्ये)-तदुपोद्घातप्रकरणं तत्सर्वे . . . . . . . . . . . . . . स्वगुरूक्तिवचनं कुर्वन् स्वशिष्यानिदमवदत् ॥

परमेशं नमस्कृत्य भारद्वाजमृषिं ततः ।
रूपादिचन्द्र . . . क्रमाज्ज्ञानं शृणु . . ॥

* * * *

**Colophon:**

इति भट्टविद्याकण्ठात्मजभट्टनारायणकण्ठविरचितायां मृगेन्द्रटीकायां उपोद्घातप्रकरणं प्रथमम् ॥

**End:**

इति भट्टविद्याकण्ठात्मजभट्टनारायणकण्ठविरचितायां श्रीमन्मृगेन्द्रवृत्तौ योगपादप्रकरणम् ॥

सङ्क्षिप्तोक्तिः स्फुरति रचिता स्फारयन्ती प्रमेयं
पौर्वापर्यक्रमविमर्शनात्पौनरुक्त्यं न किञ्चित् ।
दुर्वारं तं(तत्)क्षपयति तमो यत्प्रसादस्तमीशः(शं)
चर्यापादे विवृतिरचनां कुर्महे सम्प्रणम्य ॥

* * * *

द्वादशाहान्निराहारः पराक इति संस्मृतः । इति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथा —

त्र्यहमुष्णं पिबेद्वारि त्र्यहं क्षीरं तथा पिबेत् ।
त्र्यहमुष्णं घृतं पीत्वा त्र्यहं वै केवलं ततः ॥

---

## No. 5471. रुद्राक्षधारणम्.

## RUDRĀKṢADHĀRAṆAM.

Pages, 2. Lines, 21 on a page.

Begins on fol. 79*b* of the MS. described under No. 118.

Complete.

Deals with the religious meaning and manner of wearing the Rudrākṣa beads.

**Beginning:**

ओं सदाशिव इत्येकं शिरोयं(खायाम्) । वह्निसूर्यसोमादि(मूर्त)य (इति) त्रितिन्(त्रीणि) शिरसि । ओं षट्त्रिंशत्तत्त्वात्मकाय परमेश्वराय नम इति षट्त्रिंशन्मूर्धनि ।

**End:**

ओं शतरुद्रवेदभास्वरात्मकाय विश्वेश्वराय नम इति शतमुपनिवि-(वी)तस्थाने यदि(इति)रुद्राक्षधारणं कृत्वा(कुर्यात्) ।

---

## No. 5472. रुद्राक्षधारणम्.

## RUDRĀKṢADHĀRAṆAM.

Page, 1. Lines, 6 on a page.

Begins on fol. 86*a* of the MS. described under No. 119.

Complete.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5473. लिङ्गधारणदीपिका.

## LIṄGADHĀRAṆADĪPIKĀ.

Substance, paper. Size, 8 × 6¼ inches. Pages, 181. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a* The other works herein are Siddhasiddhāntapaddhati 97*a*, Śivaprasādacintāmaṇi (with Telugu commentary) 145*a*.

Incomplete.

A dissertation on whether the wearing of the Liṅga by a Liṅgāyata is obligatory or optional.

**Beginning:**

वागीशाद्यास्सुमनसः . . तं नमामि गजाननम् ॥
शरणं तरुणेन्दुशेखरश्शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ॥

* * * *

इह खलु अनेकभवसञ्चितसुकृतविशेषशोधितान्तःकरणदर्पणः शिववाक्यप्रामाण्यैकशरणः अन्तर्ज्योतिर्लिङ्गधारणमात्रपरितुष्टबहिर्लिङ्गधारणेऽप्येककारण(ा): . . . लिङ्गधारिणो दृश्यन्ते । तत्रेदं विचिन्त्यते—

किं लिङ्गधारणं नित्यं वा उतानित्यं वा? नाद्यः—अकरणे प्रत्यवायाश्रवणात् ।

**End:**

देवमनुष्यादिरूपं सर्वं जगदग्रे सृष्टादावजानामज्ञातं सर्वं तदुत्स्वममित्याशीः . . . . शिवपुराणे—

अनेनैव तु देहेन रुद्रस्सन्तिष्ठते क्षितौ ।
स्वयम्भूर्यत्र वा लिङ्गं यत्र वा शिवयोगिनः ॥
तत्र योजनपर्यन्तं वाराणस्यास्समन्ततः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5474. लिङ्गधारणलक्षणम्.

## LIṄGADHĀRAṆALAKṢAṆAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 23*b* of the MS. described under No. 764.

Incomplete.

Enjoins the wearing of the Liṅga by a Liṅgāyata after performing a purificatory initial ceremony.

**Beginning :**

ब्राह्मणे त्रीणि वर्षाणि षड्वर्षं क्षत्रिये तथा ।
वैश्ये (तु) नव वर्षाणि शूद्रे द्वादशवर्षयोः(?) ॥
शक्तिदीक्षास्वदीक्षं च प्रेतदीक्षं च दीक्षितम् ।
त्रिविधं दीक्षकं नास्ति पुनर्दीक्षं तु पार्वति ॥
सन्यासी च जडी मुण्डो योगी पशुपतिर्मतः ।
प्रमादौ(दा)दृह्यते लिङ्गं पुनर्दीक्षा भविष्यति ॥

**End :**

आमं शूद्रश्च शूद्रान्नं पक्कमुच्छिष्टभोजनम् ।
नवोदकं दधिसंयुक्तं शूद्रतक्रं सुरासमम् ॥
दशसूना(स)मश्चक्री दशचक्रिसमो द्विजः ।
दशद्विजसमा वेश्या दशवेश्यासमो नृपः ॥

---

## No. 5475. लिङ्गपूजाविधानम्.

## LIṄGAPŪJĀVIDHĀNAM.

Pages, 38. Lines, 5 on a page.

Begins on fol. 51*a* of the MS. described under No. 3375.

Complete.

On the processes relating to the worship of Śivaliṅgas.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

होमावसाने कृततूर्यनादे गुरुर्गृहीत्वा बलिपुष्पदीपम् ।
समर्चयेल्लोकपतीन् क्रमेण मन्त्रैरमीभिर्यजमानयुक्तः ॥
आगच्छन्तु सुरास्सर्वे भवपूजाभिलाषित(णः) ।
ज्योतिश्चख(क्र)गता ये च तथैव भुवनाधिपाः ॥

* * * *

ओं लां ओं नम इन्द्रमूर्ते पीतवर्ण गजारूढ वज्रहस्त शचीसमेत देवाधिप अत्रागच्छ इमौ बलिदीपौ गृहीत्वा.

**End:**

नमो भवाय सर्वाय नमस्ते कर्मरूपिणे ।
इति स्तुत्वा शिवं लिङ्गं प्रत्यवायं विसर्जयेत् ॥
हरो महेश्वरश्शम्भुस्त्रिशूलः पाणिपीडधृक् ।
शिवः पशुपतिश्चैव महादेव विसर्जयेत् ॥

**Colophon:**

इति श्रीलिङ्गपुराणे ईश्वरकुमारसंवादे पार्थिवलिङ्गपूजाविधानं सम्पूर्णम् ॥

---

## No. 5476. लिङ्गपूजाविधानम्.
## LIṄGAPŪJĀVIDHĀNAM.

Substance, palm-leaf. Size, 16½ × 1⅛ inches. Pages, 30. Lines, 5 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a* The other work herein is Ātmaguruliṅgāṣṭaviṁśōttaraśatasahasranāmāvalī 16*a*.

Complete.

On the conduct of the worship of Śivaliṅgas: by Cidānandakēśavāvadhūta.

**Beginning:**

श्रीनाथादिगुरुत्रयं गणपतिं पीठत्रयं भैरवं
सिद्धौघं वटुकत्रयं पदयुगं दूतीक्रमं मण्डलम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वीराद्यष्टचतुष्कषष्टिनवकं वीरावलीपञ्चकं
श्रीमन्मालिनिमन्त्रराजसहितं वन्दे गुरोर्मण्डलम् ॥

* * * *

अखण्डानन्दरोलम्बझङ्कारप्रतिमानकम् ।
अनाहतस्य यच्छब्दं घण्टानादं प्रकल्पयेत् ॥

आगमार्थं तु देवानामिति घण्टानादं कृत्वा—

देहो देवालयः प्रोक्तो जीवो देवस्सनातनः ।
त्यजेदज्ञाननिर्माल्यं सोऽहम्भावेन पूजयेत् ॥

आत्मा त्वमित्यष्टपुष्पार्चनम् ।

**End:**

प्रदक्षिणनमस्कारान् समर्पयामि । अथ प्रार्थना—

बोधात्मं बुधरञ्जनं भवहरं भूम्यादिकल्पप्रदं
बुद्धं भ्रूयुगमध्यसूक्ष्मममलं भूतादिसंवेष्टितम् ।
सर्वात्मं सगुणं समानरहितं सिद्धिप्रदं श्रीकरं
वन्दे श्रीशिवराययोगिमवधूतेशं परं निर्गुणम् ॥

* * * *

यथा भक्तिस्तथा भक्तिर्यथा पूजा तथा फलम् ।
यथार्थमिति सर्वेषां कार्याणां च न संशयः ॥

**Colophon:**

इति श्रीकेशवावधूतगुरुकरकमलसञ्जातगञ्जिततच्चरणकमलसमाराधित-निरन्तरज्ञानयोगामृतस्वानुभवानन्दाविख्यातश्रीचिदानन्दकेशवावधूतविरचि-तमात्मगुरुलिङ्गाष्टाविंशोत्तरशतसहस्रनामपूजासहितषोडशोपचारपूजाविधानं संपूर्णम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5477. वातूलतन्त्रम्.
## VĀTŪLATANTRAM.

Substance, paper. Size, 12⅜ × 8⅝ inches. Pages, 66. Lines, 21 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 367*b*. The other works herein are Śyāmārcanātaraṅgiṇī 1*a*, Kāmakalāvilāsa 98*a* and 122*a*, Kulārṇava 135*a*, Śrīvidyāvilāsa 169*a*, Mantramālikā (Ākāśabhairavakalpa) 273*a*.

A Śaivāgama work.

Contains the following Paṭalas:—

१. तत्त्वभेदपटलः.
२. वर्णभेदपटलः.
३. चक्रभेदपटलः.
४. वर्गभेदपटलः.
५. तन्त्रभेदपटलः.
६. प्रणवभेदपटलः.
७. ब्रह्मभेदपटलः.
८. अङ्गभेदपटलः.
९. मन्त्रजातपटलः.
१०. मन्त्रकीलपटलः.

**Beginning:**

वन्दे शङ्करमासमाद्यममलं तेजोनिधिं शाश्वतं
बिन्दुक्षोभकरं परात्परतरं नादात्मकं बीजिनम् ।
सर्वान्तस्थमनेकलोकजनकं सोमं जगत्प्रेरकं
लिङ्गस्थं बहुमन्त्रमन्त्रितमहालैङ्ग्यालयाख्यं ध्रुवम् ॥
कैलासशिखरे रम्ये नानारत्नोपशोभिते ।
नानाद्रुमलताकीर्णे नानापुष्पोपशोभिते ॥
तत्र सिंहासनासीनं श्रीकण्ठं त्रिदशेश्वरम् ।
प्रणम्य चरणौ तस्य स्कन्दो वचनमब्रवीत् ॥
देवदेव जगन्नाथ सर्वज्ञ त्रिपुरान्तक ।
स्थित्युत्पत्तिलयेशान प्रणतार्तिहर प्रभो ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वलोकहितार्थाय योगिनां लक्षणाय च ।
मन्त्रतन्त्रक्रियारूपं त्वया प्रोक्तन्तु विस्तरात् ॥
पुंसामनुग्रहार्थाय ज्ञानिनां मुक्तिकारणम् ।
शिवज्ञानं परं गुह्यं संक्षेपाद्वद मे प्रभो ॥

ईश्वरः—

अथातस्संप्रवक्ष्यामि यत्त्वया परिचोदितम् ।
तत्सर्वं हि समासेन श्रूयतामपि षण्मुख ॥
साधकानां हितार्थाय भुक्तिमुक्तिप्रदायकम् ।
वातूलाख्ये महातन्त्रे दध्नो घृतमिवोद्धृतम् ॥

**End:**

शुद्धो भवति लोके तु प्रायश्चित्तविधानतः ।
व्रतस्य तु क्रियालोपे नियमस्य विलोपने ॥
गायत्र्यष्टशतेनैव विशुद्धिमधिगच्छति ।
सामान्यं मिश्रकञ्चैव शुद्धं वीरं चतुर्विधम् ॥
तत्सर्वं हि समासेन तव प्रोक्तं षडानन ।
तत्त्वादिकीलकान्तानां पटलानां दश क्रमात् ॥
शैवशुद्धाख्यतन्त्रस्य कथितास्तव सुव्रत ।

**Colophon:**

इति श्रीवातूलतन्त्रे शुद्धाख्ये सहस्रग्रन्थसंहितायां मन्त्रकीलपटलो दशमः ॥

ये सर्वशैवाधिकवीरशैवाः परं विधिज्ञानसुवीरमार्गे ।
प्रवर्तयत्य(न्त्यं)द्य(व्य)यभक्तियोगांस्तेभ्यो नमो विश्वपवित्रकृद्भ्यः ॥
यथा मन्त्रं समुच्चार्य न त्यजेद्देहमन्दिरे ।
यथा मन्त्रं च लिङ्गं च मेलनं प्राणलिङ्गिनाम्(?) ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5478. वातूलतन्त्रम्.

## VĀTŪLATANTRAM.

**Substance**, palm-leaf. Size, 17⅝ × 1⅜ inches. Pages, 57. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Paṭalas 1 to 10 complete.

Same work as the above.

---

## No. 5479. वातूलतन्त्रम्.

## VĀTŪLATANTRAM.

**Pages**, 73. Lines, 20 on a page.

Begins on fol. 30*b* of the MS. described under No. 5101.

Paṭalas 1 to 10 complete.

Same work as the above.

---

## No. 5480. वातूलतन्त्रम्.

## VĀTŪLATANTRAM.

**Pages**, 83. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 5460.

With Kanarese Ṭīkā. Paṭalas 1 to 10 complete.

Same work as the above.

---

## No. 5481. वामदेवसंहिता.

## VĀMADĒVASAṀHITĀ.

**Substance**, paper. Size, 12 × 7⅝ inches. Pages, 552. Lines, 29 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

Two parts, the first containing 30 Adhyāyas and the second 72 Adhyāyas.

A Śaivāgama-saṁhitā attributed to Vāmadēva.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

वन्दे शङ्करमूर्तिमाद्यममलं तेजोनिधिं शाश्वतं
बिन्दुक्षोभकरं परात्परतरं नानात्मकं बीजिनम् ।
सर्वान्तस्थमनेकलोकजननं सोमं जगत्प्रेरकं
लिङ्गस्थं बहुमन्त्रमन्त्रितमहावेद्यं लयाख्यं ध्रुवम् ॥

* * * *

पप्रच्छुर्मुनयस्सर्वे रहस्यं परमं महत् ।
केन वा(वो)परमं(मो)लोके केन मुक्तिर्नृणां भवेत् ॥
केन सिद्धिर्मनुष्याणां ब्रह्मतादात्म्यसिद्धिदा ।
केन वाष्टाङ्गयोगाप्तिः केन लक्ष्मीरिचञ्चला ॥
तद्विचिन्त्य महाबाहो वदस्वाज्ञाननाशनम् ।

**End:**

उमामहेश्वरौ लोकं पालयन्ताववस्थितौ ।
महामिथुनमालायां रूपतः कथितौ हि तौ ॥

**Colophon:**

इति वामदेवसंहितायां नन्दिकेश्वरसिद्धान्ते द्विसप्ततितमोऽध्यायः ॥
उत्तरभागस्समाप्तः ॥

---

No. **5482.** वामदेवसंहिता.

VĀMADĒVASAṀHITĀ.

Substance, paper. Size, $12\frac{1}{8} \times 7\frac{1}{2}$ inches. Pages, 95. Lines, 26 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Bījakōśa 48*b*, Mudrāvidhānalakṣaṇa 55*b*, Mantrōtkīlanavidhi 63*a*, Ṣōḍaśyaṣṭōttaraśatanāmastōtra 66*a*, Mantradaivaprakāśikā 71*a*.

Incomplete and fragmentary.

Same work as the above.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5483. वामदेवसंहिता.

## VĀMADĒVASAMHITĀ.

Substance, palm-leaf. Size, 15¾ × 1¼ inches. Pages, 7. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 24*a*. The other works herein are Śivapūjāvidhi 1*a*, Vīraśaivaliṅgārcana 8*a*, Nīlakaṇṭhamantra 20*a*.

Contains only the 31st Adhyāya.

Same work as the above.

---

## No. 5484. विघ्नेश्वरमण्टपपूजाविधिः

## VIGHNĒŚVARAMAṆṬAPAPŪJĀVIDHIḤ.

Pages, 55. Lines, 22 on a page.

Begins on fol. 222*a* of the MS. described under No. 3027.

Complete.

On the worship of Gaṇēśa in the temple hall.

**Beginning:**

अथ देशिकस्स्नानादि कृत्वा, पादौ प्रक्षाल्याचम्य, मण्टपं प्रविश्य, मण्टपयजनार्थं सङ्कल्प्य, विघ्नेश्वरपूजापुरस्सरं पुण्याहं वाचयित्वा, इन्द्रपावकयोर्मध्ये नित्यवत् शिवसूर्यं सम्पूज्य ।

**End:**

आवाहोद्वासनं नास्ति व्यापकस्य शिवस्य च ।
स्मरन्तु देवमावाह्य विस्मरन्ति विसर्जनम् ॥

**Colophon:**

विघ्नेश्वरमण्टपपूजाविधिस्समाप्तः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5485. विभूतिधारणम्.

## VIBHŪTIDHĀRAṆAM.

Pages, 4. Lines, 21 on a page.

Begins on fol. 78*a* of the MS. described under No. 118.

Complete.

On how to put on the holy ashes known as Vibhūti.

**Beginning:**

अस्मद्गुरुपादुकाभ्यां नमः । अस्मत्परमगुरुपादुकाभ्यां नमः । अस्मत्परापरगुरुपादुकाभ्यां नमः ।

अस्य श्रीभस्मस्नानमहामन्त्रस्य पिप्पलायन ऋषिः । गायत्री छन्दः । कालाग्निरुद्रो देवता । समस्तजन्मार्जितनानाविधपातकोपपातक प्रायश्चित्तार्थं समस्तव्याधिपीडापरिहारार्थं शिवज्ञानसिद्ध्यर्थं भस्मधारणे विनियोगः ।

**End:**

भूतिर्भूतिकरी प(वि)त्रजननी पापौघविध्वंसिनी
सर्वोपद्रवनाशिनी शुभकरी सर्वार्थसम्पत्करी ।
भूतप्रेतपिशाचराक्षसगणारिष्टोपसंहारिणी
तेजोराज्यविशेषमोक्षकरणी भूतिस्सदा धार्यताम् ॥

---

## No. 5486. विभूतिधारणम्.

## VIBHŪTIDHĀRAṆAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 84*b* of the MS. described under No. 119.

Complete.

Same work as the above.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. **5487.** विभूतिधारणम्.

VIBHŪTIDHĀRAṆAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 25*b* of the MS. described under No. 2902.

Complete.

Similar to the above.

**Beginning:**

अस्य श्रीविभूतिधारणमन्त्रस्य पिप्पलादऋषिः . . . . . . .
अग्निरित्यादिमन्त्रेण विभूतिमभिमन्त्र्य विभूतिस्नानधारणं कुर्यात् ।

त्रियम्बकेति मन्त्रेण जातवेदसमन्त्रतः ।
क्षेत्रस्य पतिना चैव अग्निरित्यादिमन्त्रतः ॥
मूलेन चैव तारेण संस्थया द्वादशाश्रया ।
ईशा(ना)दिशिरोदेशे मुखे तत्पुरुषेन तु ॥

**End:**

वामबाहुमूले वामदेवाय । मध्ये प्रभञ्जनाय । मणिबन्धे वसुभ्यः . . . . . . . . . . . . . . . . शिरसि परमात्मने ॥

**Colophon:**

इति विभूतिधारणम् ॥

* * *

कोदण्डस्थे सवितरि प्रत्यूषे पूजयेच्छिवम् ।
द्वादशाब्देन यत्पुण्यं ति(दि)नेनैकेन लभ्यते ॥

---

No. **5488.** विमलागमः.

VIMALĀGAMAḤ.

Pages, 42. Lines, 7 on a page.

Begins on fol. 153*a* of the MS. described under No. 5417.

96th Paṭala complete.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



A Śaivāgama work. This Paṭala deals with the contemplation of Śiva in various ways.

**Beginning:**

तत्पुरुषमुखे यनवाशिमशु—घोरपञ्चाक्षरी । अं शिवाय नमः—सौम्यपञ्चाक्षरी । अं हुं शिवाय नमः—मन्त्रपञ्चाक्षरी ।

* * *

**Colophon:**

इति विमलागमे प्रासादमन्त्रावलीपटलः षण्णवतिः ॥

**End:**

श्वेतवर्णं श्वेतवक्त्रं श्वेतपुष्पं त्रिलोचनम् ।
श्वेताभरणसंयुक्तं पद्मासनसुसंस्थितम् ॥
लिङ्गार्चनसमं काले ध्यात्वा वै जपमाचरेत् ।
व्यापारं सकलं त्यक्त्वा नारुद्रो रुद्रमर्चयेत् ॥

---

## No. 5489. वीरमाहेश्वराचारसङ्ग्रहः.

## VĪRAMĀHĒŚVARĀCĀRASAṄGRAHAḤ.

Substance, palm-leaf (Śrītāla). Size, 18⅜ × 2⅛ inches. Pages, 222. Lines, 9 on a page. Character, Nandināgarī. Condition, slightly injured. Appearance, old.

Begins in the course of the 5th Adhyāya and breaks off in the 78th Adhyāya.

A summary of the religious observances of the Vīraśaivas: by Nīlakaṇṭhanāganātha.

**Beginning:**

कृषिर्भृतिः कुसीदञ्च दासत्वं परतन्त्रता ।
इष्टानिष्टवियोगश्च संप्रयोगस्सहस्रशः ॥

* * *

इत्येवमादिभिर्दुःखैस्सदा व्याप्तं चराचरम् ।
एभ्यः परश्शिवः शान्तः परिपूर्णः स्वभावतः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अस्ति नाथः परिक्रम्य पुंसां संसारसागरात् ।
व्यधीनां भेषजं यद्वत् प्रतिपक्षस्वभावतः ॥
तद्वत्संसारदोषाणां प्रतिपक्षश्शिवः स्मृतः ।
स्वर्गापवर्गयोर्दाता तं विज्ञाय विमुच्यते ॥

* * * *

**Colophon:**

इति श्रीनीलकण्ठनागनाथाचार्यवर्यविरचिते श्रीवीरमाहेश्वराचारसङ्ग्रहे संसारहेयत्वकथनं नाम पञ्चमोऽध्यायः ॥

**End:**

शङ्करस्य च ये भक्ताश्शान्तास्तद्गतमानसाः ।
तेषां दासस्य दासोऽहं भवेज्जन्मनि जन्मनि ॥

**Colophon:**

इति श्रीनीलकण्ठनागनाथाचार्यवर्यविरचिते श्रीमद्वीरमाहेश्वराचारसङ्ग्रहे सदाचारनिरूपणे शिवभक्तपूजामाहात्म्यकथनं नाम सप्तसप्ततितमोऽध्यायः ॥

*

षट्स्थलज्ञानवन्तं तं वीरमाहेश्वरं जनम् ॥
पूजयध्वं महाभागाः पूजा सा पुरुषार्थदा ॥

---

## No. 5490. वीरशैवगुरुपरम्परा.

## VĪRAŚAIVAGURUPARAMPARĀ.

**Pages**, 3. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 2417.

Complete.

Gives an account of the line of the successive Gurus of the Vīraśaivas.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

विश्वेश्वरसमारम्भामेकारामार्यमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥
श्रीमद्विश्वेश्वरगुरुं चैको(का)रामगुरूत्तमम् ।
वीरेशाराध्यतत्पुत्रं वीरभद्रकवीश्वरम् ॥

**End :**

पालङ्गिवंशसञ्जातचन्द्रशेखरहृत्सुतम् ।
कालत्रयपरिज्ञानसन्तोषितजनाधिपम् ॥
तपोविशेष . . . . . लिङ्गेश्वरं परम् ।
अस्मद्गुरुमहं वन्दे सर्वमङ्गलदायकम् ॥

---

## No. 5491. वीरशैवदीक्षाविधानम्.

## VĪRAŚAIVADĪKṢĀVIDHĀNAM.

Substance, palm-leaf. Size, $18\frac{3}{8} \times 1\frac{1}{4}$ inches. Pages, 65. Lines, 4 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Complete.

On the preliminary religious ceremony to be performed in relation to the initiation into the Vīraśaiva religion.

**Beginning :**

भूशुद्धिर्यथा—

तुषाङ्गारकेशास्थिभाण्डशकलनिम्नोन्नतवर्जितं तथा भूशुद्धिं कुर्यात् । निश्छिद्रैरेभिर्नवभिः षोडशभिर्द्वादशभिर्वा स्तम्भैरष्टहस्तसमुच्च(च्छ्रू)यप्रमाण सप्तहस्तायामकेन वा काम(यमा)नं कुर्यात् । तस्योपरि नाळिकेरपत्राणि वंशपत्राणि वास्तारयेत् । तस्य मध्ये पञ्चहस्तप्रमाणस्तम्भचतुष्टयेन मण्टपं कारयेत् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

तेभ्य एव सर्वे देयात् तेभ्य एव सर्वे देयादित्याह भगवान् कालाग्निरुद्र इति शिष्याय शिवलाञ्छनं दद्यात् ॥

**Colophon:**

इति वीरशैवदीक्षाविधानं सम्पूर्णम् ॥

---

## No. 5492. वीरशैवसन्ध्यावन्दनप्रयोगः.
## VĪRAŚAIVASANDHYĀVANDANAPRAYŌGAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 93*a* of the MS. described under No. 781.

Incomplete.

On the morning and evening prayers of the Vīraśaivas.

**Beginning:**

शिव शङ्कर शाश्वत भूतिविलेप . . . . . . . रुद्र भद्र शिव शिवशम्भोराज्ञया प्रवर्तमानस्याद्यब्रह्मण . . . . शिवकरण एवङ्गुणविशेषणविशिष्टायां शिवतिथौ प्रातस्सन्ध्यामुपाशिषे(सिष्ये) ।

**End:**

अथ मित्रस्य चर्षणीधृतः । प्राच्यै दिशे, प्रतीच्यै दिशे, दक्षिणायै दिशे, उदीच्यै दिशे . . . . सेतुसागरपर्यन्तं गोब्राह्मणेभ्यश्शुभं भवतु । ऋषयः मण्डुकुलगोत्रशर्माहं भोः—अभिवादयेत् आचमनम् ॥

---

## No. 5493. वीरशैवसारोद्धारः—सोमनाथभाष्यसहितः.
## VĪRAŚAIVASĀRŌDDHĀRAḤ WITH SŌMANĀTHABHĀṢYA.

Substance, paper. Size, 11 × 9 inches. Pages, 149. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Prākṛtamaṇidīpikā 16*a*.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



A treatise on the essentials of the Vīra-śaiva religion. The author of the commentary is Sōmanātha.

**Beginning:**

ईशानं परमानन्दं पुमिन्दुवदनामयम् ।
अनादिनिधनं देवं वन्दे मुग्धेन्दुशेखरम् ॥
केशकेशवरूपैर्यस्सृजत्यवति हन्ति च ।
तं गणेशमहं वन्दे स्मृतिमात्राघनाशनम् ॥

जयतु बसवराजः स्थौल्यनैर्मल्यतेजाः
प्रमथगणसमाजप्रोल्लसद्भक्तिबीजः ।
प्रहृतविनमदार्तिः स्था(स्वा)यदाम्नायवृ(पू)र्तिः
स्थिरादिगमितकीर्तिः श्रीवृषाधीशमूर्तिः ॥

जय बसव बसव इति । इदानीं कलियुगे शिवभक्तिमुद्धर्तुं वृषभ एव बसवादिदेवो जातः । वृषभस्य बसवनामत्वं कस्मात्कारणादासीत्? वृषभस्यैषा प्रक्रिया—वृषभः । ऋतोऽत् । वृतवृतोत् । कृत्वा कामेन हृत्वा व्यामेन धृत्वा भामेनेति लक्षणात् ।

* * * *

सकलश्रुतिस्मृतीतिहासागमपुराणोक्तप्रकारेण भृङ्गिरिटिघण्टाकर्णसुकेश्युपमन्यु . . . . महादेवशब्दनिर्वचनेत्येवमादीनि पञ्चविंशतिप्रकरणानि दर्शयिष्यामः ।

**End:**

शिवेन पूजितः को वा वदन्तु प्रतिवादिनः ॥
सत्यं वच्मि हितं वच्मि सारं वच्मि पुनः पुनः ।
सर्वस्मादधिकं रुद्रं भवार्चय मुने प्रभुम् ॥

**Colophon:**

इति श्रीवीरशैवसारोद्धारे बसवराजीये सोमनाथभाष्ये सर्वं सम्पूर्णम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5494. वीरशैवसिद्धान्तः–कर्णाटकटीकासहितः.

## VĪRAŚAIVASIDDHĀNTAḤ WITH KANARESE COMMENTARY.

Pages, 58. Lines, 7 on a page.

Begins on fol. 17*a* of the MS. described under No. 5415.

The accepted doctrines and religious conclusions of the Vīraśaivas. Herein the Śaivas are divided into 4 classes.

**Beginning:**

शैवं चतुर्विधं ज्ञेयं समासाच्छृणु षण्मुख ।
सामान्यं मिश्रकं चैव शुद्धवीरं यथाक्रमम् ॥

तत्रादौ सम्प्रवक्ष्यामि शैवसामान्यलक्षणम् ।
शिवलिङ्गं यदा पश्येत् तदा कुर्यात्समर्चनम् ॥

**End:**

यधमशि(धवळ)वपुषमिन्दोर्मण्डले सन्निषण्णं
भुजगवलयहारं भस्मदिग्धाङ्गमीशम् ।
हरिणपरशुपाणिं चारुचन्द्रार्धमौळिं
हृदयकमलमध्ये सन्ततं चिन्तयामि ॥

---

## No. 5495. वीरशैवसिद्धान्तोत्तरकौमुदी.

## VĪRAŚAIVASIDDHĀNTŌTTARAKAUMUDĪ.

Pages, 61. Lines, 20 on a page.

Begins on fol. 147*b* of the MS. described under No. 5101.

Incomplete.

Similar to the above.

By Vīrabhadrārādhya.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

श्रीचिन्तामणिमन्दिरां तरशर(परशिव)ब्रह्मासनाग्रस्थित-
श्रीमल्लेशशिवाङ्कपीठनिलयां सिन्दूरवर्णाम्बराम् ।
पुण्ड्रेक्षुज्यळि(क्षूज्वल)कार्मुकाङ्कुशितसत्पाशप्रसूनाशुगां
ध्यायेत्(म)भ्रमराम्बिकां शशिकळामौलिं त्रिणेत्रां मुदा ॥

* * * *

उद्भवाराध्यवंशोऽर्धचन्द्रशेखरनन्दनः ।
अन्नपूर्णासुतो वीरभद्राराध्यश्च तन्त्रवित् ॥
कारणादित्रिदेहेषु लिङ्गत्रयसमन्वितः ।
भारद्वाजसगोत्रश्च मल्लेशाराध्यपूर्वजः ॥
संवीक्ष्य शिवशास्त्राणि सारमुद्धृत्य सर्वदा ।
वीरशैवोचितश्रीमत्सिद्धान्तोत्तरकौमुदीम् ॥
वक्ष्ये सङ्क्षेपतः श्रीमद्गुणेन्द्रान् हृदि भावयन् ।

**End:**

इत्येवं शिवाग्निं ध्यात्वा गायत्र्याद्भिः संप्रोक्ष्य, ओं जातवेदसे नमः, ओं सप्तजिंहा(जिह्वा)य नमः, ओं हव्यवाहनाय नमः, ओमश्वोदरजाताय नमः । ओं वैश्वानराय नमः.

---

No. **5496.** वीरशैवसिद्धान्तोत्तरकौमुदी.

VĪRAŚAIVASIDDHĀNTŌTTARAKAUMUDĪ.

Pages, 44. Lines, 20 on a page.

Begins on fol. 66*b* of the MS. described under No. 5101.

Śivapūjāvidhi, complete.

Similar to the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

श्रीमद्रुद्रनिटिललोचनज्वलज्ज्वालादग्धपुनर्जीवितमदन . . . दीक्षागुरो शिक्षादेशिक भवदर्चनार्थमनुज्ञा दीयताम्—इति विज्ञाप्य, दीर्घदण्डनमस्कारान् कृत्वा, पूजाद्रव्याणि तत्र निधाय, गुरोश्चरणाङ्गुष्ठौ गृहीत्वा ।

**End:**

अथान्यदर्चने पद्मरूपमण्डलं किंचिद्रङ्गवल्लीं विरच्य सूक्ष्माकारेणा- र्चयित्वा, फलादिकमवसरं(रे) सोदकं दत्त्वा इत्येतत्समाप्तः ॥

**Colophon:**

इति वीरशैवसिद्धान्तोत्तरकौमुद्यां शिवपूजाविधिस्समाप्तः ॥

---

No. **5497.** वीरशैवागमः.

VĪRAŚAIVĀGAMAḤ.

Pages, 45. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under **No.** 5118.

Paṭalas 1 to 12 complete, 13th incomplete.

A treatise on the religion of the Vīraśaivas.

**Beginning:**

देव्युवाच—

शैवं पाशुपतं वामं ला(ना)कुलं च चतुर्विधम् ।
तत्परं शैवमित्युक्तं सौम्यं रौद्रं हि शाम्भवम् ॥
सौम्यं पञ्चविधं ज्ञेयं भूततन्त्रञ्च गारुडम् ।
वामदक्षिणसिद्धान्तसादाख्ये तु विनिर्गतम् ॥
भूतप्रेतादिशमनं भूततन्त्रमिति स्मृतम्।
विषापहरणञ्चैव गारुडन्तदुदाहृतम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वामदक्षिणसिद्धान्ते तस्मिन् दुर्गाः प्रकीर्तिताः ।
दक्षिणं शाम्भवं चैव वामं शक्तिप्रधानकम् ॥

* * * *

एते समयिनः सर्वे ह्यन्योन्यकलहप्रियाः ।
एतान् सर्वान्परित्यज्य वीरशैवं वदस्व मे ॥

See under the next number for the end.

---

## No. 5498. वीरशैवागमः.

## VĪRAŚAIVĀGAMAḤ.

Substance, palm-leaf. Size, 13 × 1⅛ inches. Pages, 220. Lines, 4 on a page. Character, Telugu. Condition, injured. Appearance, new.

Begins on fol. 1*a*. The other work herein is Śaivadīkṣāvidhāna 111*a*.

Paṭalas 1 to 26.

The transcription of this manuscript is said to have been completed on Wednesday in the bright half of Māgha in the year Virōdhi.

Same work as the above.

See under the previous number for the beginning.

**End:**

सर्वेषामृषिमुख्यानां तपसा धीतिसागर(दीप्ततेजसाम्) ।
शिवसंस्कारसम्बन्धात् जातिभेदो न विद्यते ॥

तस्माच्छिवाज्ञया लोके मनुष्याणां महात्मनाम् ।
लिङ्गधारणमात्रेण शिव एव न संशयः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon :**

इति श्री(वीर)शैवागमे सहस्रकोटिसंहितायां लिङ्गधारणभिक्षापात्रविधिजातिभेदरहितं नाम षड्विंश[ति]पटलः ॥

---

No. **5499.** वीरशैवागमः.

VĪRAŚAIVĀGAMAḤ.

Substance, paper. Size, 11⅝ × 8⅝ inches. Pages, 136. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Vīrāgama (Uttarabhāga) 70*a*.

Paṭalas 1 to 28.

Similar to the above.

**Beginning :**

श्रीदेव्युवाच—

शैवं पाशुपतं वामं वातूलं* च चतुर्विधम् ।
तत्परं शैवमित्युक्तं सौम्यं रौद्रं हि शाम्भवम् ॥

सौम्यं पञ्चविधं ज्ञेयं भूततन्त्रं च गारुडम् ।
वामं दक्षिणसिद्धान्तं सादाख्ये तु विनिर्गतम् ॥

**End :**

तस्माच्छिवाज्ञया लोके मनुष्याणां महात्मनाम् ।
लिङ्गधारणमात्रेण शिव एव न संशयः ॥

**Colophon :**

इति श्रीवीरशैवागमे प्राणलिङ्गधारणभिक्षापात्रविधिजातिभेदरहितं नामाष्टाविंश[ति]पटलः ॥

---

* ला(ना)कुलम्—इति पाठान्तरम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5500. वीरशैवागमः.

## VĪRAŚAIVĀGAMAḤ.

Substance, palm-leaf. Size, 15½ × 1⅜ inches. Pages, 38. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Malhaṇastuti 21*a*, Mahimnastuti 35*a*, Anāmayastuti 53*a*, Halāyudhastava 71*a*, Vīrāgama 88*a*, Vīraśaivāgama 93*a*.

Incomplete.

Similar to the above.

**Beginning:**

यन्त्रस्य गुणदोषेण यन्त्री ण(न)पुरुतोतु(दोषकृत्) ।
अहं यन्त्री भवान्नेत्री(ता)मम दोषो न विद्यते ॥

* * * *

लिङ्गलोचनसंयुक्तो अ(ह्य)न्यचिह्नं न धारयेत् ।
तत्प्राणेनन(द्धारणेन)भक्तानां रौरवं नरकं व्रजे(भवे)त् ॥

स्वलिङ्गभजनं देवि किन्तु जङ्गमसंपदि ।
अर्थ एव शिवस्साक्षाज्जङ्गमं प्रभुरिन्वरि ॥

**End:**

विष्णुरुवाच—

मद्भक्तो(क्तः)शङ्करद्वेषी नरकं याति फल्गुन ।
शिवभक्तस्तु मद्द्वेषी न तस्य प्रभवाम्यहम् ॥

ईश्वरस्य समो नास्ति ब्रह्मा विष्णुश्च किङ्करः ।
शिवाख्यं(ख्येन)समं नास्ति वेदशास्त्रागमेव(षु)च ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5501. वीरशैवागमः.
## VĪRAŚAIVĀGAMAḤ.

Pages, 7. Lines, 7 on a page.

Begins on fol. 93*a* of the MS. described under No. 5500.

25th Paṭala complete.

Similar to the above.

**Beginning:**

अथातस्संप्रवक्ष्यामि शृणुध्वं श्रद्धया सह ।
शिवलिङ्गार्चनं वीरशैवोदितविधिं परम् ॥
वीरागमादितन्त्रेषु प्रोक्तं श्रीशम्भुना पुरा ।
कुमारस्योपदेशार्थं स एवात्रोच्यते मया ॥
जलस्नानाद्विशेषेण भस्मस्नानमनुत्तमम् ।
भक्तस्थले सदाचारो नियमस्थो जितेन्द्रियः ॥

**End:**

ओं पिनाकिने नमः—पार्श्वं पूजयामि । ओं शुपधा(भदा)यिने नमः—सर्वाङ्गं पूजयामि ।

---

## No. 5502. वीरागमः.
## VĪRĀGAMAḤ.

Pages, 7. Lines, 7 on a page.

Begins on fol. 88*a* of the MS. described under No. 5500.

Incomplete.

Similar to the above.

**Beginning:**

आदौ सामान्यशैवं तु पूर्वशैवं द्वितीयकम् ।
मिश्रशैवं तृतीयं तु शुद्धशैवं चतुर्थकम् ॥

* * * *

तेभ्यो विज्ञानिनश्श्रेष्ठास्तेषु शङ्करपूजकाः ।
